श्रीरस्तु ।

षड्दर्शनम् ।

श्रीमन्महर्षिजैमिनिगौतमकणादकापि-
लपतञ्जलिव्यासप्रणीतम् ।

तदिदम्-
श्रीकृष्णदासात्मज--गङ्गाविष्णुना
स्वकीये "लक्ष्मीवेंकटेश्वर," मुद्रणालये
मुद्रयित्वा प्रकाशितम् ।

संवत् १९८२, शकाब्दाः १८४७.

कल्याण-मुंबई.

१ द्वौ योगौ द्वेच मीमांसे द्वौ तर्काविति षड् बुधाः ।

भूमिका।

प्रसिद्धानि दर्शनान्यास्तिकनास्तिकमतभेदेन क्रमशश्चार्वाकमाध्यमिकयोगाचारसौत्रान्तिकवैभाषिकजैनश्रीमन्महर्षिगौतमकणादजैमिनिपतञ्जलिकपिलव्यासकर्तृकाणि द्वादशविधान्युत्तरोत्तरं श्रेष्ठानि ।

यतः–(१) चार्वाकः " स वा एष पुरुषोऽन्नरसमयः " इत्युक्तेः प्रत्यक्षमात्रप्रमाणवादी (२)–सुषुप्तावहं नासमिति प्रतीतेः शून्यवादी माध्यमिकः (३) क्रमादयं घट इत्यहमिति च प्रवृत्तिविज्ञानालयविज्ञानभेदेन द्विविधक्षणिकविज्ञानस्वरूप एवात्मा नान्य इति योगाचारः (४)–ज्ञानाकारानुमेयक्षणिकबाह्यार्थ एवात्मेति सौत्रान्तिकः (५)–क्षणभंगुरवादी क्षणिकबाह्यार्थ एवात्मेति वैभाषिकः (६)–देहातिरिक्तो देहपरिणाम आत्मेति दिगम्बरमतावलम्बी जैनः (७)–आत्मानात्मपरीक्षायां क्रियमाणायामावश्यकानां सकलपदार्थोद्देश्यलक्षणपरीक्षाणः प्रतिपादनेनानात्मवादनिराकरणकर्ता महर्षिर्गौतमः (८)–महर्षिगौतमाद्युक्तार्थे विशेषतः पदार्थविभागादिप्रतिपादयिता महर्षिः कणादः (९)–स्वर्गनरकादिकं कर्मायत्तमिति कर्मप्राधान्यवादी महर्षिर्जैमिनिः (१०)–प्रधानायत्तं सुखदुःखादिकं ततोऽन्यः पुरुष एवात्मेत्यादिवक्ता महर्षिः कपिलः (११)–आत्मानात्मविचारोपयोगिमार्गप्रदर्शी

कउपासनाकाण्डप्रधानवादीपतञ्जलिः (१२)-आत्मज्ञानेमेव सुखं ततोन्यदविद्याकल्पितं मिथ्येत्यत्र प्रयोजकाणीतराणि सर्वाण्यास्तिकदर्शनानीति वादि परमकृपालुर्महर्षिर्व्यास इति । तेषु नास्तिकदर्शनानां सर्वेषां जैनदर्शनमन्तरेणानुपलब्धेस्तानि सर्वाणि विना केवलमास्तिकानां षड्दर्शनानां तत्तद्भाष्यानुसारेण संशोध्य मुद्रापणं कृतम् । तत्र कापिलं द्वाविंशतिसूत्रात्मकं षडध्यायात्मकं चेति द्विविधं सह पाठभेदादिटिप्पणतत्तदध्यायार्थसंग्रहकारिकाभिः तथा न्यायदर्शनं तत्तत्सूत्रोत्तरसंख्योत्तर संख्याक्रमेण तदाह्निकान्ते विषयविभागप्रदर्शनेन तथा पूर्वमीमांसादर्शनपुस्तकगतपाठभेदान् ग्रन्थान्तरीयादिपाठभेदानधिकरणभेदान-धिकरणावतरणिका--स्तत्तदवतारणाद्यङ्केन तत्रत्यन्यायमालागततदधिकरणश्लोकसंख्यां तदन्त्येऽधिकरणक्रमबोधकसूत्रानुक्रमसंख्यान्तवक्ररेखामध्येतदुत्तरतत्पादगतन्यायमालाकारिकासंख्यांतत्पादान्ततत्पादगतविषयभेदस्तत्तदध्यायादौ तत्तदध्यायगतविषयश्चेत्येतैस्तथा-वेदान्तदर्शने मत भेदेन सूत्राधिकरणपाठान्तरंपुस्तकान्तरादिगतपाठान्तत्सूत्रसंख्यातदनन्तरवक्ररेखामध्यसंख्ययाधिकरणसंख्येत्येवं बहुभिरंशैश्च मिलितमिदं महतामन्यविदुषामुपकाराय मुद्रापितं सत्प्रकाशत इति शम्.

अथ

श्रीमज्जैमिनिमहर्षिप्रणीतं पूर्वमीमांसादर्शनम् ॥

प्रथमोऽध्यायः । तत्र विध्यर्थवादादिप्रमाणं निरूप्यते.

३-३ अथ शास्त्रारम्भप्रतिज्ञाधिकरणं धर्मजिज्ञासाधिकरणम्—१ ॥

ॐ अथातो धर्मजिज्ञासा ॥ १ ॥

३-३ धर्मलक्षणाधिकरणम्—२ ॥

चोदनालक्षणोऽर्थो धर्मः ॥ २ ॥

२-२ धर्मप्रमाणपरीक्षाधिकरणम्-३ ॥

तस्य निमित्तपरीष्टिः ॥ ३ ॥

२ धर्मे प्रत्यक्षाद्यगम्यत्वाधिकरणम् -४ ॥

सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् ॥ ४ ॥

२ धर्मे विधिप्रामाण्याधिकरणम्-५ ॥

औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् ॥ ५ ॥

२ शब्दनित्यत्वाधिकरणम्—६ ॥

कर्मैके तत्र दर्शनात् ॥ ६ ॥ अस्थानात् ॥ ७ ॥ करोतिशब्दात् ॥ ८ ॥ सत्त्वान्तरे च यौगपद्यात् ॥ ९ ॥ प्रकृतिविकृत्योश्च ॥ १० ॥ वृद्धिश्च कर्तृभूम्नाऽस्य ॥ ११ ॥ समं तु तत्र दर्शनम् ॥ १२ ॥ सतः परमदर्शनं विषयानागमात् ॥ १३ ॥ प्रयोगस्य परम् ॥ १४ ॥ आदित्यवद्यौगपद्यम् ॥ १५ ॥ वर्णान्तरमविकारः ॥ १६ ॥ नादवृद्धिपरा ॥ १७ ॥ नित्यस्तु स्याद्दर्शनस्य परार्थत्वात् ॥ १८ ॥

सर्वत्र यौगपद्यात् ॥ १९ ॥ संख्याभावात् ॥२०॥अनपेक्षत्वात् ॥२१॥ प्रख्याभावाच्च योगस्य ॥ २२ ॥ लिङ्गदर्शनाच्च ॥ २३ ॥

२ वेदप्रत्यायकत्वाधिकरणम्-७ ॥

उत्पत्तौ वाऽवचनास्स्युरर्थस्यातन्निमित्तत्वात् ॥ २४ ॥ तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात् ॥ २५ ॥ लोके सन्नियमात्प्रयोगसन्निकर्षः स्यात् ॥ २६ ॥

---

१ संनियमनादिति पाठान्तरम् ।

२ वेदापौरुषेयत्वाधिकरणम्—८ ॥

वेदांश्चैके सन्निकर्षं पुरुषाख्याः ॥२७॥ अनित्यदर्शनाच्च ॥२८॥ उक्तं तु शब्दपूर्वत्वम् ॥ २९ ॥ आख्याः प्रवचनात् ॥ ३० ॥ परन्तु श्रुतिसामान्यमात्रम् ॥ ३१ ॥ कृते वा विनियोगस्स्यात्कर्मणस्सम्बन्धात् ॥३२॥ ॥ न्यायश्लोकाः—(२६) ॥ अधिकरणानि—(८) ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने प्रथमस्याध्यायस्य [विधिरूपमाननिरूपण नाम] प्रथमः पादः ॥ १ ॥ १ ॥

३-१ अर्थवादाधिकरणम्-१ ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ॥१॥ शास्त्रदृष्टविरोधाच्च ॥ २ ॥ तथा फलाभावात् ॥ ३ ॥ अन्यानर्थक्यात् ॥ ४ ॥ अभागिप्रतिषेधाच्च ॥ ५ ॥ अनित्यसंयोगात् ॥ ६ ॥ विधीनां त्वेकवाक्यत्वात् स्तुत्यर्थेन विधिनां स्युः ॥ ७ ॥ तुल्यं च साम्प्रदायिकम् ॥ ८ ॥ अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधस्स्याच्छब्दार्थस्त्वप्रयोगभू-

तस्तस्मादुपपद्येत ॥ ९ ॥ गुणवा-
दस्तु ॥ १० ॥ रूपात्प्रायात् ॥११॥
दूरभूयस्त्वात् ॥ १२ ॥ अपराधात्क-
र्तुश्च पुत्रदर्शनम् ॥ १३ ॥ आका-
लिकेप्सा ॥ १४ ॥ विद्याप्रशंसा ॥ १५ ॥
सर्वत्वमाधिकारिकम् ॥ १६ ॥ फलस्य
कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः
फलविशेषस्स्यात् ॥ १७ ॥ अन्त्य-
योर्यथोक्तम् ॥ १८ ॥

३–१ विधिवन्निगदाधिकरणम्–२ ॥

विधिर्वा स्यादपूर्वत्वाद्वादमात्रं

ह्यनर्थकम् ॥ १९ ॥ लोकवादिति चेत् ॥ २० ॥ न पूर्वत्वात् ॥२१॥ उक्तंतु वाक्यशेषत्वम् ॥ २२ ॥ विधिश्चानर्थकः क्वचित्तस्मात् स्तुतिः प्रतीयेत तत्सामान्यादितरेषु तथात्वम्॥२३॥ प्रकरणे सम्भवन्नपकर्षो न कल्प्येत विध्यानर्थक्यं हि तं प्रति ॥ २४ ॥ विधौ च वाक्यभेदः स्यात् ॥ २५ ॥

२ हेतुमन्निगदाधिकरणम्—३ ॥

हेतुर्वा स्यादर्थवत्त्वोपपत्तिभ्याम् ॥ २६ ॥ स्तुतिस्तु शब्दपूर्वत्वादचोदना च तस्य ॥ २७ ॥ अर्थे स्तुति-

रन्याय्योति चेत् ॥ २८ ॥ अर्थस्तु विधिशेषत्वाद्यथा लोके ॥ २९ ॥ यदि च हेतुरवतिष्ठेत निर्देशात्सामान्यादिति चेदव्यवस्था विधीनां स्यात् ॥ ३० ॥

२–१ मन्त्रलिङ्गाधिकरणम् ४ ॥

तदर्थशास्त्रात् ॥ ३१ ॥ वाक्यनियमात् ॥ ३२ ॥ बुद्धशास्त्रात् ॥ ३३ ॥ अविद्यमानवचनात् ॥ ३४ ॥ अचेतनेऽर्थबन्धनात् ॥ ३५ ॥ अर्थविप्रतिषेधात् ॥ ३६ ॥ स्वाध्यायवद्वचनात् ॥ ३७ ॥ अविज्ञेयात् ॥ ३८ ॥ अ-

नित्यसंयोगान्मन्त्रानर्थक्यम् ॥ ३९ ॥
अविशिष्टस्तु वाक्यार्थः ॥ ४० ॥ गु-
णार्थेन पुनः श्रुतिः ॥ ४१ ॥ परि-
संख्या ॥४२॥ अर्थवादो वा ॥ ४३॥
अविरुद्धं परम् ॥ ४४ ॥ संप्रैषे कर्म-
गर्हानुपलम्भः संस्कारत्वात् ॥ ४५॥
अभिधानेऽर्थवादः ॥ ४६ ॥ गुणाद-
प्रतिषेधः स्यात् ॥ ४७ ॥ विद्यावच-
नमसंयोगात् ॥ ४८ ॥ सतः परम-
विज्ञानम् ॥ ४९ ॥ उक्तश्चाऽनित्य-
संयोगः ॥ ५० ॥ लिङ्गोपदेशश्च तद-
र्थत्वात् ॥५१॥ ऊहः॥५२॥विधिश-

ब्दाश्च ॥ ५३ ॥ (१३) ॥ (४) ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने प्रथमस्याऽध्यायस्य (अर्थवादरूपप्रमाणानिरूपणं नाम) द्वितीयः पादः ॥ १ ॥ २॥

२–१ अथ स्मृतिप्रामाण्याधिकरणम्–१॥

धर्मस्य शब्दमूलत्वादशब्दमनपेक्ष्यं स्यात् ॥ १॥ अपि वा कर्तृसामान्यात्प्रमाणमनुमानं स्यात् ॥ २ ॥

२–२ श्रुतिप्राबल्याधिकरणम्–२ ॥

विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानम् ॥ ३ ॥

२ दृष्टमूलकस्मृत्यप्रामाण्या०-३ ॥

हेतुदर्शनाच्च ॥ ४ ॥

४ पदार्थप्राबल्याधिकरणम्-४ ॥

शिष्टाकोपे विरुद्धमिति चेत् ॥५॥ न शास्त्रपरिमाणत्वात् ॥ ६ ॥ अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् ॥ ७ ॥

६ शास्त्रप्रसिद्धार्थप्रामाण्या० वा-आर्य म्लेच्छाधिकरणम्-९ ॥

तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात् ॥ ८ ॥ शास्त्रस्था वा तन्निमित्तत्वात् ॥ ९ ॥

२–१ म्लेच्छप्रसिद्धार्थप्रामाण्या०–६ ॥

चोदितं तु प्रतीयेताऽविरोधात् प्रमाणेन ॥ १० ॥

२–१ कल्पसूत्राणां स्वतः प्रामाण्या०-७॥

प्रयोगशास्त्रमिति चेत् ॥ ११ ॥ नाऽसान्नियमात् ॥ १२ ॥ अवाक्यशेषाच्च ॥ १३ ॥ सर्वत्र च प्रयोगात्सन्निधानशास्त्राच्च ॥ १४ ॥

१–१ होलाकाधिकरणम्–८ ॥

अनुमानव्यवस्थानात् तत्संयुक्तं प्रमाणं स्यात् ॥ १५ ॥ अपि वा सर्वधर्मः स्यात्तन्न्यायत्वाद्विधानस्य ॥ १६ ॥

दर्शनाद्विनियोगः स्यात् ॥ १७ ॥
लिङ्गाभावाच्च नित्यस्य ॥ १८ ॥
आख्या हि देशसंयोगात् ॥ १९ ॥
न स्याद्देशान्तरेष्विति चेत् ॥ २० ॥
स्याद्योगाख्या हि माथुरवत् ॥ २१ ॥
कर्मधर्मो वा प्रवणवत् ॥ २२ ॥
तुल्यं तु कर्तृधर्मेण ॥ २३ ॥

२–१ साधुपदप्रयुक्त्यधिकरणम्–९ ॥

प्रयोगोत्पत्त्यशास्त्रत्वाच्छब्देषु न व्यवस्था स्यात् ॥२४॥ शब्दे प्रयत्ननिष्पत्तेरपराधस्य भागित्वम् ॥२५ ॥

अन्यायश्चानेकशब्दत्वम् ॥ २६ ॥ तत्र तत्त्वमभियोगविशेषात्स्यात् ॥ २७॥ तदशक्तिश्चानुरूपत्वात् ॥२८॥ एकदेशत्वाच्च विभक्तिव्यत्यये स्यात्२९॥

४-१ लोकवेदयोश्शब्दैक्या० वा–आकृत्यधिकरणम्–१० ॥

प्रयोगचोदनाभावादर्थैकत्वमविभागात् ॥ ३० ॥ अद्रव्यशब्दत्वात् ॥ ३१॥ अन्यदर्शनाच्च ॥ ३२ ॥ आकृतिस्तु क्रियार्थत्वात् ॥ ३३ ॥ न क्रिया स्यादिति चेदर्थान्तरे विधानं न द्रव्यमिति चेत् ॥ ३४ ॥ तदर्थत्वात्प्रयो-

गस्याविभागः ॥३८॥(३८॥)(१०॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने प्रथमस्याध्यायस्य (स्मृतिरूपप्रमाणनिरूपणं नाम) तृतीयः पादः ॥ १ ॥ ३ ॥

---

२ अथ उद्भिदादिशब्दानां यागनामतया प्रामाण्याधिकरणम्–१ ॥

उक्तं समाम्नायैदमर्थ्यं तस्मात्सर्वं तदर्थं स्यात् ॥ १ ॥

२–१ उद्भिदादिशब्दानां यागनामताधिकरणम्–२ ॥

अपि वा नामधेयं स्याद्यदुत्पत्तावपूर्वमविधायकत्वात् ॥ २ ॥

२ चित्रादिशब्दानां यागनामता०-३ ॥

यस्मिन् गुणोपदेशः प्रधानतोऽभिसम्बन्धः ॥ ३ ॥

५ अग्निहोत्रादिशब्दानां यागनामता०
वा-तत्प्रख्यन्यायाधिकरणम्-४ ॥

तत्प्रख्यञ्चान्यशास्त्रम् ॥ ४ ॥

३ श्येनादिशब्दानां यागनामता० वा
तद्व्यपदेशन्यायाधिकरणम्-५ ॥

तद्व्यपदेशं च ॥ ५ ॥

वाजपेयादिशब्दानां नामधेयता०-६ ॥

नामधेये गुणश्रुतेः स्याद्विधानमिति चेत् ॥६॥ तुल्यत्वात् क्रिययोर्न॥७॥ ऐकशब्द्ये परार्थवत् ॥ ८ ॥

२-१ आग्नेयादिशब्दानामनामता०-७ ॥

तद्गुणास्तु विधीयेरन्नविभागाद्वि-धानार्थे न चेदन्येन शिष्टाः ॥ ९ ॥

२-१ बर्हिरादिशब्दानां जातिवाचित्वाधिकरणम्-८ ॥

बर्हिराज्ययोरसंस्कारे शब्दलाभा-दतच्छब्दः ॥ १० ॥

२ प्रोक्षण्यादिशब्दानां यौगिकता०-९ ॥

प्रोक्षणीष्वर्थसंयोगात् ॥ ११ ॥

१ निर्मन्थ्यशब्दस्य यौगिकता०-१० ॥

तथानिर्मन्थ्ये ॥ १२ ॥

४-१ वैश्वदेवादिशब्दानां नामधेयताधिकरणम्-११ ॥

वैश्वदेवे विकल्प इति चेत् ॥ १३ ॥

न वा प्रकरणात्प्रत्यक्षविधानाच्च नहि प्रकरणं द्रव्यस्य ॥ १४ ॥ मिथश्चा-नर्थसम्बन्धः ॥ १५ ॥ परार्थत्वाद्गु-णानाम् ॥ १६ ॥

३--१ वश्वानरऽष्टत्वादीनामर्थवादताधि-करणम्--१२ ॥

पूर्ववन्तोऽविधानार्थास्तत्सामर्थ्यं समाम्नाये ॥ १७ ॥ गुणस्य तु विधा-नार्थे तद्गुणाः प्रयोगे स्युरनर्थका न हि तं प्रत्यर्थवत्ताऽस्ति ॥ १८ ॥ त-च्छेषो नोपपद्यते ॥ १९॥ अविभागा-

द्विधानार्थं स्तुत्यर्थेनोपपद्येरन्॥२०॥
कारणं स्यादिति चेत् ॥ २१ ॥
आनर्थक्यादकारणं कर्तुर्हि कारणानि
गुणार्थो हि विधीयते ॥ २२ ॥

३ यजमानशब्दस्य प्रस्तरादिस्तुत्यर्थ-
त्वाधिकरणम्-१३ ॥

तत्सिद्धिः ॥ २३ ॥

१ आग्नेयादिशब्दानां ब्राह्मणादिस्तु-
त्यर्थताधिकरणम्-१४ ॥

जातिः ॥ २४ ॥

१ सूपादिशब्दानां यजमानस्तुत्यर्थ-
ताधिकरणम्-१५ ॥

सारूप्यात् ॥ २५ ॥

३ अपश्वादिशब्दानां गवादिप्रशंसार्थत्वाधिकरणम्–१६ ॥

प्रशंसा ॥ २६ ॥

४ भूमाधिकरणं-वा-सृष्टिव्यपदेशा०-१७ ॥

भूमा ॥ २७ ॥

१ लिङ्गसमवायन्याया०वा-प्राणभृदादिशब्दानां स्तुत्यर्थत्वाधिकरणम्–१८ ॥

लिङ्गसमवायात् ॥ २८ ॥

४वाक्यशेषेण सन्दिग्धार्थनिरूपणा०-१९ ॥

सन्दिग्धेषु वाक्यशेषात् ॥ २९ ॥

२सामर्थ्येनाव्यवस्थितानां व्यवस्था०–२० ॥

अर्थाद्वा कल्पनैकदेशत्वात् ॥३०॥

(५६) ॥ (२०) ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने प्रथमस्याध्यायस्य (उद्भिच्चित्रादिनामरूपत्वे माननिरूपणं नाम) चतुर्थः पादः॥ ॥ १ ॥ ४ ॥ समाप्तः प्रथमोऽध्यायः ॥ (१)॥ ॥ (१५०) ॥ (४२) ॥

अथ द्वितीयोऽध्यायः । तत्र यागदानादिधर्मभेदो निरूप्यते-

६ अपूर्वस्याख्यातप्रतिपाद्यत्वा०-१ ॥

भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते ॥ १ ॥ सर्वेषां भावोऽर्थ इति चेत् ॥ २ ॥ येषामुत्पत्तौ स्वे प्रयोगे रूपोपलब्धि-

स्तानि नामानि तस्मात्तेभ्यः पराकां-
क्षाभूतत्वात्स्वे प्रयोगे ॥ ३ ॥
येषां तूत्पत्तावर्थे स्वे प्रयोगे न वि-
द्यते तान्याख्यातानि तस्मात्तेभ्यः
प्रतीयेताऽऽश्रितत्वात्प्रयोगस्य ॥ ४ ॥

३–२ अपूर्वस्यास्तित्वाधिकरणम्–२ ॥

चोदना पुनरारम्भः ॥ ५ ॥

२–१ कर्मणां गुणप्रधानभावविभागा०–३ ॥

तानि द्वैधं गुणप्रधानभूतानि ॥ ६ ॥
यैर्द्रव्यं न चिकीर्ष्यते तानि प्रधानभू-
तानि द्रव्यस्य गुणभूतत्वात् ॥ ७ ॥
यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रती-

येत तस्य द्रव्यप्रधानत्वात् ॥ ८ ॥

२ सम्मार्जनादीनामप्रधानता०--४ ॥

धर्ममात्रे तु कर्म स्यादनिर्वृत्तेः प्रयाजवत् ॥९॥ तुल्यश्रुतित्वाद्वेतरैः सधर्मः स्यात् ॥ १० ॥ द्रव्योपदेश इति चेत् ॥ ११ ॥ न तदर्थत्वाल्लोकवत्तस्य च शेषभूतत्वात् ॥ १२ ॥

२ स्तोत्रादिप्राधान्या०--५ ॥

स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवताभिधानत्वात् ॥१३॥ अर्थेन त्वपकृष्येत देवतानामचोदनार्थस्य गुणभूतत्वात्॥१४॥ वशावद्वा गुणार्थं

स्यात् ॥ १५ ॥ न श्रुतिसमवायि-
त्वात् ॥१६॥ व्यपदेशभेदाच्च॥१७॥
गुणश्चानर्थकः स्यात् ॥ १८ ॥ तथा
याज्यापुरोरुचोः ॥ १९ ॥ वशायाम-
र्थसमवायात् ॥ २० ॥ यच्चेति वा-
ऽर्थवत्त्वात् स्यात् ॥ २१॥ न त्वाम्ना-
तेषु ॥ २२ ॥ दृश्यते ॥ २३ ॥अपि
वा श्रुतिसंयोगात्प्रकरणे स्तौतिशं-
सती क्रियोत्पत्तिं विदध्याताम्॥२४॥
शब्दपृथक्त्वाच्च ॥ १५ ॥ अनर्थकं
च तद्वचनम् ॥ २६ ॥ अन्यश्चार्थः
प्रतीयते ॥ २७ ॥ अभिधानं च

कर्मवत् ॥ २८ ॥ फलनिर्वृत्तिश्च ॥ २९

२ मन्त्राविधायकत्वाधिकरणम्-६

विधिमन्त्रयोरैकार्थ्यमैकशब्द्यात् ॥ ३० ॥ अपि वा प्रयोगसामर्थ्यान्मन्त्रोऽभिधानवाची स्यात् ॥ ३१ ॥

२ मन्त्रनिर्वचना०-७ ॥

तच्चोदकेषु मन्त्राख्या ॥ ३२ ॥

२ ब्राह्मणनिर्वचना०-८ ॥

शेषे ब्राह्मणशब्दः ॥ ३३ ॥

१ ऊहाद्यमन्त्रता०-९ ॥

अनाम्नातेष्वमन्त्रत्वमाम्नातेषु विभागः ॥ ३४ ॥

० ऋग्लक्षणाधिकरणम्–१० ॥

तेषामृग्यत्रार्थवशेन पादव्यवस्था ॥ ३५ ॥

० सामलक्षणाधिकरणम्–११ ॥

गीतिषु सामाख्या ॥ ३६ ॥

१ यजुर्लक्षणाधिकरणम्–१२ ॥

शेषे यजुःशब्दः ॥ ३७ ॥

२ निगदानां यजुष्ट्वाधि०–१३ ॥

निगदो वा चतुर्थं स्याद्धर्मविशेषात् ॥ ३८ ॥ व्यपदेशाच्च ॥ ३९ ॥ यजूंषि वा तद्रूपत्वात् ॥ ४० ॥ वच-

नाद्धर्पविशेषः ॥ ४१ ॥ अर्थाच्च ॥ ॥ ४२ ॥ गुणार्थो व्यपदेशः ॥ ४३ ॥ सर्वेषामिति चेत् ॥ ४४ ॥ न ऋग्व्यपदेशात् ॥ ४५ ॥

२ एकवाक्यत्वलक्षणा०-१४ ॥

अर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यात् ॥ ४७ ॥

२ वाक्यभेदाधिकरणम्-१५ ॥

समेषु वाक्यभेदः स्यात् ॥ ४७ ॥

२-२ अनुषंगाधिक० १६-(१६-१७) ॥

अनुषंगो वाक्यसमाप्तिः सर्वेषु तुल्ययोगित्वात् ॥ ४८ ॥

२ व्यवेताननुषंगा०-१७-१८ ॥

व्यव(वा)यान्नानुषज्येत ॥ ४९ ॥
३८) ॥ (१७ वा १८) ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसा दर्शने द्वितीयस्याध्यायस्य (आख्यातबोध्यापूर्वतत्सद्भावयोर्निरूपणंनाम) प्रथमःपादः२-१॥

२-१ अंगाऽपूर्वभेदाधिकरणम्-१ ॥

शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात् ॥ १ ॥

२ समिदाद्यपूर्वभेदाधिकरणम्-२ ॥

एकस्यैवं पुनः श्रुतिरविशेषादनर्थकं हि

स्यात् ॥ २ ॥ प्रकरणं तु पौर्णमास
रूपावचनात् ॥ ३ ॥

९ आघाराद्याग्नेयादीनामंगाङ्गिभावा०-

विशेषदर्शनाच्च सर्वेषां समेषु ह्य
वृत्तिः स्यात्॥४॥ गुणस्तु श्रुतिसंय
गात् ॥ ५ ॥ चोदना वा गुणानां युग
पच्छास्त्राच्चोदिते हि तदर्थत्वात्त
तस्योपदिश्येत ॥ ६ ॥ व्यपदेश
तद्वत् ॥ ७ ॥ लिंगदर्शनाच्च ॥ ८

उपांशुयाजाऽपूर्वताधिकरणम्-४ ॥

पौर्णमासीवदुपांशुयाजः स्यात् ॥ ९

चोदना वाऽप्रकृतत्वात् ॥ १० ॥ गुणोपबन्धात् ॥ ११ ॥ प्राये वचनाच्च ॥ १२ ॥

२ आघाराद्यपूर्वताधिकरणम्—५ ॥

आघारेऽग्निहोत्रमरूपत्वात् ॥ १३ ॥ संज्ञोपबन्धात् ॥ १४ ॥ अप्रकृतत्वाच्च ॥ १५ ॥ चोदना वा शब्दार्थस्य प्रयोगभूतत्वात्तत्सन्निधेर्गुणार्थेन पुनः श्रुतिः ॥ १६ ॥

पशुसोमाऽपूर्वताधिकरणम्—६ ॥

द्रव्यसंयोगाच्चोदना पशुसोमयोः प्रकरणे ह्यनर्थको द्रव्यसंयोगो न हि

तस्य गुणार्थेन ॥ १७ ॥ अचोदकाश्च संस्काराः ॥ १८ ॥ तद्भेदात्कर्मणोऽभ्यासो द्रव्यपृथक्त्वादनर्थकं हि स्याद्भेदो द्रव्यगुणीभावात् ॥ १९ ॥ संस्कारस्तु न भिद्येत परार्थत्वाद्द्रव्यस्य गुणभूतत्वात् ॥ २१ ॥

५ संख्याकृतकर्मभेदाधिकरणम्-७ ॥

पृथक्त्वनिवेशात्संख्यया कर्मभेदः स्यात् ॥ २१ ॥

२ संज्ञाकृतकर्मभेदाधिकरणम्-८ ॥

संज्ञा चोत्पत्तिसंयोगात् ॥२२ ॥

२ देवताभेदकृतकर्मभेदाधिकरणम्—९ ॥

गुणश्चाऽपूर्वसंयोगे वाक्ययोः समत्वात् ॥ २३ ॥

१ द्रव्यविशेषानुक्तिकृतकर्मैक्या०—१०॥

अगुणे तु कर्मशब्दे गुणस्तत्र प्रतीयेत ॥ २४ ॥

दध्यादिद्रव्यसफलत्वा०—११ ॥

फलश्रुतेस्तु कर्म स्यात् फलस्य कर्मयोगित्वात् ॥ २५॥ अतुल्यत्वात्तु वाक्ययोर्गुणे तस्य प्रतीयेत ॥ २६ ॥

३ वारवन्तीयादीनां कर्मान्तरता०—१२॥

समेषु कर्मयुक्तं स्यात् ॥ २७ ॥

४ सौभरिनिधनयोः कामैक्या० १३ ॥

सोभरे पुरुषश्रुतेर्निधनं कामसंयोगः ॥ २८ ॥ सर्वस्य वोक्तकामत्वात्तस्मिन्कामश्रुतिः स्यान्निधनार्था पुनः श्रुतिः ॥२९॥ (३८) (१३) ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने द्वितीयस्याध्यायस्य (धातुभेदपुनरुक्त्यादिना कर्मभेदनिरूपणं नाम) द्वितीयः पादः ॥ २ ॥ ॥ २ ॥

---

३ ग्रहाग्रताया ज्योतिष्टोमाङ्गता०—१ ॥

गुणस्तु क्रतुसंयोगात्कर्मान्तरं प्रयोजयेत्संयोगस्याशेषभूतत्वात् ॥ १ ॥ एकस्य तु लिंगभेदात्प्रयोजनार्थ-

मुच्येतैकत्वं गुणवाक्यत्वात् ॥ २ ॥

३ अवेष्टेः क्रत्वन्तरताधिकारताधि०–२॥

अवेष्टौ यज्ञसंयोगात्क्रतुप्रधानमुच्यते ॥ ३ ॥

३ आधानस्य विधेयत्वाधि०–३ ॥

आधाने सर्वशेषत्वात् ॥ ४ ॥

२ दाक्षायणादीनां गुणताधि०–४ ॥

अयनेषु चोदनान्तरं संज्ञोपबन्धात् ॥ ५ ॥ अगुणाच्च कर्मचोदना ॥ ६॥ समाप्तं च फले वाक्यम् ॥७॥ विकारो वा प्रकरणात् ॥८ ॥ लिङ्गदर्शनाच्च ॥ ९ ॥ गुणात्संज्ञोपबन्धः ॥ १० ॥ समाप्तिरविशिष्टा ॥ ११ ॥

४ द्रव्यदेवतायुक्तानां यागान्तरता०-५॥

संस्कारश्चाप्रकरणेऽकर्मशब्दत्वात् ॥ १२ ॥ यावदुक्तं वा कर्मणः श्रुतिमूलत्वात् ॥ १३ ॥ यजतिस्तु द्रव्यफलभोक्तृसंयोगादेतेषां कर्मसम्बन्धात् ॥ १४ ॥ लिंगदर्शनाच्च ॥१५॥

१ वत्सालम्भादीनां संस्कारताधि०-६ ॥

विशये प्रायदर्शनात्॥१६॥ अर्थवादोपपत्तेश्च ॥ १७ ॥

२ नैवारचरोराधानार्थताधि०-७॥

संयुक्तस्त्वर्थशब्देन तदर्थः श्रुतिसंयोगात् ॥ १८ ॥

३ पात्नीवतस्यपर्यग्निकरणगुणकत्वाधि०–८

पात्नीवते तु पूर्वत्वादवच्छेदः ॥१९॥

२ अदाभ्यादीनां ग्रहनामताधि०–९ ॥

अद्रव्यत्वात्केवले कर्मशेषः स्यात् ॥ २० ॥

२ अग्निचयनस्य संस्कारताधि०–१०॥

अग्निस्तु लिंगदर्शनात्क्रतुशब्दः प्रतीयेत ॥ २१ ॥ द्रव्यं वा स्याच्चोदनायास्तदर्थत्वात् ॥ २२ ॥ तत्संयोगात्क्रतुस्तदाख्यः स्यात्तेन धर्मविधानानि ॥ २३ ॥

२ मासाग्निहोत्रादीनां क्रत्वन्तरताधि०–११॥

प्रकरणान्तरे प्रयोजनान्यत्वम् ॥२४

२ आग्नेयादिकाम्येष्टयाधि०-१२ ॥

फलं चाकर्मसन्निधौ ॥ २५ ॥

३ अवेष्टेरन्नाद्यफलकत्वाधि०-१३ ॥

सन्निधौ त्वविभागात्फलार्थेन पुनः श्रुतिः ॥ २६ ॥

२ आग्नेयद्विरुक्तेः स्तुत्यर्थताधि०-१४ ॥

आग्नेयसूक्तहेतुत्वादभ्यासेन प्रतीयेत ॥ २७ ॥ अविभागात्तु कर्मणां द्विरुक्तेर्न विधीयते ॥ २८ ॥ अन्यार्था वा पुनः श्रुतिः ॥२९॥ (१४)॥३४॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने द्वितीयस्याऽध्यायस्य (रथन्तरादीनां कर्मभेदप्रामाण्यापवादत्वनिरूपणं नाम) तृतीयः पादः ॥ २ ॥ ३ ॥

२ यावज्जीविकाग्निहोत्राधि०—१॥

यावज्जीविकोऽभ्यासः कर्मधर्मः प्रकरणात् ॥ १ ॥ कर्तुर्वा श्रुतिसंयोगात् ॥ २ ॥ लिङ्गदर्शनाच्च कर्मधर्मे हि प्रक्रमेण नियम्येत तत्रानर्थकमन्यत्स्यात् ॥ ३ ॥ व्यपवर्गं च दर्शयति कालश्चेत्कर्मभेदः स्यात् ॥४॥ अनित्यत्वात्तु नैवं स्यात्॥५॥ विरोधश्चापि पूर्ववत् ॥ ६ ॥ कर्तुस्तु धर्मनियमात् कालशास्त्रं निमित्तं स्यात् ॥ ७ ॥

२ सर्वशाखाप्रत्ययैककर्मता०–२ ॥

नामरूपधर्मविशेषपुनरुक्तिनिन्द
ऽशक्तिसमाप्तिवचनप्रायश्चित्ताऽन्यार्थ
दर्शनाच्छाखान्तरेषु कर्मभेदः स्यात
॥ ८ ॥ एकं वा संयोगरूपचोदना
ख्याविशेषात ॥ ९ ॥ न नाम्ना
स्यादचोदनाभिधानत्वात् ॥ १० ॥
सर्वेषां चैककर्म्यं स्यात्॥११॥कृतकं
चाभिधानम् ॥१२॥ एकत्वेऽपि परम्
॥१३॥ विद्यायां धर्मशास्त्रम् ॥१४॥
आग्नेयवत्पुनर्वचनम् ॥ १५ ॥ अद्वि-
र्वचनं वा श्रुतिसंयोगाविशेषात्॥१६॥

अर्थासन्निधेश्च ॥ १७ ॥ न चैकं प्रति शिष्यते ॥ १८ ॥ समाप्तिवच्च संप्रेक्षा ॥ १९ ॥ एकत्वेऽपि पराणि निन्दाशक्तिसमाप्तिवचनानि ॥ २० ॥ प्रायश्चित्तं निमित्तेन ॥ २१ ॥ प्रक्रमाद्वा नियोगेन ॥ २२ ॥ समाप्तिः पूर्ववत्त्वाद्यथाज्ञाते प्रतीयेत ॥ २३ ॥ लिङ्गमविशिष्टं सर्वशेषत्वान्न हि तत्र कर्मचोदना तस्माद्द्वादशाहस्याहारव्यपदेशः स्यात् ॥ २४ ॥ द्रव्ये चाचोदितत्वाद्विधीनामव्यवस्था स्यान्निर्देशाद्व्यवतिष्ठेत तस्मान्नित्यानुवादः स्यात् ॥ २५ ॥ विहितप्रतिषेधात् पक्षेऽतिरेकः

स्यात् ॥ २६ ॥ सारस्वते विप्र
तिषेधाद्यदेति स्यात् ॥ २७ ॥
उपहव्येऽप्रतिप्रसवः ॥ २८ ॥ गुणा
र्थां वा पुनः श्रुतिः ॥ २९ ॥ प्रत्ययं
चापि दर्शयति ॥ ३० ॥ अपि
वा क्रमसंयोगाद्विधिपृथक्त्वमेकस्यां
व्यवतिष्ठेत ॥ ३१ ॥ विरोधिना त्वसं-
योगादैककर्म्ये तत्संयोगाद्विधीनां सर्व-
कर्मप्रत्ययः स्यात् ॥ ३२ ॥ (२) ॥ ४ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमां-
सादर्शने द्वितीयस्याध्यायस्य (नित्यकाम्यप्र-
योगयोर्भेदनिरूपणं नाम) चतुर्थः पादः ॥ २॥
॥ ४ ॥ समाप्तौ द्वितीयोऽध्यायः ॥ २ ॥

अथ तृतीयोऽध्यायः ।

तत्र प्रयाजादीनां दर्शपूर्णमासाद्यर्थत्वेन
तच्छेषत्वमिति (कर्मभेदे शेषशेषिभावः)
निरूप्यते–

२ प्रतिज्ञाधिकरणम्–१ ॥

अथातः शेषलक्षणम् ॥ १ ॥

१ शेषलक्षणाधिकरणम्–२ ॥

शेषः परार्थत्वात् ॥ २ ॥

२ शेषलक्ष्याधिकरणम्–३ ॥

द्रव्यगुणसंस्कारेषु बादरिः ॥ ३ ॥ कर्माण्यपि जैमिनिः फलार्थत्वात् ॥ ४ ॥ फलं च पुरुषार्थत्वात् ॥५॥ पुरुषश्च कर्मार्थत्वात् ॥ ६ ॥

२ निर्वपणादीना व्यवस्थितविषयत्वा०–४

तेषामर्थेन संबन्धः ॥ ७ ॥ विहितस्तु सर्वधर्मः स्यात् संयोगतोऽविशेषात्प्रकरणाविशेषाच्च ॥ ८ ॥ अर्थलोपादकर्म स्यात् ॥ ९ ॥ फलं तु सह चेष्टया शब्दार्थोऽभावाद्विप्रयोगे स्यात् ॥ १० ॥

२ स्फ्यादीनां संयोगानुसारेण व्यवस्थितत्वाधिकरणम्–५ ॥

द्रव्यं चोत्पत्तिसंयोगात्तदर्थमेव चोद्येत ॥ ११ ॥

२ आरुण्यादीनां गुणानामसंकीर्णता० वा
अरुणाधिकरणम्–६ ॥

अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नि-
यमः स्यात् ॥ १२ ॥

२ ग्रहसंमार्जना०–वाग्रहैकत्वन्याया०–७॥

एकत्वयुक्तमेकस्य श्रुतिसंयोगात्
॥ १३ ॥ सर्वेषां वा लक्षणत्वादवि-
शिष्टं हि लक्षणम् ॥ १४ ॥ चोदिते
तु परार्थत्वाद्यथाश्रुति प्रतीयेत १५॥

२ चमसादौ संमार्गाद्यप्रयोगा०–८ ॥

संस्काराद्वा गुणानामव्यवस्था
स्यात् ॥ १६ ॥ व्यवस्था वाऽर्थस्य

श्रुतिसंयोगात् तस्य शब्दप्रमाण-
त्वात् ॥ १७ ॥

३ सप्तदशारात्नतीयाः पशुधर्मता०—९ ॥

आनर्थक्यात्तदंगेषु ॥ १८ ॥

३+२ अभिक्रमणादीनां प्रयाजमात्राङ्गता-
धिकरणम्—१० ॥

कर्तृगुणे तु कर्मासमवायाद्वाक्य-
भेदः स्यात् ॥ १९ ॥ साकांक्षं
त्वेकवाक्यं स्यादसमाप्तं हि पूर्वेण २० ॥

२ उपवीतस्य प्राकरणिकाङ्गता ०—११ ॥

सन्दिग्धे तु व्यवायाद्वाक्यभेदः
स्यात् ॥ २१ ॥

२ गुणानां मिथोऽसम्बन्धा०–१२ ॥

गुणानां च परार्थत्वादसम्बन्धः समत्वात्स्यात् ॥ २२ ॥

३ वार्त्रघ्न्यधिकरणम्–१३ ॥

मिथश्चानर्थसम्बन्धात् ॥ २३ ॥

२ हस्तावनेजनादीनां कृत्स्नप्राकरणिकाङ्गताधिकरणम्–१४ ॥

आनन्तर्यमचोदना ॥ २४ ॥

वाक्यानां च समाप्तत्वात् ॥ २५ ॥

३ चतुर्द्धाकरणादीनामाग्नेयमात्राङ्गता०–१५ ॥

शेषस्तु गुणसंयुक्तः साधारणः प्रतीयेत मिथस्तेषामसम्बन्धात् ॥ २६ ॥

व्यवस्था वाऽर्थसंयोगाल्लिङ्गस्यार्थेन

सम्बन्धाल्लक्षणार्था गुणश्रुतिः ॥२७॥ (१८) ॥ ३८ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने तृतीयस्याऽध्यायस्य (शेषत्वबोधकानां श्रुतिलिंगादीनां विचारो नाम) प्रथमः पादः ॥ ॥ ३ ॥ १ ॥

---

२ मुख्ये विनियोगा० वाबर्हिन्याया०—१॥

अर्थाभिधानसामर्थ्यान्मन्त्रेषु शेषभावः स्यात्तस्मादुत्पत्तिसम्बन्धोऽर्थेन नित्यसंयोगात् ॥१॥ संस्कारकत्वादचोदितेन स्यात् ॥ २ ॥

२ ऐन्द्र्या गार्हपत्ये विनियोगा० वा ऐन्द्री-
न्यायाधिकरणम्—२ ॥

वचनात्त्वयथार्थमैन्द्री स्यात् ॥ ३ ॥
गुणाद्वाऽप्यभिधानं स्यात्सम्बन्धस्या-
शास्त्रहेतुत्वात् ॥ ४ ॥

४ आह्वानविनियोगाधिकरणम्—३ ॥

तथाह्वानमपीति चेत् ॥ ५ ॥ न
कालविधिश्चोदितत्वात् ॥ ६ ॥ गुणा-
भावात् ॥ ७ ॥ लिङ्गाच्च ॥ ८ ॥ वि-
धिकोपश्चोपदेशे स्यात् ॥ ९ ॥

३ अग्निविहरणादिप्रकाशकमन्त्राविनि-
योगाधिकरणम्—४ ॥

तथोत्थानविसर्जने ॥ १० ॥

२ सूक्तवाकस्य प्रस्तरप्रहरणांगता० वा प्र-
स्तरप्रहरणन्यायाधिकरणम्-५ ॥

सूक्तवाके च कालविधिः परार्थ-
त्वात् ॥ ११ ॥ उपदेशो वा याज्या-
शब्दो हि नाकस्मात् ॥ १२ ॥ स
देवतार्थस्तत्संयोगात् ॥ १३ ॥ प्रति-
पत्तिरिति चेत्स्विष्टकृद्वदुभयसंस्कारः
स्यात् ॥ १४ ॥

२ सूक्तवाकानामर्थानुसारेण विनियोगा०वा-
सूक्तवाकन्यायाधिकरणम्-६ ॥

कृत्स्नोपदेशादुभयत्र सर्ववच-
नम् ॥ १५ ॥ यथार्थं वा शेषभूतसंस्का-

त्॥१६॥ वचनादीति चेत् ॥१७॥
करणाविभागादुभे प्राति कृत्स्न-
शब्दः ॥ १८ ॥

२ काम्ययाज्यानुवाक्यानां काम्यमात्रा-
ङ्गताधिकरणम्–७ ॥

लिंगक्रमसमाख्यानात्काम्ययुक्तं
समाम्नानम् ॥ १९ ॥

२ आग्नीध्रोपस्थाने प्राकृतमन्त्राविनि-
योगाधिकरणम्–८॥

अधिकारे च मन्त्रविधिस्तदाख्येषु
शिष्टत्वात् ॥२० ॥ तदाख्योवा प्रक-
रणोपपत्तिभ्याम् ॥ २१ ॥ अनर्थक-

श्चोपदेशः स्यादसम्बन्धात्फलवत्
(न ह्युपस्थानं फलवत्) ॥ २२ ॥
सर्वेषां चोपदिष्टत्वात् ॥ २३ ॥

२ भक्षमन्त्राणां यथालिङ्गं ग्रहणादौ विनियोगाधिकरणम्—९ ॥

लिंगसमाख्यानाभ्यां भक्षार्थताऽनुवाकस्य ॥२४॥ तस्य रूपोपदेशाभ्यामपकर्षोऽर्थस्य चोदितत्वात्२५॥

२ मन्द्राभिभूतिरित्यादेरेकमन्त्रता—१० ॥

गुणाभिधानान्मन्द्रादिरेकमन्त्रः स्यात्तयोरेकार्थसंयोगात् ॥ २६ ॥

---

१ इदमधिकृतया पठ्यते क्वचित् ॥

३ इन्द्रपीताधिकरणम्—११ ॥

लिङ्गविशेषनिर्देशात्समानविधानेष्वैन्द्राणाममन्त्रत्वम् ।२७।यथादेवतं वा तत्प्रकृतित्वं हि दर्शयति ॥२८ ॥

३ अभ्युन्नीतसोमभक्षणाधि०—१२ ॥

पुनरभ्युन्नीतेषु सर्वेषामुपलक्षणं द्विशेषत्वात् ॥ २९ ॥ अपनयाद्वा पूर्वस्याऽनुपलक्षणम् ॥३०॥ ग्रहणाद्वाऽपनयः स्यात् ॥ ३१ ॥

३ पात्नीवतभक्षणे इन्द्रादीनामनुपलक्षणाधिकरणम्—१३ ॥

पात्नीवते तु पूर्ववत् ॥ ३२ ॥ग्रहणाद्वाऽपनीतं स्यात् ॥ ३३ ॥

२ पात्नीवतशेषभक्षणे त्वष्टुरनुपलक्षणीयताधिकरणम्-१४ ॥

त्वष्टारं तूपलक्षयेत्पानात् ॥३४॥

अतुल्यत्वात्तु नैवं स्यात् ॥ ३५ ॥

२ पात्नीवतभक्षे त्रिंशतामनुपलक्षणाधिकरणम्-१५ ॥

त्रिंशच्च परार्थत्वात् ॥ ३६ ॥

२ भक्षणेऽनुवषट्कारदेवताया अनुपलक्षणाधिरकणम्-१६ ॥

वषट्कारश्च कर्तृवत् ॥ ३७ ॥

२ अनैन्द्राणाममन्त्रकभक्षणा०वा-कृत्वाचिन्तान्यायाधिकरणम्-१७ ॥

छन्दःप्रतिषेधस्तु सर्वगामित्वात् ॥ ३८ ॥

२ ऐन्द्राग्नभक्षस्यामन्त्रकता०–१८ ॥

ऐन्द्राग्ने तु लिङ्गभावात्स्यात् ॥ ॥ ३९ ॥ एकस्मिन्वा देवतान्तराद्विभागवत् ॥ ४० ॥

३ गायत्रच्छन्दस इत्यादिमन्त्रविनियोगाधिकरणम्–१९ ॥

छन्दश्च देवतावत् ॥ ४१ ॥ सर्वेषु वाऽभावादेकच्छन्दसः ॥ ४२॥ सर्वेषां वैकमंत्र्यमैतिशायनस्य भक्तिपानत्वात्सवनाधिकारो हि ॥ ४३ ॥ (१९) ॥ ४६ ॥

इति श्रीमैज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसा-

दर्शने तृतीयस्याऽध्यायस्य (शेषत्वबोधकनां श्रुतिलिङ्गादीनां मध्ये लिङ्गविचारो नाम द्वितीयः पादः ॥ ३ ॥ २ ॥

---

३ उच्चैष्ट्वादीनां वेदधर्मताधि०-१ ॥

श्रुतेर्जाताधिकारः स्यात् ॥ १ ॥ वेदो वा प्रायदर्शनात् ॥ २ ॥ लिङ्गाच्च ॥ ३ ॥ धर्मोपदेशाच्च न हि द्रव्येण सम्बन्धः ॥ ४ ॥ त्रयीविद्याख्या च तद्विदि ॥ ५ ॥ व्यतिक्रमे यथाश्रुतीति चेत् ॥ ६ ॥ न सर्वस्मिन्निवेशात् ॥ ७ ॥ वेदसंयोगान्न प्रकरणेन बाध्येत ॥ ८ ॥

३ आधाने गानस्योपांशुताधि ०-२ ॥

गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः ॥ ९ ॥

२ ज्योतिष्टोमस्य याजुर्वेदिकता०-३ ॥

भूयस्त्वेनोभयश्रुति ॥ १० ॥

२ प्रकरणस्य विनियोजकता०-४ ॥

असंयुक्तं प्रकरणादिकर्त्तव्यतार्थित्वात् ॥ ११ ॥

४ क्रमस्य विनियोजकत्वा ०-५ ॥

क्रमश्च देशसामान्यात् ॥ १२ ॥

२ समाख्याया विनियोजकत्वा०-६ ॥

आख्या चैवं तदर्थत्वात् ॥ १३॥

३ +३+२+२+२+२ श्रुति-लिङ्ग-वाक
प्रकरण-स्थान-समाख्यानां पूर्वपूर्वबली
स्त्वा० ७-८-९-१०-११-१२ ॥

श्रुति-लिंग-वाक्य-प्रकरण-स्थान-समाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् ॥ १४ ॥

३ द्वादशोपसत्ताया अहीनाङ्गता०-१३ ॥

अहीनो वा प्रकरणाद्गौणः ॥ १५ ॥

असंयोगात्तु मुख्यस्य तस्मादपकृष्येत ॥ १६ ॥

३ कुलायादौ प्रतिपदोरुत्कर्षा०-१४ ॥

द्वित्वबहुत्वयुक्तं वा चोदनात्तस्य १७ ॥

पक्षेणार्थकृतस्येति चेत् ॥ १८ ॥ न-प्रकृतेरेकसंयोगात् ॥ १९ ॥

२ जाघन्या अनुत्कर्षाधि०—१५ ॥

जाघनी चैकदेशत्वात् ॥ २० ॥ चोदना वाऽपूर्वत्वात् ॥ २१ ॥ एक-देश इति चेत् ॥ २२ ॥ न प्रकृते-रशास्त्रनिष्पत्तेः ॥२३ ॥

२ संतर्दनस्य संस्थानिवेशा०—१६ ॥

सन्तर्दनं प्रकृतौ क्रयणवदनर्थलो-पात्स्यात् ॥ २४ ॥ उत्कर्षो वा ग्रह-णाद्विशेषस्य ॥ २५ ॥ कर्तृतो वा विशेषस्य तन्निमित्तत्वात् ॥ २६ ॥

क्रतुतो वाऽर्थवादानुपपत्तेः स्या
॥ २७ ॥ संस्थाश्च कर्तृवद्धारणार्था
विशेषात् ॥ २८ ॥ उक्थ्यादिषु वा
ऽर्थस्य विद्यमानत्वात् ॥ २९ ॥ अ-
विशेषात्स्तुतिर्व्यर्थेति चेत् ॥ ३० ॥
स्यादनित्यत्वात् ॥ ३१ ॥

२ प्रवर्ग्यनिषेधा०-१७ ॥

सङ्ख्यायुक्तं क्रतोः प्रकरणात्स्या-
त् ॥ ३२ ॥ नैमित्तिकं वा कर्तृसं-
योगाल्लिंगस्य तन्निमित्तत्वात् ॥ ३३ ॥

२ पौष्णपेषणस्य विकृतौ विनियोगा-
धिकरणम्-१८ ॥

पौष्णं पेषणं विकृतौ प्रतीयेताऽ-

चोदनात्प्रकृतौ ॥ ३४ ॥

२पौष्णपेषणस्य चरावेव निवेशाधि०–१९॥

तत्सर्वार्थमविशेषात् ॥३५॥ चरौ वाऽर्थोक्तं पुरोडाशेऽर्थविप्रतिषेधात् पशौ न स्यात् ॥ ३६ ॥ चरावपीति चेत् ॥३७॥ न पक्तिनामत्वात् ॥३८॥

२ पौष्णपेषणस्यैकदेवत्ये निवेशा०–२०॥

एकस्मिन्नेकसंयोगात् ॥ ३९ ॥ धर्माविप्रतिषेधाच्च ॥ ४० ॥ अपि वा सद्वितीये स्याद्देवतानिमित्तत्वात् ॥ ४१ ॥ लिंगदर्शनाच्च ॥ ४२ ॥

वचनात्सर्वपेषणं तं प्रति शास्त्रव त्त्वादर्थाभावाद्विचरावपेषणं भवति ॥ ४३ ॥ एकस्मिन्वाऽर्थधर्मत्वादै न्द्राग्नवदुभयोर्न स्यादचोदितत्वात् ॥४४॥ हेतुमात्रमदन्तत्वम् ॥ ४५ ॥ वचनं परम् ॥४६॥(२०) ॥४८ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने तृतीयस्याऽध्यायस्य (शेषत्वबोधकश्रुत्यादीनां मध्ये वाक्यप्रकरणादिविचारो नाम) तृतीयः पादः॥ ३ ॥ ३ ॥

---

२ निवीतस्यार्थवादत्वा०--१॥

निवीतमिति मनुष्यधर्मः शब्दस्य तत्प्रधानत्वात् ॥ १ ॥ अपदेशो वाऽ-

र्थस्य विद्यमानत्वात् ॥ २ ॥ विधिस्त्वपूर्वत्वात्स्यात् ॥ ३ ॥ स प्रायात्कर्मधर्मः स्यात् ॥ ४ ॥ वाक्यशेषत्वात् ॥ ५ ॥ तत्प्रकरणे यत्तत्संयुक्तमविप्रतिषेधात् ॥ ६ ॥ तत्प्रधाने वा तुल्यवत्प्रसंख्यानादितरस्य तदर्थत्वात् ॥ ७ ॥ अर्थवादो वा प्रकरणात् ॥८॥ विधिना चैकवाक्यत्वात् ॥९॥

उपवीतस्य दर्शपूर्णमासाङ्गता०–२ ॥

उपवीतं लिंगदर्शनात्सर्वधर्मः स्यात् ॥ १० ॥ न वा प्रकरणात्तस्य दर्शनम् ॥ ११ ॥

१ उपवीतस्य विधित्वाधिका०–३ ॥

विधिर्वा स्यादपूर्वत्वात् ॥ १२ ॥

२ उपवीतोदगग्रत्वयोरनुवादताधि०–४॥

उदक्त्वं चापूर्वत्वात् ॥ १३ ॥

सतो वा लिंगदर्शनम् ॥ १४ ॥

२ समिद्धारणस्य विधिताधि०–५ ॥

विधिस्तु धारणेऽपूर्वत्वात् ॥ १५॥

२ दिग्विभागस्यार्थवादताधि०–६ ॥

दिग्विभागश्च तद्वत्सम्बन्धास्यार्थहेतुत्वात् ॥ १६ ॥

२ परुषि दितादीनामनुवादता०–७ ॥

परुषि दितपूर्णघृतविदग्धं च तद्वत्॥ १७ ॥

२ अनृतवदननिषेधस्य क्रतुधर्मता०–८ ॥

अकर्म क्रतुसंयुक्तं संयोगान्नित्यानुवादः स्यात् ॥ १८ ॥ विधिर्वा संयोगान्तरात् ॥ १९ ॥

१ जञ्जभ्यमानधर्माणां प्रकरणे निवेशाधिकरणम्–९ ॥

अहीनवत्पुरुषस्तदर्थत्वात् ॥ २० ॥ प्रकरणविशेषाद्वा तद्युक्तस्य संस्कारो द्रव्यवत् ॥ २१ ॥ व्यपदेशादपकृष्येत ॥ २२ ॥

२ अवगोरणादीनां पुमर्थता०–१० ॥

शंयौ च सर्वपरिदानात् ॥ २३ ॥

१ मलवद्वासस्संवादनिषेधाधि०—११ ॥

प्रागपरोधान्मलवद्वाससः ॥२४॥
अन्नप्रतिषेधाच्च ॥ २५ ॥

३ सुवर्णधारणादीनां पुरुषधर्मता०—१२ ॥

अप्रकरणे तु तद्धर्मस्ततो विशेषात् ॥ २६ ॥ अद्रव्यत्वात्तु शेषः स्यात् ॥ २७ ॥ वेदसंयोगात् ॥२८॥ द्रव्यसंयोगाच्च ॥ २९ ॥ स्याद्वाऽस्य संयोगवत्फलेन सम्बन्धस्तस्मात्कर्मैतिशायनः ॥ ३० ॥

२ जयादीनां वैदिककर्मांगताधि०—१३॥

शेषाः प्रकरणेऽविशेषात्सर्वकर्म-

णाम् ॥ ३१ ॥ होमास्तु व्यवतिष्ठे-
रन्नाहवनीयसंयोगात् ॥ ३२ ॥ शेष-
श्च समाख्यानात् ॥ ३३ ॥

३ वैदिकाश्वप्रतिग्रहे इष्टिकर्तव्यता०—१४॥

दोषात्त्विष्टिर्लौकिके स्याच्छास्त्रा-
द्धि वैदिके न दोषः स्यात् ॥ ३४ ॥
अर्थवादो वाऽनुपपातात्तस्माद्यज्ञे प्र-
तीयेत ॥ ३५ ॥

२ अश्वदातुर्वारुणीष्ट्यधि०—१५ ॥

अचोदितं च कर्मभेदात् ॥ ३६ ॥
सा लिंगादार्त्विजे स्यात् ॥ ३७ ॥

२ वैदिकसोमपानव्यापदधि०—१६ ॥

पानव्यापच्च तद्वत् ॥ ३८ ॥ दो-

षात्तु वैदिके स्यादर्थाद्धि लौकिके न दोषः स्यात् ॥ ३९ ॥

१ सौमेन्द्रचरोर्यजमानपानव्यापद्विषयताधिकरणम्-१७ ॥

तत्सर्वत्राविशेषात् ॥ ४० ॥ स्वामिनो वा तदर्थत्वात् ॥ ४१ ॥ लिंगदर्शनाच्च ॥ ४२ ॥

१ आग्नेयाष्टाकपालचरोर्द्व्यवदानमात्रस्य होतव्यताधिकरणम्०-१८ ॥

सर्वप्रदानं हविषस्तदर्थत्वात् ॥ ४३ ॥ निरवदानात्तु शेषः स्यात् ॥ ४४ ॥ उपायो वा तदर्थत्वात् ॥ ४५ ॥

कृतत्वात्तु कर्मणः सकृत्स्याद्द्रव्यस्य गुणभूतत्वात् ॥ ४६ ॥ शेषदर्शनाच्च ॥ ४७ ॥

२ सर्वशेषैः स्विष्टकृदनुष्ठानाधि०-- १९ ॥

अप्रयोजकत्वादेकस्मात्क्रियेरञ्छेषस्य गुणभूतत्वात् ॥ ४८ ॥ संस्कृतत्वाच्च ॥ ४९ ॥ सर्वेभ्यो वा कारणाविशेषात्संस्कारस्य तदर्थत्वात् ॥ ५० ॥ लिंगदर्शनाच्च ॥ ५१ ॥

१ प्राथमिकशेषात्स्विष्टकृदनुष्ठानाधि०--२०॥

एकस्माच्चेद्याथाकाम्यमविशेषात् ॥ ५२ ॥ मुख्याद्वापूर्वकालत्वात् ॥ ५३ ॥

२ पुरोडाशविभागस्य भक्षार्थताधि०—२१॥

भक्षाश्रवणाद्दानशब्दः परिक्रये॥५४॥ तत्संस्तवाच्च ॥ ५५ ॥ भक्षार्थो वा द्रव्ये समत्वात् ॥ ५६ ॥ व्यादेशाद्दानसंस्तुतिः ॥५[१]७॥(२१)॥३८॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने तृतीयस्याध्यायस्य (निवीतोपवीतादिष्वर्थवादविधित्वादिनिर्णयहेतुकः श्रुत्यादीनां परस्परविरोधसदसद्भावविचारो नाम) चतुर्थः पादः ॥ ३ ॥ ४ ॥

---

(१) अत्र पादे रामेश्वरपादविरचितसुबोधिन्याख्यवृत्त्या सह काश्यां संवत् १९५६ में मुद्रितपुस्तके दशमसूत्रमारभ्य पञ्चदशसंख्याक सूत्रपर्यन्तं सूत्रषट्कं भाष्ये नास्तीत्युक्तम् । अत्रत्वस्तीतितदपेक्षया संख्याधिक्यं सूत्रगणनायाम् ॥

२ ध्रुवाज्यादिभिः स्विष्टकृदादिशेषाननुष्ठानाधिकरणम्-- १ ॥

आज्याच्च सर्वसंयोगात् ॥ १ ॥ कारणाच्च ॥ २ ॥ एकस्मिन्त्समवत्तशब्दात् ॥ ३ ॥ आज्ये च दर्शनात् स्विष्टकृदर्थवादस्य ॥ ४ ॥ अशेषत्वात्तु नैवं स्यात्सर्वादानादशेषता॥५॥ साधारण्यान्न ध्रुवायां स्यात् ॥ ६ ॥ अक्तत्वाच्चं जुह्वां तस्य च होमसंयोगात् ॥७ ॥ चमसवदिति चेत् ॥८॥

(१) अवत्तत्वाच्चेतिकाचित्पाठः ।

न चोदनाविरोधाद्धविःप्रकल्पन
॥ ९ ॥ उत्पन्नाधिकारात्सति सर्वव
नम् ॥ १० ॥ जातिविशेषात्पर
॥ ११ ॥ अन्त्यमरेकार्थे ॥ १२ ॥
२साकं प्रस्थाय्ये शेषकर्माननुष्ठानाधि०-
साकम्प्रस्थाय्ये स्विष्टकृदादि
तद्वत् ॥ १३ ॥
१ सौत्रामण्यां शेषकर्माननुष्ठानाधि०-
सौत्रामण्यां च ग्रहेषु ॥ १४
तद्वच्च शेषवचनम् ॥ १५ ॥
२ सर्वपृष्टेष्टौ स्विष्टकृदिडादीनां स
नुष्ठानाधिकरणम्-४ ॥
द्रव्यैकत्वे कर्मभेदात्प्रतिकर्म क्रि

न् ॥ १६ ॥ अविभागाच्च शेषस्य
सर्वान्प्रत्यविशिष्टत्वात् ॥ १७ ॥

१ ऐन्द्रवायवग्रहे द्विश्शेषभक्षणाधि०—५ ॥

ऐन्द्रवायवे तु वचनात्प्रतिकर्म भक्ष
स्यात् ॥ १८ ॥

१ सोमे शेषभक्षणाधिकरणम्—६ ॥

सोमेऽवचनाद्भक्षो न विद्यते ॥ १९ ॥
स्याद्वाऽन्यार्थदर्शनात् ॥ २० ॥ वचना-
नि त्वपूर्वत्वात्तस्माद्यथोपदेशं स्युः २१

१ चमसिनां शेषभक्षाधिकरणम्—७ ॥

चमसेषु समाख्यानात्संयोगस्य त-
न्निमित्तत्वात् ॥ २२ ॥

३ उद्गातॄणां सह सुब्रह्मण्येन भक्षा०-८।

उद्गातृचमसमेकः श्रुतिसंयोगात् ॥ २३॥ सर्वे वा सर्वसंयोगात् ॥ २४॥ स्तोत्रकारिणां वा तत्संयोगाद्बहुश्रुतेः ॥ २५ ॥ सर्वे तु वेदसंयोगात्कारणादेकदेशे स्यात् ॥ २६ ॥

२ ग्रावस्तुतोपि सोमभक्षणाधि०-९ ॥

ग्रावस्तुतो भक्षो न विद्यतेऽनाम्नानात् ॥ २७ ॥ हारियोजने वा सर्वसंयोगात् ॥ २८ ॥ चमसिनां वा सान्निधानात् ॥ २९ ॥ सर्वेषां तु विधित्वात्तदर्था चमसिश्रुतिः ॥ ३० ॥

२ वषट्करणस्य भक्षनिमित्तताधि०-१०॥

वषट्काराच्च भक्षयेत् ॥ ३१ ॥

२ होमाभिषवयोर्भक्षनिमित्तताधि०-११ ॥

होमाऽभिषवाभ्यां च ॥ ३२ ॥

२ वषट्कर्त्रादीनां चमसे सोमभक्षा०-१२॥

प्रत्यक्षोपदेशाच्चमसानामव्यक्तः शेषे ॥ ३३ ॥ स्याद्वा कारणभावादनिर्देशश्चमसानां कर्तुस्तद्वचनत्वात् ॥ ३४ ॥ चमसे चान्यदर्शनात् ॥ ३५ ॥

२ होतुः प्रथमभक्षाधिकरणम्-१३ ॥

एकपात्रे क्रमादध्वर्युः पूर्वो भक्षयेत् ॥ ३६ ॥ होता वा मन्त्रवर्णात् ॥ ३७ ॥

वचनाच्च ॥ ३८ ॥ कारणानु पूर्व्याच्च ॥ ३९ ॥

२ भक्षस्यानुज्ञापूर्वकत्वाधि०-१४॥

वचनादनुज्ञातभक्षणम् ॥ ४० ॥

१ वैदिकवचनेनानुज्ञापनाधि०-१५ ॥

तदुपहूत उपह्वयस्वेत्यनेनानुज्ञा पयेल्लिङ्गात् ॥ ४१ ॥

२ वैदिकवाक्येन प्रतिवचनाधि०-१६ ॥

तत्रार्थात्प्रतिवचनम् ॥ ४२ ॥

१ एकपात्राणामनुज्ञापनाधि०-१७ ॥

तदेकपात्राणां समवायात् ॥४३॥

---

(१) उपहूयस्वेति क्वचित्पाठः ।

२ स्वयं यष्टुर्भक्षास्तित्वाधि०—१८ ॥

याज्यापनयेनापनीतो भक्षः प्रवरवत् ॥ ४४ ॥ यष्टुर्वा कारणागमात् ॥ ४५ ॥ प्रवृत्तत्वात्प्रवरस्यानपायः ॥ ४६ ॥

३ फलचमसस्येज्याविकारताधि०—१९ ॥

फलचमसो नैमित्तिको भक्षविकारः श्रुतिसंयोगात् ॥ ४७ ॥ इज्याविकारो वा संस्कारस्य तदर्थत्वात् ॥ ४८ ॥ होमात् ॥ ४९ ॥ चमसैश्च तुल्यकालत्वात् ॥ ५० ॥ लिंगदर्शनाच्च ॥ ५१ ॥

२ ब्राह्मणानामेव राजन्यचमसानुप्रस
णाधिकरणम्-२० ॥

अनुप्रसर्पिषु सामान्यात् ॥ ५२
ब्राह्मणा वा तुल्यशब्दत्वात् ॥ ५३ ।
(२०) ॥ ३६ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांस
दर्शने तृतीयस्याध्यायस्य (प्रतिपत्तिक
निरूपणं नाम) पञ्चमः पादः ॥ ३ ॥ ५ ॥

---

२ स्रुवादिषु खादिरताविधेः प्रकृतिगामि
ताधि० १ ॥

सर्वार्थमप्रकरणात् ॥ १ ॥ प्रकृत
वाऽद्विरुक्तत्वात् ॥ २ ॥ तद्वर्ज

वचनप्राप्ते ॥ ३ ॥ दर्शनादिति चेत् ॥ ४ ॥ न चोदनैकार्थ्यात् ॥ ५ ॥ उत्पत्तिरिति चेत् ॥ ६ ॥ न तुल्यत्वात् ॥ ७ ॥ चोदनार्थकार्त्स्न्यात्तु मुख्यविप्रतिषेधात्प्रकृत्यर्थः ॥ ८ ॥

२ सामिधेनीनां सप्तदशसंख्याया विकृतिगामिताधिकरणम्--२ ॥

प्रकरणविशेषात्तु विकृतौ विरोधि स्यात् ॥ ९ ॥

२ नैमित्तिकसाप्तदश्यस्य प्रकृतिगामिताधिकरणम्--३ ॥

नैमित्तिकं तु प्रकृतौ तद्विकारः संयोगविशेषात् ॥ १० ॥

२ आधानस्य पवमानेष्ट्यनङ्गताधि०-४॥

इष्ट्यर्थमग्न्याधेयं प्रकरणात्॥११॥ न वा तासां तदर्थत्वात् ॥ १२ ॥लिंगदर्शनाच्च ॥ १३ ॥

२ आधानस्य सर्वार्थताधिकरणम्--५ ॥

तत्प्रकृत्यर्थं यथान्येऽनारभ्यवादाः ॥ १४॥ सर्वार्थं वाऽऽधानस्य स्वकालत्वात् ॥ १५ ॥

२ पवमानेष्टीनामसंस्कृतेऽग्नौ कर्तव्यताधिकरणम्--६॥

तासामग्निः प्रकृतितःप्रयाजवत्स्यात्॥१६॥न वा तासां तदर्थत्वात् १७

३ उपाकरणादीनामग्नीषोमीयधर्मता-
धिकणम्—७ ॥

तुल्यः सर्वेषां पशुविधिः प्रकरणाविशेषात् ॥ १८ ॥ स्थानाच्च पूर्वस्य ॥ १९॥ श्वस्त्वेकेषां तत्र प्राकृश्रुतिर्गुणार्थो ॥ २० ॥ तेनोत्कृष्टस्य काल विधिरिति चेत् ॥ २१ ॥ नैकदेशत्वात् ॥२२॥ अर्थेनेति चेत् ॥२३॥ न श्रुतिविप्रतिषेधात् ॥ २४ ॥ स्थानात्तु पूर्वस्य संस्कारस्य तदर्थत्वात् ॥ २५ ॥ लिंगदर्शनाच्च॥ २६ ॥अचोदना गुणार्थेन ॥ २७ ॥

२ शाखाहरणादीनामुभयदोहधर्मता०-८।

दोहयोः कालभेदादसंयुक्तं शृतं स्यात् ॥ २८ ॥ प्रकरणाविभागाद्वा तत्संयुक्तस्य कालशास्त्रम् ॥ २९ ॥

१ सादनादीनां सवनत्रयधर्मताधि०-९ ॥

तद्वत्सवनान्तरे ग्रहाम्नानम् ३० ॥

१ रशनात्रिवृत्त्वादीनां सर्वपशुधर्मताधिकरणम्-१० ॥

रशना च लिंगदर्शनात् ॥ ३१ ॥

१ अंश्वदाभ्ययोरपि सादनादिधर्मवत्त्वाधिकरणम्-११ ॥

आराच्छिष्टमसंयुक्तमितरैः सान्नि-

धानात् ॥ ३२ ॥ संयुक्तं वा तदर्थत्वा-
च्छेषस्य तन्निमित्तत्वाच्च् ॥ ३३ ॥ निर्दे-
शाद्व्यवतिष्ठेत ॥ ३४ ॥

२ चित्रिण्यादीष्टकानामग्न्यंगताधि०—१२॥

अग्न्यंगमप्रकरणे तद्वत् ॥ ३५ ॥

२ अभिषवादीनां सोममात्रधर्मताधि०—१३

नैमित्तिकमतुल्यत्वादसमानविधा-
नं स्यात् ॥ ३६ ॥

१ प्रतिनिधिष्वपि मुख्यधर्मानुष्ठानाधि० १४

प्रतिनिधिश्च तद्वत् ॥ ३७ ॥ तद्वत्
प्रयोजनैकत्वात् ॥ ३८ ॥ अशा-
स्त्रलक्षणत्वाच्च ॥ ३९ ॥

१ श्रुतेष्वपि प्रतिनिधिषु मुख्यधर्मानुष्ठा
नाधिकरणम्--१५ ॥

नियमार्था गुणश्रुतिः ॥ ४० ॥

२ दीक्षणीयादिधर्माणामग्निष्टोमांगताधि-
करणम्—१६ ॥

संस्थास्तु समानविधानाः प्रकरणा-
विशेषात् ॥ ४१ ॥ व्यपदेशश्च तुल्यवत्
॥ ४२ ॥ विकारास्तु कामसंयोगे
नित्यस्य समत्वात् ॥ ४३ ॥ अपि
वा द्विरुक्तत्वात्प्रकृतेर्भविष्यन्तीति ४४
वचनात्तु समुच्चयः ॥ ४५ ॥ प्रतिषेधाच्च
पूर्वलिंगानाम् ॥ ४६ ॥ गुणाविशेषा-

देकस्य व्यपदेशः॥४७ ॥(१६)२७॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने तृतीयस्याध्यायस्य(अनारभ्याधीतनिरूपणं नाम) षष्ठः पादः ॥ ३ ॥ ६ ॥

२ बर्हिरादीनां दर्शपौर्णमासतदंगोभयांगताधिकरणम्—१॥

प्रकरणविशेषादसंयुक्तं प्रधानस्य॥ १॥ सर्वेषां वा शेषत्वस्यातत्प्रयुक्तत्वात् ॥ २ ॥ आरादपीति चेत् ॥ ३ ॥ न तद्वाक्यं हि तदर्थत्वात्॥ ४ ॥ लिंगदर्शनाच्च ॥ ५ ॥

२ स्वामिसंस्काराणां प्रधानार्थताधि०--१

फलसंयोगात्तु स्वामियुक्तं प्रधानस्य ॥ ६ ॥

२ सौमिकवेद्यादीनामंगप्रधानोभयांगताधिकरणम्--३ ॥

चिकीर्षया च संयोगात् ॥ ७ ॥

२ अभिमर्शनस्यांगप्रधानोभयांगताधिकरणम्--४ ॥

तथाऽभिधानेन ॥ ८ ॥ तद्युक्ते तु फलश्रुतिस्तस्मात्सर्वचिकीर्षा स्यात् ॥ ९ ॥ गुणाऽभिधानात्सर्वार्थमाभिधानम् ॥ १० ॥

---

(१) तद्युक्ते इत्याद्यग्रिमं नवमं सूत्रमेतत्सूत्रोत्तरमेतदधिकरणे रत्नमालायाम् । भाष्ये तु नैवम् ।

२ दीक्षादक्षिणयोः प्रधानार्थताधि०–५ ॥

दीक्षादक्षिणं तु वचनात्प्रधानस्य ॥ ११ ॥ निवृत्तिदर्शनाच्च ॥ १२ ॥

२ अन्तर्वेदेर्यूपानंगताधिकरणम्–६ ।

तथा यूपस्य वेदिः ॥ १३ ॥ देशमात्रं वा शिष्टेनैकवाक्यत्वात् ॥ १४॥

२ हविर्धानस्य सामिधेन्यनंगताधि०–७॥

सामिधेनीस्तदन्वाहुरिति हविर्द्धानयोर्वचनात्सामिधेनीनाम् ॥ १५ ॥ देशमात्रं वा प्रत्यक्षं ह्यर्थकर्म सोमस्य ॥ १६॥ समाख्यानं च तद्वत्॥१७॥

२ अंगानामन्यद्वारानुष्ठानाधिकरणम्–८॥

शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्

तस्मात्स्वयं प्रयोगे स्यात् ॥ १८ ॥ उत्सर्गे तु प्रधानत्वाच्छेषकारी प्रधानस्य तस्मादन्यः स्वयं वा स्यात् ॥१९॥ अन्यो वा स्यात्परिक्रयाम्नानाद्विप्रतिषेधात्प्रत्यगात्मनि॥ २० ॥

१ परिक्रीतानामृत्विजां संख्याविशेषनियमाधिकरणम्—९ ॥

तत्रार्थात्कर्तृपरिमाणं स्यादनियमोऽविशेषात् ॥ २१ ॥ अपि वा श्रुतिभेदात्प्रतिनामधेयं स्युः॥ २२ ॥ एकस्य कर्मभेदादिति चेत् ॥ २३ ॥ नोत्पत्तौ हि ॥ २४ ॥

१ चमसाध्वर्यूणां पृथक्त्वाधि०--१० ॥

चमसाध्वर्यवश्च तैर्व्यपदेशात् ॥२५॥

१ चमसाध्वर्यूणां बहुत्वनियमाधि०--११॥

उत्पत्तौ तु बहुश्रुतेः ॥ २६ ॥

१ चमसाध्वर्यूणां दशत्वनियमा०--१२ ॥

दशत्वं लिंगदर्शनात् ॥ २७ ॥

१ शमितुरपृथक्त्वाधिकरणम्--१३ ॥

शमिता च शब्दभेदात् ॥ २८ ॥

प्रकरणाद्वोत्पत्त्यसंयोगात् ॥ २९ ॥

१ उपगस्यापृथक्त्वाधिकरणम्--१४ ॥

उपगाश्च लिंगदर्शनात् ॥ ३० ॥

१ सोमविक्रेतुः पृथक्त्वाधिकरणम्—१५ ॥

विक्रयी त्वन्यः कर्मणोऽचोदितत्वात् ॥ ३१ ॥

२ऋत्विगिति नाम्नोऽसर्वगामिताधि—१६॥

कर्मकार्यात्सर्वेषामृत्विक्त्वमविशेषात् ॥ ३२ ॥ न वा परिसङ्ख्यानात् ॥३३ ॥ पक्षेणेति चेत् ॥३४॥ न सर्वेषामधिकारः ॥ ३५ ॥

१ दीक्षादक्षिणावाक्योक्तब्रह्मादीनामेव सप्तदशर्त्विक्त्वाधि०—१७ ॥

नियमस्तु दक्षिणाभिः श्रुतिसंयोगात् ॥३६॥ उक्त्वा च यजमा-

नत्वं तेषां दीक्षाविधानात् ॥ ३७ ॥

१ ऋत्विजां स्वामिसप्तदशत्वाधि०– १८॥

स्वामिसप्तदशाः कर्मसामान्यात् ३८

[१ आध्वर्यवादिष्वध्वर्य्वादीनां कर्तृता-नियमाधि० १९]–[१ अग्नेः प्रकृतिविकृति-सर्वार्थताधिकरणं च–२०॥]

ते सर्वार्थाः प्रयुक्तत्वादग्नयश्च स्वकालत्वात् ॥ ३९ ॥ तत्संयोगात् कर्मणो व्यवस्था स्यात् संयोगस्या-र्थवत्त्वात् ॥ ४० ॥ तस्योपदेशसमा-

---

(१) "अग्नयश्च सर्वार्थाः स्वकालत्वात् " इत्यग्निमे-कदेशेनेत्यर्थः ॥

ख्यानेन निर्देशः ॥ ४१ ॥ तद्
लिंगदर्शनम् ॥ ४२ ॥

२ समाख्याबाधनाधिकरणम्-२१ ॥

प्रैषाऽनुवचनं मैत्रावरुणस्योपदे
शात् ॥ ४३ ॥ पुरोऽनुवाक्याधिकार
वा प्रैषसन्निधानात् ॥ ४४ ॥ प्रातर
नुवाके च होतृदर्शनात् ॥ ४५ ॥

२ चमसहोमेऽध्वर्युचमसाध्वर्युकर्तृताधि०-२२

चमसांश्चमसाध्वर्यवः समाख्या-
नात् ॥ ४६ ॥ अध्वर्युर्वा तन्न्याय-
त्वात् ॥ ४७ ॥ चमसे चान्यदर्श-
नात् ॥ ४८ ॥ अशक्तौ ते प्रतीये-
रन् ॥ ४९ ॥

२ श्येनवाजपेययोरनेककर्तृकताधि०--२३॥

वेदोपदेशात्पूर्ववद्वेदान्यत्वे यथोपदेशं स्युः ॥ ५० ॥ तद्गुणाद्वा स्वधर्मः स्यादधिकारसामर्थ्यात्सहांगैरव्यक्तः शेषे॥ ५१ ॥ (२३) ॥३९॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने तृतीयस्याध्यायस्य [बहुप्रधानोपकारकप्रयाजादिनिरूपणं नाम] सप्तमः पादः ॥ ३ ॥ ७ ॥

---

२ क्रयस्य स्वामिकर्मताधिकरणम्--१ ॥

स्वामिकर्मपरिक्रयः कर्मणस्तदर्थत्वात् ॥ १ ॥

१ वरदानस्याध्वर्युकर्मताधि०-२ ॥

वचनादितरेषां स्यात् ॥ २ ॥

२ वपनादिसंस्काराणां याजमानताधिकरणम्-३ ॥

संस्कारास्तु पुरुषसामर्थ्ये यथावेदं कर्मवद्व्यवतिष्ठेरन् ॥ ३॥ याजमानास्तु तत्प्रधानत्वात्कर्मवत् ॥४॥ व्यपदेशाच्च ॥ ५ ॥ गुणत्वेन तस्य निर्देशः ॥ ६ ॥ चोदनां प्रति भावाच्च ॥ ७ ॥ अतुल्यत्वादसमानविधानाः स्युः ॥ ८ ॥

२ तपसो याजमानताधिकरणम्–४ ॥

तपश्च फलसिद्धित्वाल्लोकवत् ॥ ९ ॥
वाक्यशेषश्च तद्वत् ॥ १० ॥
वचनादितरेषां स्यात् ॥ ११ ॥

२ लोहितोष्णीषतादीनां सर्वत्विग्धर्मताधिकरणम्–५ ॥

गुणत्वाच्च वेदेन न व्यवस्था स्यात् ॥ १२ ॥

२वृष्टिकामनायायाजमानताधिकरणम्–६॥

तथा कामोऽर्थसंयोगात् ॥ १३ ॥
व्यपदेशादितरेषां स्यात् ॥ १४ ॥

१ आयुर्दा इत्यादिमन्त्राणां याजमान
धिकरणम्–७ ॥

मन्त्राश्चाऽकर्मकरणास्तद्वत् ॥ १५
विप्रयोगे च दर्शनात् ॥ १६ ॥

१ द्व्याम्नातस्योभयप्रयोज्यताधिकरणम्–

द्व्याम्नातेषूभौ द्व्याम्नानस्याऽर्थ
त्वात् ॥ १७ ॥

१ अभिज्ञस्यैव वाचयितव्यताधिकरणम्–९

ज्ञाते च वाचनं न ह्यविद्वा
विहितोऽस्ति ॥ १८ ॥

२ द्वादशद्वन्द्वानामाध्वर्यवत्वाधिकरणम्–१०

याजमाने समाख्यानात्कर्माणि या

मानं स्युः ॥ १९ ॥ अध्वर्युर्वा तदर्थो
हि न्यायपूर्वं समाख्यानम् ॥ २० ॥

२ होतुराध्वर्यवकर्मानुष्ठातृत्वाधि०–११ ॥

विप्रतिषेधे करणः समवायविशे-
षादितरमन्यस्तेषां यतो विशेषः
स्यात् ॥ २१ ॥

१ प्रोक्षण्यासादनादीनामनाध्वर्यवताधिक-
रणम्–१२ ॥

प्रैषेषु च पराधिकरात् ॥ २२ ॥

१ प्रैषमंत्राणामाध्वर्यवत्वाधिकरणम्–१३ ॥

अध्वर्युस्तु दर्शनात् ॥ २३ ॥
गोणो वा कर्मसामान्यात् ॥ २४ ॥

१ करणमन्त्रेषु स्वामिफलस्याशासितव्यता
धि०–वा वर्चोन्यायाधिकरणम्–१४ ।

ऋत्विक्फलं करणेष्वर्थव
त्त्वात् ॥ २५ ॥ स्वामिनो वा तदर्थ
त्वात्॥ २६॥ लिंगदर्शनाच्च॥ २७॥

१ करणमन्त्रेषु कर्मार्थफलस्यर्त्विग्धर्मताधि
करणम्–१५॥

कर्मार्थं तु फलं तेषां स्वामिनं प्रत्य
र्थवत्त्वात् ॥ २८ ॥

१ भद्रमित्यस्योभयगामिताधिकरणम्–१६॥

व्यपदेशाच्च ॥ २९ ॥

३ द्रव्यसंस्कारस्यांगप्रधानार्थताधिकरणम्–१७ ॥

द्रव्यसंस्कारः प्रकरणाऽविशेषात् सर्वकर्मणाम् ॥ ३० ॥ निर्देशात्तु विकृतावपूर्वस्याऽनधिकारः ॥ ३१ ॥

१ पवित्रस्य परिभोजनीयबर्हिषा कर्तव्यताधिकरणम्–१८ ॥

विरोधे च श्रुतिविशेषादव्यक्तः शेषे ॥ ३२ ॥

२ प्राकृतपुरोडाशादीनां निधानाधिकरणम्–१९ ॥

अपनयस्त्वेकदेशस्य विद्यमानसंयोगात् ॥ ३३ ॥

---

१ विरोधादिति क्वचित् पाठः । २ क्व० शेष इति च ॥

२ काम्येष्टिषूपांशुत्वधर्मस्य प्रधानार्थता-
धिकरणम्-२० ॥

विकृतौ सर्वार्थः शेषः प्रकृतिवत् ॥ ३४ ॥ मुख्यार्थो वाऽङ्गस्याचोदितत्वात् ॥ ३५ ॥

२ श्येनाङ्गानां नवनीताज्यताधिकरणम्-२१॥

सान्निधानाविशेषादसम्भवे तदंगानाम् ॥ ३६ ॥ आधानेऽपि तथेति चेत् ॥ ३७ ॥ नाऽप्रकरणत्वादंगस्यातान्निमित्तत्वात् ॥ ३८ ॥

१ सर्वश्येनाङ्गानां नवनीताज्यता०-२२ ॥

तत्काले वा[1] लिंगदर्शनात् ॥ ३९ ॥

---

1 वेति पुस्तौ नास्ति ।

सर्वेषां वा विशेषात् ॥४०॥ न्यायोक्ते लिंगदर्शनम् ॥ ४१ ॥

२ सवनीयानां मांसमयताधि०—२३ ॥

मांसं तु सवनीयानां चोदनाविशेषात् ॥ ४२ ॥ भक्तिरसन्निधावन्याय्येति चेत् ॥ ४३ ॥ स्यात्प्रकृतिलिंगाद्वैराजवत् ॥४४॥ (२३)॥३४॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने तृतीयस्याध्यायस्य (याजमाननिरूपणं नाम) अष्टमः पादः ॥ ३ ॥ ८ ॥

समाप्तस्तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्यायः ॥

अत्र गोदोहनस्य पुरुषार्थत्वप्रयुक्तयानुष्ठानं तु क्रत्वर्थत्वप्रयुक्तयेत्यादिकं निरूप्यते—

२ प्रतिज्ञाधिकरणम्—१ ॥

अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा ॥ १ ॥

५ क्रत्वर्थपुरुषार्थलक्षणाधिकरणम्— २ ॥
(वर्णकानि चत्वारि)

यस्मिन्प्रीतिः पुरुषस्य तस्य लिप्साऽर्थलक्षणाऽविभक्तत्वात् ॥ २ ॥

२ प्रजापतिव्रतानां पुरुषार्थताधि०— ३ ॥

तदुत्सर्गे कर्माणि[१] पुरुषार्थाय शा-

---

१ कर्मणीति क्वचित् पाठः ।

स्त्रस्यानातिशङ्क्यत्वान्न च द्रव्यं चि-
कीर्ष्यते तेनार्थेनाभिसम्बन्धात्क्रिया-
यां पुरुषश्रुतिः ॥ ३ ॥ अविशेषात्तु
शास्त्रस्य यथाश्रुति फलानि स्युः ॥ ४ ॥
अपि वा कारणाऽग्रहणे तदर्थमर्थ-
स्याऽनभिसम्बन्धात् ॥ ५ ॥ तथा च
लोकभूतेषु ॥ ६ ॥

२ यज्ञायुधानामनुवादताधि०—४ ॥

द्रव्याणि त्वविशेषेणाऽऽनर्थक्यात्
प्रदीयेरन् ॥ ७ ॥ स्वेन त्वर्थेन स-
म्बन्धो द्रव्याणां पृथगर्थत्वात्तस्मा-
द्यथाश्रुति स्युः ॥ ८ ॥ चोद्यन्ते चा-

र्थकथासु ॥९॥ लिङ्गदर्शनाच्च ॥१०
२ पश्वेकत्वाधिकरणम्-५ ॥
तत्रैकत्वमयज्ञांगमर्थस्य गुणभूत
त्वात् ॥ ११ ॥ एकश्रुतित्वाच्च ॥ १२
प्रतीयत इति चेत् ॥ १३ ॥ नाऽश
ब्दं तत्प्रमाणत्वात्पूर्ववत् ॥ १४ ॥श
ब्दवत्तूपलभ्यते तदागमे हि तद्दृश्यते
तस्य ज्ञानं हि यथाऽन्येषाम् ॥ १५ ॥
तद्वच्च लिंगदर्शनम् ॥ १६ ॥
१ पशुलिङ्गविवक्षाधिकरणम्-६ ॥
तथा च लिंगम् ॥ १७ ॥

---

१ चार्थकर्मास्विति वृत्तौ पाठः ।
१ नं थवेति वृत्तौ पाठः ।

२ आश्रयिणामदृष्टार्थताधिकरणम्-७॥

आश्रयिष्वविशेषेण भावोऽर्थः प्रतीयेत ॥ १८ ॥ चोदनायां त्वनारम्भोऽविभक्तत्वान्न ह्यन्येन[1] विधीयते॥ १९॥ स्याद्वा द्रव्यचिकीर्षायां भावोऽर्थे च गुणभूतत्वाऽऽश्रया[2]द्धि गुणीभावः ॥ २० ॥

१ प्रयुक्तिविचारप्रतिज्ञाधिकरणम्-८ ॥

अ[3]र्थैसमवैषम्यतोद्रव्यकर्मणाम्॥२१॥

---

१ ह्यनेनेति वृत्तौ पाठः ।

२ याद्धीति वृत्तौ पाठः । क्वचिदप्यत्र याद्धीति पाठः ।

३ अर्थेनेति वृत्तौ पाठः ।

२ आमिक्षाप्रयुक्तताधिकरणम्—९ ॥
(वा—वाजिनन्याया०)

एकनिष्पत्तेः सर्वं समं स्यात् ॥ २२ ॥ संसर्गरसनिष्पत्तेरामिक्षा वा प्रधानं स्यात् ॥ २३ ॥ मुख्यशब्दाभिसंस्तवाच्च ॥ २४ ॥

२ गवानयनस्य पदकर्माप्रयुक्तताधि०—१०॥

पदकर्माप्रयोजकं नयनस्य परार्थत्वात् ॥ २५ ॥

२ कपालानां तुषोपवापाप्रयुक्तताधि—०११

अर्थाभिधानकर्म च भविष्यता

१ शब्दासंस्तवाति वृत्तौ पाठः ।

संयोगस्य तन्निमित्तत्वात्तदर्थो हि विधीयते ॥ २६ ॥

२ शकृल्लोहितयोः पशावप्रयोक्तृताधि०-१२॥

पशावनालम्भाल्लोहितशकृतोरकर्मत्वम् ॥ २७ ॥

२ पुरोडाशस्य स्विष्टकृदप्रयुक्तताधि०-१३॥

एकदेशद्रव्यश्चोत्पत्तौ विद्यमानसंयोगात् ॥ २८ ॥ निर्देशात्तस्यान्यदर्थादिति चेत् ॥ २९ ॥ न शेषसन्निधानात् ॥ ३० ॥ कर्मकार्यात् ॥ ३१ ॥ लिङ्गदर्शनाच्च ॥ ३२ ॥

२ अभिघारणे शेषधारणतत्पात्रयोरनु
ष्ठानाधिकरणम्-१४ ॥

अभिघारणे विप्रकर्षादनूयाजवत्
पात्रभेदः स्यात् ॥ ३३ ॥ न वा पात्रत्वा
दपात्रत्वं त्वेकदेशत्वात् ॥ ३४ ॥
हेतुत्वाच्च सहप्रयोगस्य ॥ ३५ ॥
अभावदर्शनाच्च ॥ ३६ ॥ स्याति सव्य-
वचनम् ॥ ३७ ॥ न तस्येति चेत् ॥ ३८ ॥
स्यात्तस्य मुख्यत्वात् ॥ ३९ ॥

३ समानयनस्याज्ये धर्मप्रयोजकताधि-
करणम्-१५ ॥

समानयनं तु मुख्यं स्याल्लिङ्गदर्श-

नात् ॥ ४० ॥ वचने हि हेत्वसाम-
र्थ्यम् ॥ ४१ ॥

२ औपभृतजौहवयोः क्रमेणोभयानुभयार्थ-
ताधिकरणम्–१६ ॥

तत्रोत्पत्तिरविभक्ता स्यात्॥४२॥
तत्र जौहवमनूयाजप्रातिषेधार्थम् ४३॥
औपभृतं तथेति चेत् ॥ ४४ ॥ स्या-
ज्जुहूप्रतिषेधान्नित्यानुवादः ॥ ४५ ॥

२ उपभृति द्विचतुर्गृहीताचरणाधि०–१७ ॥

तदृष्टसङ्ख्यं श्रवणात् ॥ ४६ ॥
अनुग्रहाच्च जौहवस्य॥४७॥ द्वयोस्तु

---

१ सामर्थ्ये इति न्यायमालायां पाठः ।

हेतुसामर्थ्यं श्रवणं च समानयने ॥ ४८ ॥ (१७ ॥ ३६ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने चतुर्थस्याध्यायस्य (प्रधानभूतामिक्षाद्यानयनप्रयोजकेत्यादिप्रधानप्रयोजकत्वविचारो नाम)प्रथमः पादः ॥ ४ ॥ १ ॥

---

२ स्वरोश्छेदनाद्यप्रयोजकताधिकरणम्-१ ॥

स्वरुस्त्वनेकनिष्पत्तिः स्वकर्मशब्दत्वात् ॥ १ ॥ जात्यन्तराच्च शङ्कते ॥ २ ॥ तदेकदेशो वा स्वरुत्वस्य तन्निमित्तत्वात ॥ ३ ॥ शकलंश्रुते-

---

(१) चशब्दरहितः पाठो वृत्तौ ।

श्च ॥ ४ ॥प्रतियूपं च दर्शनात्॥५॥
आ[1]दाने करोतिशब्दः ॥ ६ ॥

१ शाखाया आहार्यताधिकरणम्–२ ॥

शाखायां तत्प्रधानत्वात् ॥ ७ ॥

२ छेदनस्य शाखाप्रयुक्तताधिकरणम्–३॥

शाखायां तत्प्रधानत्वादुपवेषेण विभागः स्या[2]द्वैषम्यात् ॥ ८॥ श्रुत्यपायाच्च ॥ ९ ॥

३ शाखाप्रहरणस्य प्रतिपत्तिकर्मताधि०–४॥

ह[3]रणे जुहोतियोंगसामान्याद्द्रव्याणां

---

१ ने कर्मशब्द इति वृत्तौ पाठः ।

२ षम्यं तदिति न्यायमालायां पाठः ।

३ हरणे तु जु इतिन्यायमालायां पाठः ।

चार्थशेषत्वात् ॥ १० ॥ प्रतिपत्ति[illegible] शब्दस्य तत्प्रधानत्वात् ॥ ११ ॥ अर्थेऽपीति चेत् ॥ १२ ॥ न तस्या[illegible] नधिकारादर्थस्य च कृतत्वात् ॥ १३ ॥

२ निनयनस्य प्रतिपत्तिकर्मताधिकरणम्—५॥

उत्पत्त्यसंयोगात्प्रणीतानामाज्यवद्विभागः स्यात् ॥ १४ ॥ संयवनार्थानां या प्रतिपत्तिरितरासां तत्प्रधानत्वात् ॥ १५ ॥

२ दण्डदानस्यार्थकर्मताधिकरणम्—६ ॥

प्रासनवन्मैत्रावरुणस्य[2] दण्डप्रदानं

१ नां वा प्रतीति न्यायमालायां पाठः ।
२ वरुणायाति न्यायमालायां पाठः ।

कृतार्थत्वात् ॥ १६ ॥ अर्थकर्म वा कर्तृसंयोगात्स्रग्वत्॥ १७ ॥ कर्मयुक्ते च दर्शनात् ॥ १८ ॥

१ प्रासनस्य प्रतिपत्तिकर्मताधिकरणम्–७॥

उत्पत्तौ येन संयुक्तं तदर्थं तच्छ्रुतिहेतुत्वात्तस्यार्थान्तरगमने शेषत्वात् प्रतिपत्तिः स्यात् ॥ १९ ॥

२ अवभृथगमनस्य प्रतिपत्तिकर्मताधिकरणम्–८ ॥

सौमिके च कृतार्थत्वात्॥ २० ॥ अर्थकर्म वाऽभिधानसंयोगात्॥२१॥

प्रतिपत्तिर्वा तन्न्यायत्वाद्देशार्थाऽव
थश्रुतिः ॥ २२ ॥

२ कर्तृदेशकालविधीनां नियमार्थताधि
रणम्-९ ॥

कर्तृदेशकालानामचोदनं प्रयो
नित्यसमवायात् ॥ २३ ॥ नियमार्थ
वा पुनः श्रुतिः ॥ २४ ॥

१ द्रव्यगुणविधानस्य नियमार्थताधि-१० ॥

तथा द्रव्येषु गुणश्रुतिरुत्पत्तिसं-
योगात् ॥ २५ ॥

---

१ पुनश्शब्दरहितः पाठो न्यायमालायाम् ।

१ अववातादिसंस्कारविधानस्य नियमार्थताधिकरणम्—११ ॥

संस्कारे च तत्प्रधानत्वात्॥२६॥

२ यागहोमस्वरूपनिरूपणाधिकरणम्—१२

यजाति चोदनाद्रव्यदेवताक्रियं समुदाये कृतार्थत्वात् ॥ २७ ॥ तदुक्ते श्रवणाज्जुहोतिरासेचनाधिकः स्यात् ॥२८॥ ददातिरुत्सर्गपूर्वकः परस्वत्वेन सम्बन्धः ॥ २९ ॥

२ बर्हिष आतिथ्यादिसाधारण्याधि०—१३॥

विधेः कर्मापवर्गित्वादर्थान्तरे वि-

---

१ इदं सूत्रं भाष्ये न्यायमालायां च नास्ति।

धिप्रदेशः स्यात्॥३०॥अपिवोत्पा-
संयोगादर्थसम्बन्धो विशिष्टानां प्रय-
गेकत्वहेतुः स्यात्॥३१॥१३॥२८

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसा-
दर्शने चतुर्थस्याध्यायस्य (अप्रधानं वत्सा-
पाकरणं शाखाच्छेदे प्रयोजकमित्याद्य-
प्रधानप्रयोक्तृत्वविचारो नाम)
द्वितीयः पादः ॥ ४ ॥ २ ॥

---

२ द्रव्यसंस्कारकर्मणां क्रत्वर्थताधिकरणम्—१॥

द्रव्यसंस्कारकर्मसु परार्थत्वात्फ-
लश्रुतिरर्थवादः स्यात् ॥ १ ॥ उत्प-

त्तेश्चातत्प्रधानत्वात् ॥ २ ॥ फलं तु तत्प्रधानायाम् ॥ ३ ॥

२ नैमित्तिकानामनित्यार्थत्वाधिकरणम्—२॥

नैमित्तिके विकारत्वात्क्रतुप्रधानमन्यतस्स्यात् ॥ ४ ॥

[1] द्रव्यादेर्नैत्यनैमित्तिकोभयार्थताधिकरणम्—३॥ (संयोगपृथक्त्वन्यायः)

एकस्य तूभयत्वे संयोगपृथक्त्वम्॥ ५ ॥ शेष इति चेत् ॥ ६ ॥ नार्थपृथक्त्वात् ॥ ७ ॥

१ पयोव्रतादीनां क्रतुधर्मताधिकरणम्—४॥

द्रव्याणां तु क्रियार्थानां संस्कारः

---

१ इदं सूत्रं वृत्तौ नास्ति ।

क्रतुधर्मत्वात् ॥ ८ ॥ पृथक्त्वाद्व्य-
तिष्ठेत ॥ ९ ॥

१ विश्वजिदादीनां सफलत्वाधिकरणम्-४
(विश्वजिन्न्याये)

चोदनायां फलाश्रुतेः कर्ममा-
विधीयेत न ह्यशब्दं प्रतीयते ॥ १० ॥
अपि वाऽऽम्नानसामर्थ्याच्चोदनार्थेन
गम्येतार्थानामर्थवत्त्वेन वचनानि प्रती-
यन्तेऽर्थतोप्यसमर्थानामानन्तर्येप्यस-

१ धर्मः स्यादिति न्यायमालायां पाठः ।
२ गम्यते अर्थानां ह्यर्थेति न्या॰मा॰पाठः ।
३ र्थतोऽसेति वृत्तौ पाठः ।
४ न्तर्येण समिति वृत्तौ पाठः ॥

न्बन्धस्तस्माच्छ्रुत्येकदेशः स्सः ॥ ११ ॥
वाक्यार्थश्च गुणार्थवत् ॥ १२ ॥

१ विश्वजिदादीनामेकफलताधिकरणम्—६॥
(विश्वजिन्न्याये)

तत्सर्वार्थमनादेशात् ॥ १३ ॥
एकं वा चोदनैकत्वात् ॥ १४ ॥

१ विश्वजिदादीनां स्वर्गफलताधिकरणम्—७॥
(विश्वजिन्न्याये)

स स्वर्गः स्यात्सर्वान्प्रत्यविशिष्ट-
त्वात् ॥ १५ ॥ प्रत्ययाच्च ॥ १६ ॥

---

१ स इत्येतद्रहितः पाठो न्यायमालायाम् ।

१ रात्रिसत्रस्याऽऽर्थवादिकफलकताधिक-
णम्—८ ॥ (रात्रिसत्रन्याये)

क्रतौ फलार्थवादमङ्गवत्काष्णा-
जिनिः॥ १७ ॥ फलमात्रेयो निर्देशा-
दश्रुतौ ह्यनुमानं स्यात् ॥ १८ ॥
अंगेषु स्तुतिः परार्थत्वात् ॥ १९ ॥

२ काम्यानां यथोक्तकाम्यफलकत्वा-
धिकरणम्—९ ॥

काम्ये कर्मणि नित्यः स्वर्गो यथा
यज्ञांगे क्रत्वर्थः ॥ २० ॥ वीते
च कारणे नियमात् ॥ २१ ॥ कामो
वा तत्संयोगेन चोद्यते ॥ २२ ॥ अंगे

त्वात् ॥ २३ ॥ वीते चं नियम-
दर्थम् ॥ २४ ॥
२ दर्शपूर्णमासादीनां सर्वकामार्थताधिकर-
णम्—१०॥ (दर्शपूर्णमासन्याये)
सार्वकाम्यमंगकामैः प्रकरणात्॥
॥ २५ ॥ फलोपदेशो वा प्रधानश-
ब्दसंयोगात् ॥ २६ ॥
२ दर्शपूर्णमासादीनां प्रतिफलं पृथगनुष्ठा-
नाधि०—११॥ दर्शपूर्णमासन्याये—योगसिद्धि-
न्याये च । अथवा काम्यानामैहिकामुष्मिकफल

१ चशब्दरहितः पाठो वृत्तौ ।
२ इदं सूत्रद्वयं द्विधा व्याख्यायाधिकरणद्वय
कल्पितं न्यायमालायाम् ।

वत्त्वाधि०-१२ ॥ (दर्शपूर्णमासन्याये-योगसिद्धिन्याये च)

तत्र सर्वेऽविशेषात् ॥२७॥ योगसिद्धिर्वाऽर्थस्योत्पत्त्यसंयोगा[2]त् ॥२८॥

[१]सौत्रामण्यादीनां चयनाद्यंगताधि०-१३॥

समवाये चोदनासंयोगस्यार्थवत्त्वात् ॥२९॥ कालश्रुतौ काल इति चेत् ॥३०॥नासमवायात्प्रयोजने[3]न॥३१॥

---

१ इदं सूत्रद्वयं वर्णकान्तरत्वेनापि व्याख्यातं भाष्ये, न्या०मा० च ।

२ योगित्वादिति न्यायमालायां पाठः ।

३ नेन स्यादिति न्यायमालायां पाठः ।

२ वैमृधादेः पौर्णमास्याद्यंगताधि०-१४॥

उभयार्थमिति चेत्॥ ३२ ॥न श-
ब्दैकत्वात् ॥ ३३ ॥ प्रकरणादिति
चेत् ॥३४॥नोत्पत्तिसंयोगात्॥३५॥

२ अनूयाजादीनामाग्निमारुतोर्ध्वकालता-
धिकरणम्-१५ ॥

अनुत्पत्तौ तु कालः स्यात्प्रयोज-
नेन सम्बन्धात् ॥ ३६ ॥

२ सोमादीनां दर्शपूर्णमासोत्तरकालता-
द्यधिकरणम्-१६ ॥

उत्पत्तिकालविशये कालः स्याद्वा-
क्यस्य तत्प्रधानत्वात् ॥ ३७ ॥

२ वैश्वानरेष्टेः पुत्रगतफलकत्वाधिक०—१७॥
(जातेष्टिन्याये)

फलसंयोगस्त्वचोदिते न स्याद-
शेषभूतत्वात् ॥ ३८ ॥

२ वैश्वानरेष्टेर्जातकर्मोत्तरकालताधिकरणम्
अथवा- १ वैश्वानरेष्टेराशौचोपगमोत्तरका-
लताधिकरणम् १८-१९ ॥ (जातेष्टिन्याये)

अंगानां तूपघातसंयोगो निमि-
त्तार्थः ॥ ३९ ॥

२ सौत्रामण्याद्यंगानां स्वकालकर्तव्य-
ताधिकरणम्-२० ॥

प्रधानेनाभिसंयोगादंगानां मुख्य-

(१) अत्र न्यायमालायां व्याख्याभेदेनाधिकरणभेद
उक्तः ।

कालत्वम् ॥ ४० ॥ अपवृत्ते तु चोदना तत्सामान्यात्स्वकाले स्यात् ॥ ४१ ॥ (२०) ॥ ३२ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने चतुर्थस्याध्यायस्य (जुह्वाः पर्णमयीत्वादेरपापश्लोकश्रवणादिफलभावाभावचिंतनं नाम) तृतीयः पादः ॥ ४ ॥ ३ ॥

२ राजसूयेज्यानां देवनाद्यंगकत्वाधि०–१ ॥

प्रकरणशब्दसामान्याच्चोदनानामनङ्गत्वम् ॥ १ ॥ अपि वाऽङ्गमनिज्याः स्युस्ततो विशिष्टत्वात् ॥ २ ॥

(१) अभेति न्या० मा० पाठः ।

१ देवनस्य कृत्स्नराजसूयांगताधिकरणम् २॥

मध्यस्थं यस्य तन्मध्ये ॥ ३ ॥ सर्वासां वा समत्वाच्चोदनातः स्यान्न हि तस्य प्रकरणं देशार्थमुच्यते मध्ये ॥ ४ ॥

२ सौम्यादीनामुपसत्कालकत्वाधि०-३ ॥

प्रकरणाविभागे च विप्रतिषिद्धं ह्युभयम् ॥ ५ ॥ अपि वा कालमात्रं स्याददर्शनाद्विशेषस्य ॥ ६ ॥

१ आमनहोमानां सांग्रहण्यंगताधि०-४ ॥

फलवद्वोक्तहेतुत्वादितरस्य प्रधानं स्यात् ॥ ७ ॥

२ दधिग्रहस्य नित्यताधिकरणम्—५ ॥

दधिग्रहो नैमित्तिकः श्रुतिसंयोगात् ॥ ८ ॥ नित्यश्च ज्येष्ठशब्दत्वात् ॥ ९ ॥ सार्वरूप्याच्च ॥ १० ॥ नित्यो वा स्यादर्थवादस्तयोः कर्मण्यसम्बन्धाद्भङ्गित्वाच्चान्तरायस्य ॥ ११ ॥

१ वैश्वानरस्य नैमित्तिकत्वाधिकरणम्—६ ॥

वैश्वानरश्च नित्यः स्यान्नित्यैः समानसंख्यत्वात् ॥ १२ ॥ पक्षे वोत्पन्नसंयोगात् ॥ १३ ॥

१ षष्ठचितन्नैमित्तिकत्वाधिकरणम्—७ ॥

षट्चितिः पूर्ववत्स्यात् ॥ १४ ॥

---

१ छशब्दादिति न्यायमालायां पाठः ।

२ वत्वादिति न्यायमालायां पाठः ।

ताभिश्च तुल्यसंख्यानात् ॥ १५ ॥ अर्थवादोपपत्तेश्च ॥ १६ ॥ एकचितिर्वा स्यादपवृक्ते हि चोद्यते निमित्तेन ॥ १७ ॥ विप्रतिषेधात्ताभिः समानसंख्यत्वम् ॥ १८ ॥

॥ ९ पिण्डपितृयज्ञस्यानंगताधिकरणम्—८॥

पितृयज्ञः स्वकालत्वानंगं स्यात् ॥१९॥ तुल्यवच्च[२] प्रसंख्यानात् ॥२०॥ विप्रतिषिद्धे[३] च दर्शनात् ॥ २१ ॥

१ सङ्ख्यमिति न्यायमालायां पाठः ।

२ वत्प्रसामिति न्यायमालायां पाठः ।

३ विशब्दरहितः पाठो न्या॰ मा॰ ।

१ रशनाया यूपांगताधिकरणम्–९ ॥

पश्वङ्गं रशना स्यात्तदागमे विधानात् ॥ २२ ॥ यूपांगं वा तत्संस्कारात् ॥ २३ ॥ अर्थवादश्च तदर्थवत् ॥ २४ ॥

१ स्वरोः पश्वंगताधिकरणम्–१० ॥

स्वरुश्चाप्येकदेशत्वात् ॥ २५ ॥ निष्क्रयश्च तदंगवत् ॥ २६ ॥ पश्वंगं वार्थकर्मत्वात् ॥ २७ ॥ भक्त्या निष्क्रयवादः स्यात् ॥ २८ ॥

१ आघारादीनामंगताधिकरणम्–११ ॥

दर्शपूर्णमासयोरिज्याः प्रधाना-

१ वाङ्गार्थत्वादिति न्या॰मा॰ पाठः ।

न्यविशेषात् ॥ २९ ॥ अपि वांगानि कानि चिद्येष्वंगत्वेन संस्तुतिः सामान्यादभिसंस्तवः[1] ॥ ३० ॥ तथा चान्यार्थदर्शनम् ॥ ३१ ॥ अविशिष्टं तु कारणं प्रधानेषु गुणस्य विद्यमानत्वात् ॥ ३२ ॥ नानुक्तेऽन्यार्थदर्शनं परार्थत्वात् ॥ ३३ ॥ पृथक्त्वे त्वभिधानयोर्निवेशः श्रुतितो व्यपदेशाच्च तत्पुनर्मुख्यलक्षणं यत्फलवत्त्वं तत्सन्निधावसंयुक्तं तदङ्गं स्याद्भागित्वात्का-

१ सामान्योभिसम्बन्ध इति न्या॰ मा॰ पाठः ।

रणस्याश्रुतेश्चान्यसम्बन्धः ॥ ३४ ॥ गुणाश्च नामसंयुक्ता विधीयन्ते नांगेषूपपद्यन्ते ॥ ३५ ॥ तुल्या च कारणश्रुतिरन्यैरंगाभिसम्बन्धैः ॥ ३६ ॥ उत्पत्तावाभिसम्बन्धस्तस्मादंगोपदेशः स्यात् ॥ ३७ ॥ तथा चान्यार्थदर्शनम् ॥ ३८ ॥

१ ज्योतिष्टोमे दीक्षणीयादीनामङ्गताधिकरणम्– १२ ॥

ज्योतिष्टोमे तुल्यान्यविशिष्टं हि

---

१ श्रुतश्चेति न्या० मा० पाठः ।

२ ङ्गाङ्गिसम्बन्धैरिति न्या० मा० पाठः ।

कारणम् ॥ ३९ ॥ गुणानां तूत्पत्ति
वाक्येन सम्बन्धात्कारणश्रुतिस्तस्मा
त्सोमः प्रधानं स्यात् ॥ ४० ॥तथ
चान्यार्थदर्शनम्॥४१॥(१२)१८॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसा
दर्शने चतुर्थस्याऽध्यायस्य (राजसूयगत-
जघन्याङ्गाक्षद्यूतादिचिन्तनं नाम) चतुर्थः
पादः ॥ ४ ॥ ४ ॥

॥ चतुर्थोऽध्यायः समाप्तः ॥ ४ ॥

अथ पञ्चमोऽध्यायः ॥

अत्र क्रमनियतिविधेयत्वादिकं निरूप्यते—

४ क्रमनियमनिरूपणाधिकरणम् ०—१

(श्रुतिबलीयस्त्वन्यायः)

श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वात् ॥ १ ॥

२ क्रमस्य क्वचिदार्थिकत्वाधि०— २ ॥

अर्थाच्च ॥ २ ॥

१ क्रमस्य क्वचिदनियमाधि०— ३ ॥

अनियमोऽन्यत्र ॥ ३ ॥

---

१ तत्प्रधानत्वोति न्या० मा० पाठः ।

१ क्रमस्य क्वचित्पाठानुसारिताधिकरणम्-४॥ (पाठक्रमन्यायः)

क्रमेण वा नियम्येत क्रत्वेकत्वे तद्गुणत्वात् ॥ ४ ॥ अशाब्द इति चेत्स्याद्वाक्यशब्दत्वात् ॥ ५ ॥ अर्थकृते चाऽनुमानं स्यात्क्रत्वेकत्वे परार्थत्वात्स्वेन त्वर्थेन सम्बन्धस्तस्मात्स्वशब्दमुच्यते ॥ ६ ॥ तथा चान्यार्थदर्शनम् ॥ ७ ॥

२ क्रमस्य क्वचित्प्रथमप्रवृत्त्यनुसारिताधिकरणम्-५ ॥ (प्रावृत्तिकक्रमन्यायः)

प्रवृत्त्या तुल्यकालानां गुणानां

---

१ अशाब्दमितीति वृत्तिकृत्पाठः ।

२ कृते वान्विति न्या॰ मा॰ पाठः ।

तदुपक्रमात् ॥ ८ ॥ सर्वमिति चेत् ॥९॥ नाकृतत्वात् ॥ १० ॥क्रत्वन्तरवदिति चेत् ॥ ११ ॥ नासमवायात् ॥ १२ ॥

२ क्रमस्य क्वचित्स्थानाऽनुसारिताधि०–६ ॥

स्थानाच्चोत्पत्तिसंयोगात् ॥ १३ ॥

२ अङ्गक्रमस्य मुख्यक्रमानुसारिताधि०–७॥

मुख्यक्रमेण चांगानां तदर्थत्वात् ॥ १४ ॥

२ अङ्गेषु मुख्यक्रमापेक्षया पाठक्रमस्य बलवत्त्वाधिकरणम्–८ ॥

प्रकृतौ तु स्वशब्दत्वाद्यथाक्रमं प्रतीयेत ॥ १५ ॥

१ णवांगेति जै० न्या० मा० पाठः ।

२ ब्राह्मणपाठान्मन्त्रपाठस्य बलीयस्त्वाधिकरणम्- ९ ॥

मन्त्रतस्तु विरोधे स्यात्प्रयोगरूपसामर्थ्यात्तस्मादुत्पत्तिदेशः सः ॥ १६ ॥

२ प्रयोगवचनाच्चोदकस्य बलवत्त्वाधि०-१० ॥

तद्वचनाद्विकृतौ यथाप्रधानं स्यात् ॥ १७ ॥ विप्रतिपत्तौ वा प्रकृत्यन्वयाद्यथाप्रकृति ॥ १८ ॥

२ विकृतौ क्वचित्प्रकृतिधर्मानतिदेशाधिकरणम्- ११ ॥

विकृतिः प्रकृतिधर्मत्वात्तत्काला स्याद्यथा शिष्टम् ॥ १९ ॥ अपि

वा क्रमकालसंयुक्ता सद्यः क्रियेत तत्र विधेरनुमानात्प्रकृतिधर्मलोपः स्यात् ॥ २० ॥ कालोत्कर्ष इति चेत्॥२१॥ न तत्सम्बन्धात् ॥२२॥

२ अनुयाजाद्युत्कर्षप्रयाजान्तापकर्षाधिकरणम्–१२ ॥ (तदादितदन्तन्यायः–)

अंगानां मुख्यकालत्वाद्यथोक्तमुत्कर्षे स्यात्॥२३॥ तदादि वाभिसम्बन्धात्तदन्तमपकर्षे स्यात् ॥२४ ॥

२ प्रवृत्त्या प्रोक्षणादीनां सौमिकपूर्वभाविताधिकरणम्–१३ ॥

प्रवृत्त्या कृतकालानाम् ॥ २५ ॥

शब्दाविप्रतिषेधाच्च ॥ २६ ॥

२ वैकृतयूपकर्ममात्रापकर्षाधिकरणम्-१४॥
(यूपकर्मन्यायः)

असंयोगात्तु वैकृतं तदेव प्रतिकृष्येत ॥ २७ ॥

२ दाक्षिणाग्निकहोमानपकर्षाधि०- १५ ॥

प्रासंगिकं च नोत्कर्षेदसंयोगात् ॥ २८ ॥

२ पुरोडाशाभिवासनान्तस्य दर्शेऽनपकर्षाधिकरणम्- १६ ॥

तथाऽपूर्वम् ॥ २९ ॥

२ सान्तपनीयाया अग्निहोत्रानुत्कर्षकताधिकरणम्--१७ ॥

सान्तपनीया तूत्कर्षेदग्निहोत्रं सवनवद्वैगुण्यात्॥३०॥अव्यवायाच्च॥३१॥

असम्बन्धात्तु नोत्कर्षेत ॥ ३२ ॥

प्रापणाच्चनिमित्तस्य ॥ ३३ ॥

सम्बन्धात्सवनोत्कर्षः ॥ ३४ ॥

२ उक्थ्यानुरोधेन षोडश्युत्कर्षाधि०--१८॥

षोडशी चोक्थ्यसंयोगात् ॥३५॥

(१८) ३६ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने पञ्चमस्याऽध्यायस्य (श्रुत्यर्थपाठादिभिः क्रमानियमानिरूपणं नाम) प्रथमः पादः॥५॥१॥

२ वाजपेयपशूनां सर्वेषामेकदौपाकरणादिधर्मानुष्ठानाधि०—१॥ (पदार्थानुसमयन्यायः)

सन्निपाते प्रधानानामेकैकस्य गुणानां सर्वकर्म स्यात् ॥ १ ॥ सर्वेषां वकजातीयं कृतानुपूर्व्यर्त्वात् ॥ २॥

१ सहस्राश्वप्रतिग्रहस्थले एकैकस्यैकदा सर्वधर्मानुष्ठानाधि०—२॥(काण्डानुसमयन्यायः)

कारणादभ्यावृत्तिः ॥ ३ ॥

२ मुष्टिकपालादीनां समुदायानुसमयाधिकरणम्—३ ॥

मुष्टिकपालावदानाञ्जनाभ्यञ्जन-

---

१ पर्वत्वेति जै॰ न्यायमालाकृत्पाठः ।

वपनपावनेषु चैकेन ॥ ४ ॥ सर्वाणि त्वेककार्यत्वादेषां तद्गुणत्वात् ॥ ५ ॥

२ अवदानस्य प्रदानान्तानुसमयाधि०—४ ॥

संयुक्ते तु प्रक्रमात्तदंगं स्यादितरस्य तदर्थत्वात् ॥ ६ ॥

वचनात्तु परिव्याणान्तमञ्जनादिः

१ अञ्जनादेः परिव्याणान्तानुसमयाधि०—५

स्यात् ॥ ७ ॥ कारणाद्वा (न) वसर्गस्याद्यथा पात्रवृद्धिः ॥ ८ ॥ न वा शब्दकृतत्वान्न्यायमात्रामितरदर्थात्पात्रविवृद्धिः ॥ ९ ॥

---

१ सर्वाणि वैकेति वृत्तिकृत्पाठः २ त्तदन्तमिति वृत्तौ पाठः ।

३ द्वावसर्गं इति वृत्तौ पाठः ।

४ मञ्जनादीरिति वृत्तौ पाठः ।

२ दैवताद्यवदानेषु पदार्थानुसमयाधिकरणम्०--६ ॥

पशुगणे तस्यतस्यापवर्जयेत्पश्वेकत्वात् ॥ १० ॥ दैवतैर्वैककर्म्यात् ॥ ११ ॥ मन्त्रस्य चार्थवत्त्वात् ॥ १२ ॥

२ नानाबीजेष्वावुलूखलादीनां तन्त्रताधिकरणम्०--७ ॥

नानाबीजे एकमुलूखलं विभवात् ॥ १३ ॥ विभ्राद्धिर्वा नियमादानुपूर्व्यस्य तदर्थत्वात् ॥ १४ ॥ एकं वा तण्डुलभावाद्धन्तेस्तदर्थत्वात् ॥ १५ ॥

१ जेष्वे इति जै० न्या० मा० पाठः ।

२अग्नीषोमीयपशौ प्रयाजानूयाजयोः पात्र-
भेदाधिकरणम्—८ ॥

विकारे त्वनूयाजानां पात्रभेदोऽर्थ-
भेदात् ॥ १६ ॥

२ नारिष्टहोमस्योपहोमपूर्वताधिकरणम्—९॥
(नारिष्टन्यायः)

प्रकृतेः पूर्वोक्तत्वादपूर्वमन्ते स्यान्न
ह्यचोदितस्य शेषाम्नानम् ॥ १७ ॥
मुख्यानन्तर्यमात्रेयस्तेन तुल्यश्रुति-
त्वादशब्दत्वात्प्राकृतानां व्यवायः
स्यात् ॥ १८ ॥ अन्ते तु बादरायण
स्तेषां प्रधानशब्दत्वात् ॥ १९ ॥
तथा चान्यार्थदर्शनम् ॥ २० ॥

२ विदेवनादीनामभिषेकपूर्वताधिकरणम्-१०॥

कृतदेशात्तु पूर्वेषां स देशः स्यात्तेनप्रत्यक्षसंयोगान्न्यायमात्रमितरत् २१

१ सावित्रहोमादीनां दीक्षणीयापूर्वप्रयोगाधिकरणम्०- ११ ॥

प्राकृताच्च पुरस्ताद्यत् ॥ २२ ॥

१ याजमानसंस्काराणां रुक्मप्रतिमोकात् पूर्वभाविताधिकरणम्-१२ ॥

सान्निपातश्चेद्यथोक्तमन्ते स्यात् ॥ २३ ॥ (१२) ॥ २१ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने पञ्चमस्याध्यायस्य (वाजपेयेषु सप्तदशपशुष्वेकैकधर्मसमापनमित्यादिक्रमविशेषनिरूपणं नाम) द्वितीयः पादः॥५॥२॥

२ प्रयाजादीनामेकादशादिसंख्यायाः सर्वसंपाद्यताधिकरणम्–१ ॥

विवृद्धिः कर्मभेदात्पृषदाज्यवत्तस्य तस्योपदिश्येत ॥ १ ॥ अपि वा सर्वसङ्ख्यत्वाद्विकारः प्रतीयेत ॥२ ॥

२ प्रथमोपसत्त्रयस्य स्वस्थानावृत्त्याधि०–२॥

स्वस्थानात्तु विवृध्येरन्कृतानुपूर्व्यत्वात् ॥ ३ ॥

२ सामिधेनीष्वागन्तूनामन्ते निवशाधिकरणम्–३ ॥

समिध्यमानवतीं समिद्धवतीं चान्तरेण धाय्याः स्युर्द्यावापृथिव्योरन्तराले समर्हणात् ॥४ ॥ तच्छब्दा वा ॥५॥

उष्णिक्ककुभोरन्ते दर्शनात् ॥ ६ ॥

१ बहिष्पवमाने आगन्तूनां पर्यासोत्तरकालताधिकरणम्--४ ॥

स्तोमविवृद्धौ पुरस्तात्पर्यासादागन्तवः स्युस्तथा हि दृष्टं द्वादशाहे ॥ ७ ॥ पर्यास इति चाऽन्ताख्या ॥ ८ ॥ अन्ते वा तदुक्तम् ॥ ९ ॥ वचनात्तु द्वादशाहे ॥ १० ॥ अतद्विकारश्च ॥ ११ ॥ तद्विकारेऽप्यपूर्वत्वात् ॥ १२ ॥

१ बहिष्पवमान एवागन्तूनां साम्नां मध्ये निवेशाधिकरणम्–९ ॥

अन्ते तूत्तरयोर्दध्यात् ॥ १३ ॥

अपि वा गायत्रीबृहत्यनुष्टुप्सु वच-
नात् ॥ १४ ॥

२ ग्रहेष्टकादीनां क्रत्वग्निशेषताधि०— ६ ॥

ग्रहेष्टकमौपानुवाक्यं सवनचितिशेषः
स्यात् ॥ १५ ॥ क्रत्वग्निशेषा वा
चोदितत्वादचोदना तु पूर्वस्य ॥१६॥

१ चित्रिण्यादीनां मध्यमचितावुपधानाधि-
करणम्— ७ ॥

अन्ते स्युरव्यवायात् ॥ १७ ॥
लिङ्गदर्शनाच्च ॥ १८ ॥ मध्यमायां
तु वचनाद्ब्राह्मणवत्यः ॥ १९ ॥

१ लोकम्पृणातः पूर्वं चित्रिण्याद्युपधानाधिकरणम्-८ ॥

प्राग्लोकम्पृणायास्तस्याः सम्पूरणार्थत्वात् ॥ २० ॥

२ इष्टिसंस्कृतेऽग्नावग्निहोत्राद्यनुष्ठानाधि०-९॥

संस्कृते कर्म संस्काराणां तदर्थत्वात् ॥ २१ ॥ अनन्तरं च व्रतं तद्भूतत्वात् ॥२२॥ पूर्वं च लिंगदर्शनात् ॥ २३ ॥ अर्थवादो वाऽर्थस्य विद्यमानत्वात् ॥ २४ ॥ न्यायविप्रतिषेधाच्च ॥ २५ ॥

१ अग्निचिद्वर्षणादिव्रतानां क्रत्वन्तेनुष्ठाना-
धिकरणम्—१० ॥

सञ्चिते त्वग्निचिद्युक्तं प्रापणान्निमि-
त्तस्य ॥ २६ ॥ क्रत्वन्ते वा प्रयोगव-
चनाभावात् ॥ २७ ॥ अग्नेः कर्मत्व-
निर्देशात् ॥ २८ ॥

१ दीक्षाया इष्टसिद्धिताधि०—११ ॥

परेणाऽवेदनाद्दीक्षितः स्यात्सर्वैर्दी-
क्षाभिसम्बन्धात् ॥ २९॥ इष्टयन्तेवा
तदर्थां ह्यविशेषार्थसम्बन्धात् ॥ ३० ॥
समाख्यानं च तद्वत् ॥ ३१ ॥

१ काम्येष्टीनामनियमेनानुष्ठानाधि०—१२॥

अङ्गवत्क्रतूनामानुपूर्व्यम् ॥ ३२॥ न

वाऽसम्बन्धात् ॥ ३३ ॥ काम्यत्वाच्च ॥ ३४ ॥ आनर्थक्यान्नेति चेत् ॥ ३५ ॥ स्याद्विद्यार्थत्वाद्यथा परेषु सर्वस्वारात् ॥ ३६ ॥

२ यज्ञानामग्निष्टोमपूर्वताधिकरणम्-१३ ॥

य एतेनेत्यग्निष्टोमःप्रकरणात् ॥ ३७ ॥ लिङ्गाच्च ॥ ३८ ॥

१ ज्योतिष्टोमादिविकाराणामग्निष्टोमपूर्वकताधिकरणम्- १४ ॥

अथान्येनेति संस्थानां सन्निधानात् ॥ ३९ ॥ तत्प्रकृतेर्वाऽपत्तिविहारौ हि न तुल्येषूपपद्येते ॥ ४० ॥

प्रशंसा च विहरणाभावात् ॥ ४१ ॥
विधिप्रत्ययाद्वा न ह्येकस्मात्प्रशंसा स्यात् ॥ ४२ ॥

१ एकानेकस्तोमकानां सर्वेषामग्निष्टोमपूर्वकताधिकरणम्– १५ ॥

एकस्तोमो वा क्रतुसंयोगात्॥४३॥
सर्वेषां वा चोदनाविशेषात्प्रशंसा स्तोमानाम् ॥ ४४ ॥ (१५) ॥ २१ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने पञ्चमस्याध्यायस्य (पञ्चप्रयाजादीनामावृत्त्या वृद्धिरदाभ्यादीनामनावृत्त्या तदभाव इत्यादि निरूपणं नाम) तृतीयः पादः ॥ ५ ॥ ३ ॥

२-पाठक्रमापेक्षया श्रुत्यर्थयोर्बलवत्त्वाधि०-१॥

क्रमकोपोऽर्थशब्दाभ्यां श्रुतिविशेषादर्थपरत्वाच्च ॥ १ ॥

२ मुख्यक्रमेणाग्नेयस्य पूर्वमवदानाद्यनुष्ठानाधिकरणम्-२ ॥

अवदानाभिधारणाऽऽसादनेष्वानुपूर्व्यं प्रवृत्त्या स्यात् ॥ २ ॥ यथाप्रदानं वा तदर्थत्वात् ॥ ३ ॥ लिंग दर्शनाच्च ॥ ४ ॥

१ इष्टिसोमयोः पौर्वापर्यानियमाधि०-३॥

वचनादिष्टिपूर्वत्वम् ॥५॥ सोमश्चैकेषामग्न्याधेयस्यर्तुनक्षत्राऽतिक्रमवचनात्

तदर्थेनानर्थकं हि स्यात् ॥ ६ ॥
तदर्थवचनाच्च नाविशेषात्तदर्थत्वं
स्यात् ॥ ७ ॥ अयक्ष्यमाणस्य
च पवमानहविषां कालविधानादानन्त-
र्यांद्विशङ्का स्यात्॥८॥इष्टिरयक्ष्यमा-
णस्य तादर्थ्ये न सोमपूर्वत्वम् ॥ ९ ॥

१ ब्राह्मणस्यापीष्टिसोमयोः पौर्व्यापर्यानियमा-
धिकरणम्– ४ ॥

उत्कर्षाद्ब्राह्मणस्य सोमःस्यात्१०॥
पौर्णमासी वा श्रुतिसंयोगात्॥ ११ ॥
सर्वस्य चैककर्मत्वात् ॥१२॥ स्याद्वा

१ तादर्थ्ये सोमेति जै०न्या०पाठः ।

विधिस्तदर्थेन ॥ १३ ॥ प्रकरणात्तु कालः स्यात् ॥ १४ ॥

१ सोमकालबाधाधिकरणम्-५ ॥

स्वकाले स्यादविप्रतिषेधात् ॥ १५ अपनयो वाऽऽधानस्य सर्वकालत्वात् ॥ १६ ॥ पौर्णमास्यूर्ध्वं सोमाद्ब्राह्मणस्य वचनात् ॥ १७ ॥ एकं वा शब्दसामर्थ्यात्प्राक् कृत्स्नविधानम् ॥ १८ ॥

१ आज्यस्य सोमादनुत्कर्षाधि०-६ ॥

पुरोडाशस्त्वनिर्देशे तद्युक्ते देवताभावात् ॥ १९ ॥ आज्यमपीति

त् ॥ २० ॥ न मिश्रदेवतात्वादै-
द्राग्नवत् ॥ २१ ॥

१ विकृतानामैन्द्राग्नादीनां सद्यस्कालताधि-
करणम्–७ ॥

विकृतेः प्रकृतिकालत्वात्सद्यस्का-
लोत्तरा तातिस्तयोः प्रत्यक्षशिष्ट-
त्वात्॥२२॥द्वैयहकाल्ये तु यथान्या-
यम् ॥ २३ ॥ वचनाद्वैककाल्यं
स्यात् ॥ २४ ॥

१ सोमात्सान्नाय्यविकारादीनामुत्कर्षा-
धिकरणम्–८ ॥

सान्नाय्याग्नीषोमीयविकारादूर्ध्वं
सोमात्प्रकृतिवत् ॥ २५ ॥

१ सोमविकाराणां दर्शपूर्णमासाभ्यां प्रागक
र्तव्यताधिकरणम्—९ ॥

तथा सोमविकारा दर्शपूर्णमासा-
भ्याम् ॥ २ ॥ (९) ॥ ११ ॥

श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसा-
दर्शने पञ्चमस्याध्यायस्य (क्रमनिया-
मकश्रुत्यर्थपाठादीनां प्राबल्य-
दौर्बल्यविचारो नाम)
चतुर्थः पादः ॥ ५ ॥ ४ ॥
॥ पञ्चमोऽध्यायः संपूर्णः ॥

अथ षष्ठोऽध्यायः ॥

अत्र अन्धादिभिन्नस्य कर्तुरधिकार-विचारो निरूप्यते—

२ यागादिकर्मणां स्वर्गादिफलसाधनता-धिकरणम्—१ ॥

द्रव्याणां कर्मसंयोगे गुणत्वेनाऽभि-सम्बन्धः ॥ १ ॥ असाधकं तु ताद-र्थ्यात् ॥२ ॥ प्रत्यर्थं चाऽभिसंयोगात् कर्मतो ह्यभिसम्बन्धस्तस्मात्कर्मोप-देशः स्यात् ॥ ३ ॥

२ अशक्तानामधिकारनिराकरणाधि०—२॥

फलार्थत्वात्कर्मणः शास्त्रं सर्वाधि-

कारं स्यात् ॥ ४॥ क्रतुर्वा श्रुतिसंयोगाद्विधिः कार्त्स्न्येन गम्यते ॥ ५ ॥

२ स्त्रिया अनधिकारनिराकरणाधि०--३॥

लिंगविशेषनिर्देशात्पुंयुक्तमैतिशायनः ॥ ६ ॥ तदुक्तित्वाच्च दोषश्रुतिरविज्ञाने ॥ ७ ॥ जातिं तु बादरायणोऽविशेषात्तस्मात् स्त्र्यपि प्रतीयेत जात्यर्थस्याऽविशिष्टत्वात् ॥ ८ ॥ विभक्त्येति चेन्न ॥ ९ ॥ चोदितत्वाद्यथाश्रुति ॥ १० ॥ द्रव्यवत्त्वात्तु पुंसां स्याद्द्रव्यसंयुक्तं क्रयविक्रयाभ्यामद्रव्यत्वं स्त्रीणां द्रव्यैः समानयोगि-

त्वात् ॥ ११ ॥ तथा चाऽन्यार्थदर्श
नम् ॥ १२ ॥ तादर्थ्यात्कर्मताद-
र्थ्यम् ॥ १३ ॥ फलोत्साहाऽविशे-
षात्१४अर्थेन च समवेतत्वात्१५ ॥
क्रयस्य धर्ममात्रत्वम् ॥ १६ ॥

१ यागे दम्पत्योः सहाधिकाराधि०--४॥

स्ववतोस्तु वचनादैककर्म्यं
स्यात् ॥१७॥लिङ्गदर्शनाच्च ॥१८ ॥
क्रीतत्वात्तु भक्त्या स्वामित्वमुच्य-
ते॥१९॥फलार्थित्वात्तु स्वामित्वेनाऽ-

१ भाष्ये अविशेषात्तु इति पाठः ।

भिसम्बन्धः ॥ २० ॥ फलवत्तां
दर्शयति ॥ २१ ॥

१ आधाने पुरुषद्वयादिकर्तृत्वनिराकरणा-
धिकरणम्-५ ॥

द्व्याधानं च द्वियज्ञवत् ॥ २२ ॥
गुणस्य तु विधानत्वात्पत्न्या द्वितीय-
शब्दः स्यात् ॥ २३ ॥

१ पुंस एवोपस्थानाद्यधिकाराधि०-६ ॥

तस्या यावदुक्तमाशीर्ब्रह्मचर्यमतु-
ल्यत्वात् ॥ २४ ॥

२ शूद्रस्यानधिकाराधिकरणम्-७ ॥

चातुर्वर्ण्यमविशेषात् ॥ २५ ॥

निर्देशाद्वा त्रयाणां स्यादग्न्याधेये सम्बन्धः क्रतुषु ब्राह्मणश्रुतेरित्या-त्रेयः॥२६॥निमित्तार्थे च बादरिस्त-स्मात्सर्वाधिकारः स्यात् ॥ २७ ॥ अपि वाऽन्यार्थदर्शनाद्यथाश्रुति प्रती-येत॥२८॥निर्देशात्तु पक्षे स्यात्२९॥ वैगुण्यान्नेति चेत् ॥ ३० ॥ न काम्यत्वात् ॥ ३१ ॥ संस्कारे च तत्प्रधानत्वात् ॥ ३२ ॥ अपि व वेदनिर्देशादपशूद्राणां प्रतीयेत॥३३॥ गुणार्थित्वान्नेति चेत् ॥ ३४ ॥ सं-

(१) णार्थत्वेति वृत्तौ पाठः।

स्कारस्य तदर्थत्वाद्विद्यायां पुरुष-श्रुतिः ॥ ३५ ॥ विद्यानिर्देशान्नेति चेत् ॥३६॥ अवैद्यत्वादभावः कर्मणि स्यात् ॥ ३७ ॥ तथा चान्यार्थदर्शनम् ॥ ३८ ॥

१ निर्धनाधिकाराधिकरणम्–८ ॥

त्रयाणां द्रव्यसम्पन्नः कर्मणो द्रव्यसिद्धित्वात्॥ ३९ ॥ अनित्यत्वात्तु नैवं स्यादर्थाद्धि द्रव्यसंयोगः॥४०॥

१ अंगहीनाधिकाराधिकरणम्–९ ॥

अंगहीनश्च तद्धर्मा ॥ ४१ ॥

१ अचिकित्स्यांगवैकल्यस्यानाधिकाराधिकरणम्—१० ॥

उत्पत्तौ नित्यसंयोगात् ॥ ४२ ॥

१ दर्शपूर्णमासयोस्त्र्यार्षेयस्यैवाधिकाराधिकरणम्—११ ॥

अत्र्यार्षेयस्य हानं स्यात् ॥४३॥

१ रथकाराधिकाराधिकरणम्—१२ ॥

वचनाद्रथकारस्याधाने सर्वशेषत्वात् ॥ ४४ ॥ न्यायो वा कर्मसंयोगाच्छूद्रस्य प्रतिषिद्धत्वात् ॥ ४५ ॥ अकर्मत्वात्तु नैवं स्यात् ॥ ४६ ॥ आनर्थक्यं च संयोगात् ॥ ४७॥ गुणा-

र्थमिति चेत् ॥ ४८ ॥ उक्तमनिमित्तत्वम् ॥ ४९ ॥ सोधन्वनास्तु हीनत्वान्मन्त्रवर्णात्प्रतीयेरन् ॥ ५० ॥

१ निषादस्थपत्यधिकरणम्- १३ ॥

स्थपतिर्निषादः स्याच्छब्दसामर्थ्यात् ॥ ५१ ॥ लिंगदर्शनाच्च ॥ ५२ ॥ (१३) ॥ १८ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने षष्ठस्याध्यायस्य (कर्माधिकारनिरूपणं नाम) प्रथमः पादः ॥ ६ ॥ १ ॥

१ प्रत्येकस्य सत्रिणः फलसम्बन्धा०-१ ॥

पुरुषार्थैकसिद्धित्वात्तस्यतस्याधि-

कारः स्यात् ॥ १ ॥ अपि वोत्पत्तिसंयोगाद्यथा स्यात्सर्वंदर्शनं तथाभावो विभागे स्यात् ॥ २ ॥

२ दर्शादौ कर्त्रैक्ये नियमाधिकरणम्—२॥

प्रयोगे पुरुषश्रुतेर्यथाकामी प्रयोगे स्यात् ॥ ३ ॥ प्रत्यर्थं श्रुतिभाव इति चेत् ॥४॥ तादर्थ्ये न गुणार्थताऽनुक्तेऽर्थान्तरत्वात्कर्तुःप्रधानभूतत्वात् ॥ ५ ॥ चोदनैकत्वात् ॥६॥ अपि वा कामसंयोगे सम्बन्धात् प्रयोगायोपदि-

१ रसत्वदेति रसवदेति च अपपाठः ।

अन्यस्यादीति चेदित्येवं नञं विहायापि पाठो जै० न्या० मा० ।

इयेत प्रत्यर्थं हि विधिश्रुतिर्विषाणा-
वत्॥ ७ ॥ अन्यस्यापीति चेन्न॥८॥
अन्यार्थेनाभिसम्बन्धः ॥ ९ ॥ फल-
कामो निमित्तमिति चेत् ॥ १० ॥
न नित्यत्वात् ॥ ११ ॥ कर्म तथेति
चेत् ॥ १२ ॥ न समवायात्॥ १३॥

१ आरब्धकाम्यकर्मणोऽपि समाप्तिनियमा-
धिकरणम्- ३ ॥

प्रक्रमात्तु नियम्येतारम्भस्य क्रिया-
निमित्तत्वात् ॥१४॥ फलार्थित्वाद्वाऽ
नियमो यथानुपक्रान्ते ॥ १५ ॥ नियः-

मो वा तन्निमित्तत्वात्कर्तुस्तत्का-
रणं स्यात् ॥ १६ ॥

१ लौकिककर्मणि आरब्धेपि समाप्त्यनियमाधिकरणम्— ४ ॥

लोके कर्मणि वेदवत्ततोऽधिपुरुषज्ञानम् ॥ १७ ॥ अपराधेऽपि च तैःशास्त्रम् ॥ १८ ॥ अशास्त्रात्तूपसम्प्राप्तिः शास्त्रं स्यान्न प्रकल्पकं तस्मादर्थेन गम्येताप्राप्ते शास्त्रमर्थवत् ॥ १९ ॥ दैवताश्रये च ॥ २० ॥

---

[1] इदं सूत्रमाधिकं वृत्तिग्रन्थे पठयते, भाष्यग्रन्थे वार्तिकग्रन्थे जै॰ न्या॰ मा॰ च न दृश्यते ॥

२ प्रतिषिद्धकर्मणामनुष्ठानेऽनिष्टप्राप्त्यधिकरणम्– ८ ॥

प्रतिषेधेष्वकर्मत्वात्क्रिया स्यात् प्रतिषिद्धानां विभक्तत्वादकर्मणाम् २१ शास्त्राणां त्वर्थवत्त्वेन पुरुषार्थौ विधीयेत तयोरसमवायित्वात्तादर्थ्ये विध्यतिक्रमः ॥ २२ ॥

१ गुर्वनुगमनादीनामुपनयनोत्तरकालकर्तव्यताधिकरणम्–६ ॥

तस्मिंस्तु शिष्यमाणानि जननेन प्रवर्तेरन् ॥ २३ ॥ अपि वा वेदतुल्यत्वादुपायेन प्रवर्तेरन् ॥ २४ ॥

१ अग्निहोत्रादियावज्जीवकर्मणां स्वकाल-
मात्रकर्तव्यताधिकरणम्-७ ॥

अभ्यासोऽकर्मशेषत्वात् पुरुषार्थो विधीयते ॥ २५ ॥ एतस्मिन्नसंभवन्नर्थात् ॥ २६ ॥ न कालेभ्य उपदिश्यन्ते॥ २७ ॥ दर्शनात्काललिंगानां कालविधानम् ॥ २८ ॥

१ अग्निहोत्रादीनां स्वकालावृत्त्यावृत्त्यधि-
करणम्-८ ॥

तेषामौत्पत्तिकत्वादागमेन प्रवर्तेत॥२९॥तथा हि लिंगदर्शनम्॥३०॥

१ 'दर्शादौ भेदादिनिमित्तावृत्त्या होमावृत्त्यधिकरणम्-९ ॥

तथान्तःक्रतु युक्तानि ॥ ३१ ॥

१ गुर्वनुगमादीनां प्रतिनिमित्तमावृत्त्यधिकरणम्- १० ॥

आचाराद्गृह्यमाणेषु तथा स्यात्पुरुषार्थत्वात् ॥ ३२ ॥

१ ऋणत्रयापाकरणस्य त्रैवर्ण्यानां नित्यताधिकरणम्- ११ ॥

ब्राह्मणस्य तु सोमविद्याप्रजमृणवाक्येन संयोगात् ॥ ३३ ॥ (११) ॥ १३ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने षष्ठस्याध्यायस्य (फलकर्त्रैक्यारब्ध-

समापनादिकर्तृधर्मनिरूपणं नाम)
द्वितीयः पादः ॥ ६ ॥ २ ॥

१ नित्ये यथाशक्त्यङ्गानुष्ठानाधि०– १ ॥

सर्वशक्तौ प्रवृत्तिः स्यात्तथाभूतोपदेशात् ॥ १ ॥ अपि वाऽप्येकदेशे स्यात्प्रधाने ह्यर्थनिर्वृत्तिर्गुणमात्रमितरत्र तदर्थत्वात् ॥ २ ॥ तदकर्माणि च दोषस्तस्मात्ततो विशेषःस्यात्प्रधानेनाऽभिसम्बन्धात् ॥ ३ ॥ कर्माऽभेदं तु जैमिनिः प्रयोगवचनैकत्वात् सर्वेषामुपदेशः स्यात् ॥४ ॥ अर्थस्य व्यपवर्गित्वादेकस्यापि प्रयोगे स्याद्यथा क्रत्वन्तरेषु ॥ ५ ॥ विध्यपराधे

च दर्शनात्समाप्तेः ॥ ६ ॥ प्रायश्चित्तविधानाच्च ॥ ७ ॥

२ अङ्गवैकल्ये काम्यस्य निष्फलत्वाधिकरणम्- २ ॥

काम्येषु चैवमार्थित्वात् ॥ ८ ॥ असंयोगात्तु नैवं स्याद्विधेः शब्दप्रमाणत्वात् ॥ ९ ॥ अकर्मणि चाप्रत्यवायात् ॥ १० ॥

३ द्रव्यभेदेऽपि कर्माभेदाधिकरणम्-३ ॥

क्रियाणामाश्रितत्वाद्द्रव्यान्तरे विभागः स्यात् ॥ ११ ॥ अपि वाऽव्यतिरेकाद्रूपशब्दाविभागाच्च गोत्ववदेक-

कर्म्यं स्यान्नामधेयं च सत्त्ववत्॥ १२॥

१ द्रव्यापचारे प्रतिनिधिना समापनाधिक-
रणम्--४ ॥

श्रुतिप्रमाणत्वाच्छिष्टाभावेऽनागमोऽन्यस्याऽशिष्टत्वात्॥ १३॥ कचिद्विधानाच्च ॥ १४॥ आगमो वा चोदनार्थाविशेषात् ॥ १५ ॥ नियमार्थः कचिद्विधिः ॥ १६ ॥ तन्नित्यं तच्चिकीर्षा हि ॥ १७ ॥

१ देवतामन्त्रक्रियापचारे प्रतिनिध्यभावाधिकरणम्--५ ॥

न देवताग्निशब्दक्रियमन्यार्थसंयो-

गात् ॥ १८ ॥ देवतायां च तदर्थ-
त्वात् ॥ १९ ॥

१ प्रतिषिद्धद्रव्यस्य प्रतिनिधित्वाभावाधि-
करणम्--६ ॥

प्रतिषिद्धं चाविशेषेण हि तच्छ्रु-
तिः ॥ २० ॥

१ स्वामिनः प्रतिनिध्यभावाधिकरणम्--७॥

तथा स्वामिनः फलसमवायात्
फलस्य कर्मयोगित्वात् ॥ २१ ॥

१ कस्यचित्स्वामिनोपचारे प्रतिनिध्यादा-
नाधिकरणम्--८ ॥

बहूनां तु प्रवृत्तावन्यमागमयेदवै-
गुण्यात् ॥ २२ ॥

(१) हित्यस्य स्थाने चेति पाठो वृत्तिग्रन्थे ।

१ प्रतिनिहितस्यास्वामित्वाधि०-९ ॥

स स्वामी स्यात्संयोगात्॥ २३॥ कर्मकरो वा क्रीतत्वात् ॥ २४ ॥ तस्मिंश्च फलदर्शनात् ॥ २५ ॥

१ सत्रे प्रतिनिहितस्य यजमानधर्मग्राहिताधिकरणम्—२० ॥

स तद्धर्मा स्यात्तत्कर्मसंयोगात् २६॥

१ श्रुतद्रव्यापचारे तत्सदृशस्यैव प्रतिनिधित्वाधिकरणम्—११ ॥

सामान्यं तच्चिकीर्षा हि ॥ २७ ॥

१ द्रव्यापचारे वैकल्पिकद्रव्यान्तरानुपादानाधिकरणम्—१२ ॥

निर्देशात्तु विकल्पे यत्प्रवृत्तम् २८ अशब्दमिति चेत् ॥ २९ ॥ नाऽन-

ङ्गत्वात्॥ ३० ॥ संस्काराश्च खादिरे कर्तव्याः ॥ ३१ ॥

१ पूतिकस्य सोमप्रतिनिधित्वाधि०–१३॥

वचनाच्चाऽन्याय्यमभावे तत्सामान्येन प्रतिनिधिरभावादितरस्य॥३२॥

१ प्रतिनिध्यपचारे उपात्तद्रव्यसदृशस्य प्रतिनिधित्वाधिकरणम्–१४ ॥

न प्रतिनिधौ समत्वात् ॥ ३३ ॥

१ श्रुतस्यापि प्रतिनिधेरपचारे उपात्तसदृशस्य पुनःप्रतिनिधित्वाधिकरणम् १५–

स्याच्छ्रुतिलक्षणे नियतत्वात् ॥३४॥

न तदीप्सा हि ॥ ३५ ॥

---

१ इदं सूत्रं भाष्ये सूत्रत्वेन नोक्तम् । जै० न्या० मा० । वृत्तिग्रन्थे स्थितम् ।

१ मुख्यापचारे पुनस्तत्प्राप्तौ तस्यैवोपादानाधिकरणम्--१६ ॥

मुख्याधिगमे मुख्यमागमो हि तदभावात् ॥ ३६ ॥

१ प्रतिनिधिना प्रारब्धे कर्मणि श्रुतद्रव्यलाभेऽपि प्रतिनिधिनैव समापनाधि०--१७ ॥

प्रवृत्तेऽपीति चेत् ॥ ३७ ॥

१ प्रतिनिधौ पशौ वियुक्ते श्रुतद्रव्यलाभेऽपि प्रतिनिधिनैव समापनाधि०--१८ ॥

नाऽनर्थकत्वात् ॥ ३८ ॥

१ संस्कारायोग्यस्यापि मुख्यस्यैवोपादानाधिकरणम्--१९ ॥

---

१ इदं न भिन्नमधिकरणं किं तु पूर्वसूत्रेण सहैवैकमाधिकरणं वृत्तिग्रन्थे ॥

द्रव्यसंस्कारविरोधे द्रव्य तदर्थत्वात् ॥ ३९ ॥

१ मुख्यस्य कार्यासाधकत्वे प्रतिनिधेरेवोपादेयताधिकरणम्–२० ॥

अर्थद्रव्यविरोधेऽर्थो द्रव्याभावे तदुत्पत्तेर्द्रव्याणामर्थशेषत्वात् ॥ ४० ॥

२ प्रधाननिर्वाहकत्वेऽङ्गनिर्वाहपर्याप्तस्यापि मुख्यस्योपादानाधिकरणम्–२१ ॥

विधिरप्येकदेशे स्यात् ॥ ४१ ॥ अपि वाऽर्थस्य शक्यत्वादेकदेशेन निर्वर्त्येतार्थानामविभक्तत्वाद्गुणमात्रमितरत्त-

दर्थत्वात् ॥ ४२ ॥ (२१) ॥२३॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने षष्ठस्याध्यायस्य (क्वचित्प्रतिनिधि तदभावादिनिरूपणं नाम) तृतीयः पादः ॥ ॥ ६ ॥ ३ ॥

---

२ अवत्तनाशे पुनरवदानार्थं प्रतिनिध्यादानाधिकरणम्—१॥

शेषाद् द्व्यवदाननाशे स्यात्तदर्थत्वात् ॥ १ ॥

१ स्विष्टकृदर्थावत्तनाशे पुनरवदाननिराकरणाधिकरणम्—२ ॥

निर्देशाद्वाऽन्यदागमयेत् ॥ २ ॥

अपि वा शेषभाजां स्याद्विशिष्टकारणात् ॥ ३ ॥

१ ऋत्विजामेव शेषभक्षणाधि०- ३ ॥

निर्देशाच्छेषभक्षोऽन्यैः प्रधानवत् ॥ ४ ॥ सर्वैर्वा समवायात्स्यात् ॥५॥ निर्देशस्य गुणार्थत्वम् ॥६ ॥ प्रधाने श्रुतिलक्षणम् ॥ ७ ॥ अर्थवादिति चेत् ॥ ८॥ न चोदनाविरोधात् ॥९॥

२ कृत्स्नैकदेशभेदे प्रायश्चित्तानुष्ठानाधिकरणम्- ४ ॥

अर्थसमवायात्प्रायश्चित्तमेकदेशे-

---

१ अर्थवादिति पाठो जे० न्या० मा० ।

पि ॥ १० ॥ न त्वशेषे वैगुण्यात्तदर्थं हि ॥ ११ ॥ स्याद्वा प्राप्तनिमित्तत्वादतद्धर्मो नित्यसंयोगान्न हि तस्य गुणार्थत्वेनानित्यत्वात् ॥ १२ ॥ गुणानां च परार्थत्वाद्वचनाद्व्यपाश्रयः स्यात् ॥ १३ ॥ वचनाद्विकल्प इति चेन्न निमित्तार्थेन संभवात् ॥ १४ ॥ भेदार्थमिति चेन्नाशेषभूतत्वात्[2] ॥ १५ ॥ अनर्थकश्च सर्वनाशे स्यात् ॥ १६ ॥

---

१ इदं भाष्ये सूत्रत्वेन न धृतम् ।

२ नाशेषभूतत्वादित्यंशः थ सूत्रत्वेन वृत्तिग्रन्थे दृश्यते ।

१ क्षामे सर्वदाहे प्रायश्चित्तानुष्ठानाधिकरणम्- ५ ॥ (क्षामेष्टिन्यायः-)

क्षामे तु सर्वदाहे स्यादेकदेशस्याऽवर्जनीयत्वात् ॥ १७ ॥ दर्शनादेकदेशे स्यात् ॥ १८ ॥ अन्येन वैतच्छास्त्राद्धि कारणप्राप्तिः ॥ १९ ॥ तद्धविःशब्दान्नेति चेत्॥२०॥स्यादिज्यागामी हविःशब्दस्तल्लिङ्गसंयोगात् ॥ २१ ॥

२ एकहविरार्त्तावपि पञ्चशरावे निर्वापाधिकरणम्- ६ ॥

यथाश्रुतीति चेत् ॥ २२ ॥ न

क्षणात्वादुपपातो हि कारणम् ॥ २३ ॥

२ होमाभिषवोभयकर्त्तुरेव भक्षणाधि०--७॥

होमाभिषवभक्षणं च तद्वत् ॥ २४ ॥ उभाभ्यां वा न हि तयोर्धर्मशास्त्रम् ॥ २५ ॥

२ पुनराधानं प्रति वह्निद्वयस्य निमित्तताधिकरणम्--८ ॥

पुनराधेयमोदनवत् ॥ २६ ॥ द्रव्योत्पत्तेश्चोभयोः स्यात् ॥ २७ ॥

२ पञ्चशरावनिर्वापस्य कर्मान्तरताधिकरणम्--९ ॥

पञ्चशरावस्तु द्रव्यश्रुतेः प्रतिनि-

धिः स्यात् ॥ २८॥ चोदना वा द्रव्यदेवताविधिरवाच्ये हि ॥ २९ ॥

२ पञ्चशरावयागस्य नैमित्तिकदर्शयागाङ्गताधिकरणम्- १० ॥

स प्रत्यामनेत्स्थानात् ॥ ३० ॥ अङ्गविधिर्वा निमित्तसंयोगात् ॥ ३१ ॥

२ सत्रायाऽऽगूर्याप्रवृत्तस्य विश्वजिदावश्यकताधिकरणम्- ११ ॥

विश्वजि(त्स)दप्रवृत्ते भावः कर्मणि स्यात् ॥ ३२ ॥ निष्क्रयवादाच्च ॥ ३३ ॥

२ बर्हिर्वत्सयोः कालोपलक्षकताधि०-- १२ ॥

वत्ससंयोगे व्रतचोदना स्यात् ॥ ३४ ॥ कालो वोत्पन्नसंयोगाद्य-

थोक्तस्य[1] ॥ ३५ ॥ अर्थापरिमाणाच्च ॥३६॥ वत्सस्तु श्रुतिसंयोगात् तदंगं स्यात् ॥ ३७ ॥ कालस्तु स्यादचोदनात् ॥ ३८॥ अनर्थकश्च कर्मसंयोगे ॥ ३९ ॥ अवचनाच्च स्वशब्दस्य ४०

१ वत्सापाकरणस्य सन्नयदसन्नयदुभयसाधारणताधिकरणम्—१३ ॥

कालश्चेत्सन्नयत्पक्षे तल्लिंगसंयोगात् ॥ ४१ ॥ कालार्थत्वाद्वोभयोः प्रतीयेत ॥ ४२ ॥

---

१ यथोक्तस्येति क्वचित्पुस्तके नास्ति ।

२ सान्नाय्यरहितस्य शाखाहरणनिराक-
णाधिकरणम्-- १४ ॥

प्रस्तरे शाखाश्रयणवत् ॥ ४३ ॥
कालविधिरुभयोर्विद्यमानत्वात् ४४॥
अतत्संस्कारार्थत्वाच्च ॥ ४५ ॥
तस्माच्च विप्रयोगे स्यात् ॥ ४६ ॥
उपवेषश्च पक्षे स्यात् ॥ ४७ ॥(१४)
॥ २४ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने षष्ठस्याध्यायस्य (क्वचिद्द्रव्यलोपे ग्राह्यद्रव्यनिर्णयो नाम) चतुर्थः पादः ॥ ६ ॥ ४ ॥

२ दर्शाभ्युदयेष्टौ नैमित्तिकदेवतापनयाधिकरणम्--१ ॥

अभ्युदये कालापराधादिज्याचोदना स्याद्यथा पञ्चशरावे ॥ १ ॥ अपनयो वा विद्यमानत्वात् ॥ २ ॥ तद्रूपत्वाच्च शब्दानाम् ॥ ३ ॥ आतञ्चनाभ्यासस्य च दर्शनात् ॥ ४ ॥ अपूर्वत्वाद्विधानं स्यात् ॥ ५ ॥ पयोदोषात्पञ्चशरावेऽदुष्टं हीतरत् ॥ ६ ॥ सान्नाय्येऽपि तथेति चेत् ॥ ७ ॥ न तस्यादुष्टत्वादविशिष्टं हि कारणम् ॥ ८ ॥ लक्षणार्था शृतश्रुतिः ॥ ९ ॥

१ उपांशुयागेऽपि देवतापनयाधि०- २ ।

उपांशुयागेऽवचनाद्यथाप्रकृति वा ॥ १० ॥ अपनयो वा प्रवृत्त्या यथेतरेषाम् ॥ ११ ॥

१ अनिरुप्तेऽप्यभ्युदयेष्ट्यधिकरणम्-३ ॥

निरुप्ते स्यात्तत्संयोगात् ॥ १२ ॥ प्रवृत्ते प्रापणान्निमित्तस्य ॥ १३ ॥ लक्षणमात्रमितरत् ॥ १४ ॥ तथा चान्यार्थदर्शनम् ॥ १५ ॥

१ अनिरुप्तेऽभ्युदये वैकृतीभ्यो निर्वापाधिकरणम्-४ ॥

अनिरुप्तेऽभ्युदिते प्राकृतीभ्यो

निर्वपेदित्याश्मरथ्यस्तण्डुलभूतेष्वप-
नयात्॥१६॥ व्यूर्ध्वभाग्भ्यस्त्वालेख-
नस्तत्कारित्वाद्देवतापनयस्य ॥१७॥

२ किञ्चिन्निरुप्तेऽभ्युदयेऽवशिष्टस्य तूष्णीं
निर्वापाधिकरणम्—५ ॥

विनिरुप्ते न मुष्टीनामपनयस्तद्गुण-
त्वात् ॥ १८ ॥ अप्राकृतेन हि संयो-
गस्तत्स्थानीयत्वात् ॥ १९ ॥ अभा-
वाच्चेतरस्य स्यात् ॥ २० ॥

१ सन्नयदसन्नयदुभयस्यैवाभ्युदये प्राय-
श्चित्ताधिकरणम्—६ ॥

सान्नाय्यसंयोगात्सन्नयतः स्यात्
॥२१॥ औषधिसंयोगाद्वोभयोः २२ ॥

वैगुण्यान्नेति चेत् ॥ २३ ॥ नातत्संस्कारत्वात् ॥ २४ ॥

२ सत्राय प्रवृत्तमात्रस्य विश्वजिदाधिकरणम्-७ ॥

साम्युत्थाने विश्वजित्क्रीते विभागसंयोगात् ॥ २५ ॥ प्रवृत्ते वा प्रापणान्निमित्तस्य ॥ २६ ॥ आदेशार्थेतरा श्रुतिः ॥ २७ ॥

१ ज्योतिष्टोमे दीक्षापरिमाणानां वैकल्पिकत्वाधिकरणम्-८ ॥

दीक्षापरिमाणे यथाकाम्यविशेषात् ॥ २८ ॥

१ द्वादशाहे दीक्षापरिमाणनियमाधिकरणम्–९ ॥

द्वादशाहस्तु लिंगात्स्यात् ॥२९॥

२ गवामयने माघपौर्णमास्याः पुरस्ताद्दीक्षाधिकरणम्–१० ॥

पौर्णमास्यामनियमोऽविशेषात्॥३०॥ आनन्तर्यात्तु चैत्री स्यात् ॥ ३१ ॥ माघी वैकाष्टकाश्रुतेः ॥ ३२ ॥ अन्य अपीति चेत् ॥ ३३ ॥ न भक्तत्वादेषां हि लोके ॥ ३४ ॥ दीक्षापराधे चानुग्रहात् ॥ ३५ ॥ उत्थाने चानु-

प्ररोहात् ॥ ३६ ॥ अस्यां च सर्व लिंगानि ॥ ३७ ॥

१ दीक्षोत्कर्षे तन्नियमानामप्युत्कर्षाधि०--११

दीक्षाकालस्य शिष्टत्वादतिक्रमे नियतानामनुत्कर्षः प्राप्तकालत्वात् ॥ ३८ ॥ उत्कर्षो वा दीक्षितत्वादविशिष्टं हि कारणम् ॥ ३९ ॥

१ दीक्षानुवृत्तौ प्रतिहोमनिराकरणाधिरणम् १२

तत्र प्रतिहोमो न विद्यते यथा पूर्वेषाम् ॥ ४० ॥ कालप्राधान्याच्च ॥ ४१ ॥

१ उदवसानीयोत्कर्षेऽपि प्रतिहोमनिराकरणाधिकरणम्--१३ ॥

प्रतिषिद्धाच्चोर्ध्वमवभृथादिष्टेः ॥ ४२ ॥

१ प्रतिहोमे सायमग्निहोत्रप्रभृत्यारम्भा-
धिकरणम्—१४ ॥

प्रतिहोमश्चेत्सायम्प्रभृतीनि हूयेरन् ॥४३॥ प्रातस्तु षोडशिनि ॥ ४४ ॥

१ भेदनादिनिमित्तकहोमस्य दर्शपूर्णमासां-
गताधिकरणम्—१५ ॥

प्रायश्चित्तमधिकारे सर्वत्र दोषसामान्यात् ॥४५॥ प्रकरणे वा शब्दहेतुत्वात्॥४६॥अतद्विकाराच्च ॥४७॥

(व्यापन्नशब्दार्थनिर्णयाधिकरणम्—१६ ॥

व्यापन्नस्याप्सु गतौ यदभोज्यमार्याणां तत्प्रतीयेत ॥ ४८ ॥

२ अपच्छेदयौगपद्येपि प्रायश्चित्ताधि०-१७॥

विभागश्रुतेः प्रायश्चित्तं यौगपद्ये न विद्यते ॥४९॥ स्याद्वा प्राप्तनिमित्तत्वात्कालमात्रमेकम् ॥ ५० ॥

२ यौगपद्येऽदाक्षिण्यसर्वस्वदाक्षिण्याविकल्पाधिकरणम्-१८ ॥

तत्र विप्रतिषेधाद्विकल्पः स्यात ॥ ५१ ॥ प्रयोगान्तरे वोभयानुग्रहः स्यात॥५२॥न चैकसंयोगात॥५३॥

२ आनुपूर्व्येणापच्छेद उत्तरापच्छेदानिमित्तप्रायश्चित्तानुष्ठानाधिकरणम्-१९ ॥

पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्॥५४

अंहर्गणेयस्मिन्नपच्छेदस्तदावर्त्तितकर्म-
पृथक्त्वात् ॥ ५६ ॥ (२१) ॥ ३१ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसा-
दर्शने षष्ठस्याध्यायस्य (कालाद्यपराधे
इष्ट्यादिप्रायश्चित्तनिरूपणं नाम)
पञ्चमः पादः ॥ ६ ॥ ५ ॥

---

[1]त्वादौदुम्बरीवत् ॥ ४ ॥ न तत्प्रधा-
नत्वात् ॥ ५ ॥ औदुम्बर्याः परार्थ-
त्वात्कपालवत् ॥ ६ ॥ अन्येनापी-
ति चेत् ॥ ७ ॥ नैकत्वात्तस्य चान-

---

१ अत्र त्रुटितो ग्रंथः ।

धिकाराच्छब्दस्य चाविभक्तत्वात् ॥ ८ ॥ सन्निपातात्तु निमित्तविघातः स्याद्बृहद्रथन्तरवद्विभक्तशिष्टत्वाद्वसिष्ठनिर्वर्त्यें ॥ ९ ॥ अपि वा कृत्स्नसंयोगादविभागः प्रतीयेत स्वामित्वेनाभिसंबन्धस्तस्मात्तत्र विघातः स्यात् ॥ १० ॥ साम्नोः कर्मवदेकदेशेन संयोगो गुणत्वेनाभिसंबन्धस्तस्मात्तत्र विघातः स्यात् ॥ ११ ॥

२ भिन्नकल्पयोरपि राजपुरोहितयोः कुलाययज्ञोधिकाराधिकरणम्—२ ॥

वचनात्तु द्विसंयोगस्तस्मादेकस्य

१ घातात्बृहति वृत्तिग्रन्थे पाठान्तरम् ।

ाणिवत् ॥ १२ ॥ अर्थाभावात्तु
वं स्यात् ॥ १३ ॥ अर्थानां च विभ-
त्वान्न तच्छ्रुतेन संबन्धः ॥ १४ ॥
ाणेः प्रत्यङ्गभावादसंबन्धः प्रती-
ात ॥ १५ ॥

१ सत्रे ब्राह्मणमात्रस्याधिकाराधि०—३ ॥

सत्राणि सर्ववर्णानामविशेषात्
। १६ ॥ लिङ्गदर्शनाच्च ॥ १७ ॥
ाह्मणानां वेतरयोरार्त्विज्याभावात्
। १८ ॥ वचनादिति चेत् ॥ १९ ॥
ा स्वामित्वं हि विधीयते ॥ २० ॥

गार्हपते वा स्यात्तामाग्निप्रतिषेधात् ॥ २१ ॥ न वा कल्पविरोधात् ॥ २२ ॥ स्वामित्वादितरेषामहीने लिङ्गदर्शनम् ॥ २३ ॥

२ विश्वामित्रतत्समानकल्पानामेवाधिकाराधिकरणम्— ४ ॥

वासिष्ठानां वा ब्रह्मत्वानियमात् ॥ २४ ॥ सर्वेषां वा प्रतिप्रसवात् ॥ २५ ॥ वैश्वामित्रस्य हौत्रनियमाद्भृगुशुनकवसिष्ठानामनधिकारः ॥ २६ ॥

१ सत्रे आहिताग्नेरेवाधिकाराधि०— ५ ॥

विहारस्य प्रभुत्वादनग्नीनामपि

स्यात् ॥ २७ ॥ सारस्वते च दर्शनात् ॥ २८ ॥ प्रायश्चित्तविधानाच्च ॥२९॥ साग्नीनां वेष्टिपूर्वत्वात् ॥ ३० ॥ स्वार्थेन च प्रयुक्तत्वात् ॥ ३१ ॥ सन्निवापं च दर्शयति ॥ ३२ ॥

१ जुह्वादीनां साधारण्याधिकरणम्– ६ ॥

जुह्वादीनामप्रयुक्तत्वात्संदेहे यथाकामी प्रतीयते ॥ ३३ ॥ अपि वाऽन्यानि पात्राणि साधारणानि कुर्वीरन्विप्रतिषेधाच्छास्त्रकृतत्वात् ॥ ३४ ॥ प्रायश्चित्तमापदि स्यात् ॥ ३५ ॥

२ विकृतसप्तदशसामिधेनीषु वर्णत्रयाधि-
काराधिकरणम्-७ ॥

पुरुषकल्पेन विकृतौ कर्तृनियमः स्याद्यज्ञस्य तद्गुणत्वादभावादितरान्प्रत्येकस्मिन्नधिकारः स्यात् ॥ ३६ ॥ लिङ्गाच्चेज्याविशेषवत् ॥ ३७ ॥ न वा संयोगपृथक्त्वाद् गुणस्येज्याप्रधानत्वादसंयुक्ता हि चोदना ॥ ३८ ॥ इज्यायां तद्गुणत्वाद्विशेषेण नियम्येत ॥ ३९ ॥ (७) ॥ १२ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमी मांसादर्शने षष्ठस्या ध्यायस्य (सत्राधिकारिणो विप्रा एव तुल्यकल्पाश्चे त्यादिनिरूपणं नाम) षष्ठ पादः ॥ ६ ॥ ६ ॥

१ विश्वजिति पित्रादीनामदेयत्वाधि०—१ ॥

स्वदाने सर्वमविशेषात् ॥ १ ॥

यस्य वा प्रभुः स्यादितरस्याऽशक्यत्वात् ॥ २ ॥

१ विश्वजिति भूमेरदेयत्वाधि०—२ ॥

न भूमिः स्यात्सर्वान्प्रत्यविशिष्टत्वात् ॥ ३ ॥

१ विश्वजित्यश्वादीनामदेयताधि०—३ ॥

अकार्यत्वाच्च ततः पुनर्विशेषः स्यात् ॥ ४ ॥

१ विश्वजित्यविद्यमानसर्वस्वदाननिराकरणाधिकरणम्-४ ॥

नित्यत्वाच्चानित्यैर्नास्ति संबन्धः ॥५॥

१ विश्वजिति धर्मार्थसेवकशूद्रस्यादेयताधिकरणम्-५ ॥

शूद्रश्च धर्मशास्त्रत्वात् ॥ ६ ॥

१ विश्वजिति दक्षिणाकाले विद्यमानानामेव सर्वस्वानां देयताधिकरणम्-६ ॥

दक्षिणाकाले यत्स्वं तत्प्रतीयेत तद्दानसंयोगात् ॥ ७ ॥

२ विश्वजिति दक्षिणादानोत्तराङ्गानामनुष्ठानाधिकरणम्—७॥

अशेषत्वात्तदन्तः स्यात्कर्मणो द्रव्यसिद्धित्वात्॥८॥ अपि वा शेषकर्म स्यात्क्रतोः प्रत्यक्षशिष्टत्वात्॥९॥ तथा चान्यार्थदर्शनम्॥१०॥ अशेषं तु समञ्जसंमादाने शेषकर्म स्यात्॥ ११॥ नादानस्यानित्यत्वात्॥ १२॥ दीक्षासु विनिर्देशादक्रत्वर्थेन संयोगस्तस्मादविरोधः स्यात्॥ १३॥

१ साऽऽदानेनेति भाष्ये पाठः।

२ अहर्गणस्थेऽपि विश्वजिति सर्वस्वदानाधिकरणम्-८ ॥

अहर्गणे च तद्धर्मः स्यात्सर्वेषामविशेषात् ॥ १४ ॥ द्वादशशतं वा प्रकृतिवत् ॥१५॥ अतद्गुणत्वात्तु नैवं स्यात् ॥१६॥ लिङ्गदर्शनाच्च॥१७॥

१ विश्वजिति द्वादशशतन्यूनधनस्यानधिकाराधिकरणम्-९ ॥

विकारःसन्नुभयतोऽविशेषात् १८॥ अधिकं वा प्रतिप्रसवात् ॥ १९ ॥ अनुग्रहाच्च पादवत् ॥ २० ॥

२ अपरिमितशब्दस्य संख्यान्तरत्वाधि १० ॥

अपरिमिते शिष्टस्य सङ्ख्याप्रतिषेधस्तच्छ्रुतित्वात् ॥ २१ ॥ कल्पान्तरं वा तुल्यवत्प्रसङ्ख्यानात् ॥२२॥

१ अपरिमितशब्देन सहस्राधिकग्रहणाधिकरणम्– ११ ॥

अनियमोऽविशेषात् ॥ २३ ॥ अधिकं वा स्याद्बह्वर्थत्वादितरैः सन्निधानात् ॥ २४ ॥ अर्थवादश्च तदर्थवत् ॥ २५ ॥

१ इति ह स्मेत्यादिपरकृतिपुराकल्पानामर्थवादताधिकरणम्– १२ ॥

परकृतिपुराकल्पं च मनुष्यधर्मः

---

१ अत्र सूत्रे शिष्टस्येति पदं नास्ति वृत्तिग्रन्थे ।

स्यादर्थाय ह्यनुकीर्त्तनम् ॥ २६ ॥ तद्युक्ते च प्रतिषेधात् ॥ २७ ॥ निर्द्देशाद्वा तद्धर्मः स्यात्पञ्चावत्तवत् ॥ २८ ॥ विधौ तु वेदसंयोगादुपदेशः स्यात् ॥ २९ ॥ अर्थवादो वा विधिशेषत्वात्तस्मान्नित्यानुवादः स्यात् ॥ ३० ॥

८ सहस्रसंवत्सरशब्दस्य सहस्रदिनपरताधिकरणम्- १३ ॥

सहस्रसंवत्सरं तदायुषामसंभवान्मनुष्येषु ॥ ३१ ॥ उपचारोन्यार्थदर्शनम् ॥ ३२ ॥ अपि वा तदधिकारा-

१ वृत्तिग्रन्थे इदं सूत्रमधिकम् ।

न्मनुष्यधर्मः स्यात् ॥ ३३ ॥ नासामर्थ्यात् ॥ ३४ ॥ सम्बन्धादर्शनात् ॥ ३५ ॥ सकुल्यः स्यादिति कार्ष्णाजिनिरेकस्मिन्नसंभवात् ॥ ३६ ॥ अपि वाकृत्स्नसंयोगादेकस्यैव प्रयोगः स्यात् ॥ ३७ ॥ विप्रतिषेधात्तु गुण्यन्यतरः स्यादिति लावुकायनः ॥ ३८ ॥ संवत्सरो वा विचालित्वात् ॥ ३९ ॥ सा [1]प्रकृतिः स्यादधिकारात् ॥ ४० ॥

---

१ स प्रकृतिरिति वृत्तिग्रन्थे पाठान्तरम् ।

अहानि वाऽभिसंख्यात्वात् ॥ ४१ ॥ (१३) ॥ २३ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने षष्ठस्याध्यायस्य (देयाऽदेययोर्निरूपणं नाम) सप्तमः पादः ॥ ६ ॥ ७ ॥

---

२ चतुर्होतृहोमेऽनाहिताग्नेरेवाधिकराधिकरणम्--१ ॥

इष्टिपूर्वत्वादक्रतुशेषो होमः संस्कृतेष्वग्निषु स्यादपूर्वोऽप्याधानस्य सर्वशेषत्वात् ॥ १ ॥ इष्टित्वेन तु संस्तवश्चतुर्होतॄनसंस्कृतेषुदर्शयति॥२॥उपदेशस्त्वपूर्वत्वात् ॥ ३ ॥ स सर्वेषामविशेषात् ॥ ४ ॥ अपि वा क्रत्वभावादनाहिताग्नेरशेषभूतनिर्देशः ॥ ५॥

जपो वाऽनग्निसंयोगात् ॥ ६ ॥ इष्टित्वेन संस्तुते होमःस्यादनारभ्याग्निसंयोगादितरेषामवाच्यत्वात् ॥ ७ ॥ उभयोः पितृयज्ञवत् ॥ ८ ॥ निर्देशो वाऽनाहिताग्नेरनारभ्याग्निसंयोगात् ९॥ पितृयज्ञे संयुक्तस्य पुनर्वचनम्॥१०॥

२ अनाहिताग्निषूपयनहोमाधिकरणम् ०-२

उपनयन्नादधीत होमसंयोगात् ॥ ११॥ स्थपतिवल्लौकिके वा विद्याकर्मानुपूर्वत्वात् ॥ १२ ॥ आधानं च भार्यासंयुक्तम् ॥ १३ ॥ अकर्म चोर्ध्वमाधानात्तत्समवायो हि कर्मभिः॥१४॥ अकर्म च दाराक्रियाधानोत्तरः

काले ॥१५॥श्राद्धवदिति चेत॥१६॥ न श्रुतिविप्रतिषेधात् ॥ १७ ॥अर्थादन्यदेवेति चेत् ॥ १८॥ सर्वार्थत्वाच्च पुत्रार्थो न प्रयोजयेत् ॥ १९ ॥ सोमपानात्तु प्रापणं द्वितीयस्य तस्मादुपयच्छेत् ॥ २० ॥ पितृयज्ञे तु दर्शना-[३]त्प्रागाधानात्प्रतीयेत ॥ २१ ॥

१ अनाहिताग्नौ स्थपतीष्ट्यधिकरणम्-३॥

स्थपतीष्टिःप्रयाजवद्ग्न्याधेयं प्रयोजयेत्तादर्थ्याच्चापवृज्येत ॥ २२॥अपि

१ इदं सूत्रमधिकं वृत्तिग्रन्थे ।

२ स्वादपुत्रोति वृत्तिग्रन्थे पाठान्तरम् ।

३ दर्शनात्प्रतीति वृत्तिग्रन्थे पाठान्तरम् ।

वा लौकिकेऽग्नौ स्यादाधानस्यासर्वशेषत्वात् ॥ २३ ॥

१ अनाहितेऽग्नावकीर्णिपश्वनुष्ठानाधिकरणम्– ४ ॥

अवकीर्णिपशुश्च तद्वदाधानस्याप्राप्तकालत्वात् ॥ २४ ॥

१ दैवकर्मणामुदगयनादिकालताधि०–५॥

उदगयनपूर्वपक्षाहः पुण्याहेषु दैवानि स्मृतिरूपाण्यार्थदर्शनात् २५॥

अहनि च कर्मसाकल्यम् ॥ २६ ॥

१० पित्र्यकर्मणोऽपरक्षादिकालताधि०–६ ॥

इतरेषु तु पित्र्याणि ॥ २७ ॥

---

१ कीर्णी इति पाठान्तरं वृत्तिग्रन्थे ।

२ इदं सूत्रं भिन्नाधिकरणभूतमेकमधिकं वृत्तिग्रन्थे शाबरभाष्ये वार्तिके च ।

१ ज्योतिष्टोमांगयाच्ञाक्रययोर्नित्य-
ताधिकरणम्-६ ॥

याच्ञाक्रयणमविद्यमाने लोकवत् ॥२८॥ नियतं वार्थवत्त्वात्स्यात्२९॥

१ ज्योतिष्टोमादिषु पयोव्रतादीनामपि नित्य
ताधिकरणम्-७॥

तथा भक्षप्रैषाच्छादनसंज्ञप्तहोम-
द्वेषम् ॥ ३० ॥

१ अपररात्रे व्रतस्यानित्यताधिकरणम्-८॥

अनर्थकं त्वनित्यं स्यात् ॥ ३१॥

छागस्यैवाग्निषोमीयपशुताधिकरणम्—९ ॥

पशुचोदनायामनियमोऽविशेषात् ॥३२॥ छागो वा मन्त्रवर्णात् ॥३३॥ न चोदनाविरोधात् ॥ ३४ ॥ आर्षेयवदिति चेत् ॥ ३५ ॥ न तत्र ह्यचोदितत्वात् ॥ ३६ ॥ नियमो वैकार्थ्यं ह्यर्थभेदाद्भेदः पृथक्त्वेनाभिधानात् ॥ ३७ ॥ अनियमो वार्थान्तरत्वादन्यत्वं व्यतिरेकशब्दभेदाभ्याम् ॥ ३८ ॥ रूपालिंगाच्च ॥ ३९ ॥ छागेन कर्माख्या रूपलिंगाभ्याम् ॥ ४० ॥ रूपान्यत्वान्न जातिशब्दः

१ इदं सूत्रं वृत्तिग्रन्थे नास्ति ।

स्यात् ॥ ४१ ॥ विकारो[1] नौत्पत्तिकत्वात् ॥ ४२ ॥ स नैमित्तिकः पशोर्गुणस्याचोदितत्वात् ॥ ४३ ॥ जातेर्वा तत्प्रायवचनार्थवत्त्वाभ्याम् ४४(९)११

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने (उपनयनहोमस्थपतीष्ट्यादौ लौकिकाग्नौ होम इत्यादिविचारो नाम) षष्ठस्याध्यायस्याष्टमः पादः ॥ ६ ॥ ८ ॥

समाप्तश्च षष्ठोऽध्यायः ॥ ६ ॥

समाप्तं पूर्वषट्कम् ॥

---

१ विकार इति चेदिति चेत्पदं संयोज्यतदन्तं पृथक् सूत्रं वृत्तिग्रन्थे ।

अथ सप्तमोऽध्यायः ।

प्रत्यक्षवचनेनानुमितवचनेन च
सामान्यतोऽतिदेशो निरूप्यते ।

२ प्रयाजादिधर्माणामपूर्वप्रयुक्तताधि०–१॥

श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे[1] यथाधिकारं भावः स्यात्॥ १ ॥उत्पत्त्यर्थाविभागाद्वा सत्त्ववदेकधर्म्यं स्यात् ॥ २॥चोदनाशेषभावाद्वा तद्वा तद्भेदाद्व्यवतिष्ठेरन्नुत्पत्तेर्गुणभूतत्वात् ३ ॥ सत्त्वे लक्षणसंयोगात्सार्वत्रिकं प्रती-

[1] मुख्यभेदे इति पाठान्तरं वृत्तिग्रन्थे ।

येत ॥ ४ ॥ अविभागात्तु नैवं स्यात् ॥ ५ ॥ द्व्यर्थत्वं च विप्रतिसिद्धम् ॥ ६ ॥ उत्पत्तौ विध्यभावाद्वा चोदनायां प्रवृत्तिः स्यात्ततश्च कर्मभेदः स्यात् ॥ ७ ॥ यदि वाऽप्यभिधानवत्सामान्यात्सर्वधर्मः स्यात् ॥ ८ ॥ अर्थस्य त्वविभक्तत्वात्तथा स्यादभिधानेषु पूर्ववत्त्वात्प्रयोगस्य कर्मणः शब्दभाव्यत्वाद्विभागाच्छेषाणामप्रवृत्तिः स्यात् ॥ ९ ॥ स्मृतिरिति चेत् १०

१ सर्वसिद्धिः स्यादिति वृत्तिग्रन्थे पाठान्तरम् ।

२ अग्रिमसूत्रस्थं नञ्पदमत्रैव सङ्क्रान्त्ये वृत्तिग्रन्थे पठ्यते ।

न पूर्ववत्त्वात् ॥ ११ ॥ अर्थस्य शब्दभाव्यत्वात्प्रकरण निबन्धनाच्छब्दादेवान्यत्र भावः स्यात् ॥ १२ ॥

३ इषौ श्येनीयविशेषधर्मातिदेशाधि०– २ ॥

समाने पूर्ववत्त्वादुत्पन्नाधिकारः स्यात् ॥ १३ ॥ श्येनस्येति चेत् ॥ १४ ॥ नासन्निधानात् ॥ १५ ॥ अपि वा यद्यपूर्वत्वादितरदधिकार्थे ज्योतिष्टोमिकाद्विधेस्तद्वाचकं समानं स्यात् १६

२ पञ्चहविःषु सार्थवादविध्यतिदेशाधि०-३

पञ्चसञ्चरेष्वर्थवादातिदेशः सन्नि-

---

१ पूर्वत्वादित्ये सूत्रमिदं पठ्यते वृत्तिग्रन्थे ।

धानात् ॥ १७ ॥ सर्वस्य वैकंश-
ब्यात् ॥१८॥ लिंगदर्शनाच्च॥ १९॥
विहिताम्नानान्नेति चेत् ॥ २० ॥ ने-
तरार्थत्वात् ॥ २१ ॥

१ एककपालैन्द्राग्नयोः सार्थवादविध्याति-
देशाधिकरणम् ०-४

एककपालैन्द्राग्नो च तद्वत्॥२२॥

२ साकमेधे वारुणप्रघासिकैककपालाति-
देशाधिकरणम्-५ ॥

एककपालानां वैश्वदेविकः प्रकृ-
तिराग्रयणे सर्वहोमापरिवृत्तिदर्शना-

१ स्य चैकेति वृत्तिग्रन्थे पाठान्तरम् ।

दवभृथे च सकृद् द्यवदानस्य वच-
नात् ॥ २३ ॥ (८) ॥ १० ॥

॥ इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसा-
दर्शने (" समानमितरच्छ्येनेन " इत्यादि-
प्रत्यक्षवचनातिदेशो नाम) सप्तमस्या-
ध्यायस्य प्रथमःपादः॥ ७ ॥१॥

२ रथन्तरादिशब्दानां गानविशेषार्थता-
धिकरणम्—१ ॥

साम्नोऽभिधानशब्देन प्रवृत्तिः
स्याद्यथाशिष्टम् ॥ १ ॥ शब्दैस्त्वर्थ-
विधित्वादर्थान्तरेऽप्रवृत्तिः स्यात्पृथ-
ग्भावात्क्रियाया ह्याभिसंबन्धः ॥ २ ॥

स्वार्थं वा स्यात्प्रयोजनं क्रियायास्त-
दंगभावेनोपदिश्येरन् ॥ ३ ॥ शब्द-
मात्रमिति चेत् ॥ ४ ॥ नोत्पत्तिक-
त्वात् ॥ ५ ॥ शास्त्रं चैवमनर्थकं
स्यात् ॥ ६ ॥ स्वरस्येति चेत् ॥७॥
नार्थाभावाच्छुतेरसम्बन्धः ॥ ८ ॥
स्वरस्तूत्पत्तिषु स्यान्मात्रावर्णाविभ-
क्तत्वात् ॥९॥ लिङ्गदर्शनाच्च ॥१०॥
अश्रुतेस्तु विकारस्योत्तरासु यथाश्रु-
ति ॥ ११ ॥ शब्दानां चासामञ्जस्य-
म् ॥ १२ ॥ अपि तु कर्मशब्दः स्या-
द्भावोऽर्थः प्रसिद्धग्रहणत्वाद्विकारो

ह्यविशिष्टोऽन्यैः ॥ १३ ॥ अद्रव्यं चापि दृश्यते ॥ १४ ॥ तस्य च क्रिया ग्रहणार्था नानार्थेषु विरूपित्वादर्थो ह्यासामलौकिको विधानात् १५॥ तस्मिन्त्संज्ञाविशेषाः स्युर्विकारपृथक्त्वात् ॥ १६ ॥ योनिशस्याश्च तुल्यवादितराभिर्विधीयन्ते ॥ १७ ॥ अयोनौ चापि दृश्यतेऽतथायोनि ॥१८॥ ऐकार्थ्य[1] नास्ति वैरूप्यामिति चेत् ॥ १९ ॥ स्यादर्थान्तरेष्वनिष्पत्तेर्यथा[2] लोके ॥ २० ॥ शब्दा-

(१) एकार्थे इति वृत्तिग्रन्थे पाठान्तरम् ।
(२) यथा पाके इति वृत्तिग्रन्थे पाठान्तरम्

नांच समञ्जस्यम् २१॥ (१) ॥ २ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने (अपूर्वोक्तातिदेशशेषविचारो नाम) सप्तमस्याध्यायस्य द्वितीयः पादः ॥७॥२ ॥

---

३ अग्निहोत्रादिनाम्ना धर्मातिदेशाधि०—१॥

उक्तं क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्यात् ॥ १ ॥ अपूर्वे वापि भागित्वात् ॥ २ ॥ नाम्नस्त्वौत्पत्तिकत्वात्॥ ३ ॥प्रत्यक्षाद्गुणसंयोगात्क्रियाभिधानं स्यात्तदभावेऽप्रसिद्धं स्यात् ॥ ४ ॥

२प्रापणायनाम्ना धर्मानतिदेशाधि०—२ ॥

अपि वा सर्वत्र कर्माणि गुणार्थैषा श्रुतिः स्यात् ॥ ५ ॥

३ सर्वपृष्ठशब्देन षट्पृष्ठानामतिदेशाधिकरणम्—३ ॥

विश्वजिति सर्वपृष्ठे तत्पूर्वकत्वाज्ज्योतिष्टोमिकानि पृष्ठान्यस्ति चपृष्ठशब्दः ॥ ६ ॥ षडहाद्वा तत्र हि चोदनाः ॥ ७ ॥ लिंगाच्च[1] ॥ ८ ॥ उत्पन्नाधिकारो ज्योतिष्टोमः ॥ ९ ॥ द्वयोर्विधिरिति चेत् ॥ १० ॥ न व्यर्थत्वात्सर्वशब्दस्य ॥ ११ ॥

(१) लिङ्गदर्शनाच्चेति पाठान्तरं वृत्तिग्रन्थे।

३ अवभृथनाम्ना सौमिकधर्मातिदेशाधि०–४ ॥

तथावभृथः सोमात् ॥ १२ ॥ प्रकृतेरिति चेत् ॥ १३ ॥ न भक्तित्वात् ॥ १४ ॥ लिंगदर्शनाच्च ॥ १५ ॥

२ वारुणप्रघासिकावभृथस्य तुषनिष्कासद्रव्यकत्वाधिकरणम्–५ ॥

द्रव्यादेशे तद्द्रव्यः श्रुतिसंयोगात्पुरोडाशस्त्वनादेशे तत्प्रकृतित्वात् ॥ १६ ॥

२ वैष्णवशब्दादातिथ्ये धर्मानतिदेशाधिकरणम्–६ ॥

गुणविधिस्तु न गृह्णीयात्समत्वात् ॥ १७ ॥

१ निर्मन्थ्यादिशब्दैर्धर्मानतिदेशाधि०–७॥

निर्मन्थ्यादिषु चैवम् ॥ १८ ॥

१ प्रणयनशब्देन सौमिकधर्मानतिदेशाधिकरणम्–८॥

प्रणयनन्तु सौमिकमवाच्यं हीतरत् ॥ १९ ॥ उत्तरवेदिप्रतिषेधश्च तद्वत् ॥ २० ॥ प्राकृतं वाऽनामत्वात् ॥ २१ ॥ परिसङ्ख्यार्थं श्रवणं गुणार्थमर्थवादो वा ॥ २२ ॥

१ मध्यमयोर्द्वयोरेव प्रणयनाधि०–९॥

प्रथमोत्तमयोः प्रणयनमुत्तरवेदि-

(१) एकोनविंशसूत्रमारभ्य पञ्चविंशतितमसूत्रान्तमेकमधिकरणं वार्तिकमते।

प्रतिषेधात् ॥ २३ ॥ मध्यमयोर्वा गत्यर्थवादात् ॥ २४ ॥ औत्तरवेदिकोऽनारभ्यवादप्रतिषेधः ॥ २५ ॥

१ स्वरसामादिशब्देन धर्मातिदेशाधि०-१० ॥

स्वरसामैककपालामिक्षं च लिङ्गदर्शनात् ॥ २६ ॥ चोदनासामान्याद्वा ॥ २७ ॥

१ वासआदिशब्दानामाकृतिनिमित्तताधिकरणम्-११ ॥

कर्मजे कर्म यूपवत् ॥ २८ ॥ रूपं वाऽशेषभूतत्वात् ॥ २९ ॥

(१) इदं सूत्रं वृत्तिग्रन्थे नास्ति

१ गर्गत्रिरात्रे लौकिकेग्नावुपनिधानाधिकरणम्-१२ ॥

त्रिशये लौकिकः स्यात्सर्वार्थत्वात् ॥ ३० ॥ न वैदिकमर्थनिर्देशात् ॥ ३१ ॥ तथोत्पत्तिरितरेषां समत्वात् ॥ ३२ ॥

१ यूपशब्दस्य संस्कारप्रयोजकताधि०-१३ ॥

संस्कृतं स्यात्तच्छब्दत्वात् ॥ ३३ ॥ भक्त्या वाऽयज्ञशेषत्वाद्गुणानामभिधानत्वात् ॥ ३४ ॥

१ पृष्ठशब्दस्य ऋग्वेदवाचित्वाधि०-१४ ॥

---

१ धानादिति वृत्तिग्रन्थे पाठान्तरम् ।

कर्मणः पृष्ठशब्दः स्यात्तथाभूतोपदेशात् ॥ ३५ ॥ अभिधानोपदेशाद्वा विप्रतिषेधाद्द्रव्येषु पृष्ठशब्दः स्यात् ॥ ३६ ॥ (१४) ॥ २४ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने (अग्निहोत्रनाम्नाऽतिदेशो नाम) सप्तमस्याध्यायस्य तृतीयः पादः॥७॥३॥

---

१ सौर्ये चरावितिकर्तव्यतावत्त्वाधि०-१॥

इतिकर्तव्यताविधेर्यजतेः पूर्ववत्त्वम् ॥ १ ॥

१ सौर्ये चरौ वैदिकेतिकर्तव्यताधि०-२॥

स लौकिकः स्याद्दृष्टप्रवृत्तित्वात् ॥ २ ॥ वचनात्तु ततोऽन्यत्वम् ॥ ३ ॥ लिंगेन वा नियम्येत लिंगस्य तद्गुणत्वात् ॥ ४ ॥ अपि वाऽन्यायपूर्वत्वाद्यत्र नित्यानुवादवचनानि स्युः ॥ ५ ॥ मिथो विप्रतिषेधाच्च गुणानां यथार्थकल्पना स्यात् ॥ ६ ॥ भागित्वात्तु नियम्येत गुणानामभिधानत्वात्सम्बन्धादभिधानवद्यथा धेनुः किशोरेण ॥ ७ ॥ उत्पत्तीनां समत्वाद्वा यथाधिकारं भावः

---

१ लिङ्गस्येति पदं वृत्तिग्रन्थे नास्ति ।

स्यात् ॥ ८ ॥ उत्पत्तिशेषवचनं च विप्रतिषिद्धमेकस्मिन् ॥ ९ ॥ विध्यन्तो वा प्रकृतिवच्चोदनायां प्रवर्त्तेत[1] तथा हि लिंगदर्शनम् ॥ १० ॥ लिंगेहेतुत्वादलिंगे[2] लौकिकं स्यात् ॥ ११ ॥ लिंगस्य पूर्ववत्त्वाच्चोदनाशब्दसामान्यादेकेनापि निरूप्येत यथा स्थालीपुलाकेन ॥ १२ ॥

१ गवामयन ऐकाहिकेतिकर्तव्यतानुष्ठानाधिकरणम्- ३ ॥

द्वादशाहिकमहर्गणे तत्प्रकृतित्वा-

---

१ प्रवर्तते इति वृत्तिग्रन्थे पाठान्तरम् ।

२ लिंगस्य हेत्विति वृत्तिग्रन्थे पाठान्तरम् ।

देकाहिकमधिकागमात्तदाख्यं स्याद्
काहवत् ॥ १३ ॥ लिंगाच्च
॥ १४ ॥ न वा क्रत्वभिधानादधिका-
नामशब्दत्वम् ॥ १५ ॥ लिंगं सङ्घा-
तधर्मः स्यात्तदर्थापत्तेर्द्रव्यवत् ॥ १६ ॥
न वार्थधर्मत्वात्सङ्घातस्य गुणत्वात्
॥ १७ ॥ अर्थापत्तेर्द्रव्येषु धर्मलाभः
स्यात् ॥ १८ ॥ प्रवृत्त्या नियतस्य
लिंगदर्शनम् ॥ १९ ॥ विहारदर्शनं

१ धर्मः स्यात्सेति वृत्तिग्रन्थे पाठान्तरम् ।
२ दर्शनं चेति चकाराधिको वृत्तिग्रन्थे ।

विशिष्टस्यानारभ्यवादानां प्रकृत्यर्थत्वात् ॥ २० ॥ (३) ॥ ३ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने (निर्वापौषधद्रव्यातिदेशो नाम)
सप्तमस्याध्यायस्य चतुर्थः
पादः ॥ ७ ॥ ४ ॥
समाप्तः सप्तमोऽध्यायः ॥ ७ ॥

अथाष्टमोऽध्यायः ।

"तत्र सौर्यं चरुं निर्वपेद्" इत्यत्र निर्वापस्ताद्धितेन देवतानिर्देश एकदेवतात्वमौषधद्रव्यकत्वमिति लिङ्गेनाग्नेयपुरोडाशेतिकर्तव्यतैव नान्यस्येत्येवमादिर्विशेषतोऽतिदेशो निरूप्यते-

१ विशेषचिन्ताधिकरणम्– १ ॥

अथ विशेषलक्षणम् ॥ १ ॥

१ विशेषकर्मणो धर्मातिदेशाधि०– २ ॥

यस्य लिंगमर्थसंयोगादभिधानवत् ॥ २ ॥

३ सोम ऐष्टिकधर्मानतिदेशाधिकरणम्–
३ वर्णकद्वयम्– २ ॥

प्रवृत्तित्वादिष्टेः सोमे प्रवृत्तिः स्यात् ॥ ३ ॥ लिंगदर्शनाच्च ॥ ४ ॥ कृत्स्नविधानाद्वाऽपूर्वत्वम् ॥ ५ ॥ स्रुगभिघारणाभावस्य च नित्यानुवा

१ वृत्तत्वेति वृत्तिग्रन्थे पाठान्तरम् ।

दात् ॥ ६ ॥ विधिरिति चेत् ॥ ७ ॥ न वाक्यशेषत्वात् ॥ ७ ॥ शङ्कते चानुपोषणात् ॥ ९ ॥ दर्शनमैष्टिकानां स्यात् ॥ १० ॥

१ ऐन्द्राग्नादावैष्टिकधर्मातिदेशाधि०-४ ॥

इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः स्यात् ॥ ११ ॥

१ अग्नीषोमीयपशौ दार्शपूर्णमासिकधर्मातिदेशाधिकरणम्- ५ ॥

पशौ च लिंगदर्शनात् ॥ १२ ॥

१ सवनीयपशावग्नीषोमीयधर्मातिदेशाधिकरणम्- ६ ॥

दैक्षस्य चेतरेषु ॥ १३ ॥

१ ऐकादशिनपशौ समानधर्मातिदेशाधिकरणम्– ७ ॥

ऐकादशिनेषु सौत्यस्य द्वैरशन्यस्य दर्शनात् ॥ १४ ॥

१ पशुगणेष्वैकादशिनधर्मातिदेशाधि०–८

तत्प्रवृत्तिर्गणेषु स्यात्प्रतिपशु यूपदर्शनात् ॥ १५ ॥

१ अव्यक्तपशौ सौमिकधर्मातिदेशाधि०–९

अव्यक्तासु तु सोमस्य ॥ १६ ॥

१ अहर्गणेषु द्वादशाहिकधर्मातिदेशाधिकरणम्– १० ॥

गणेषु द्वादशस्य ॥ १७ ॥

---

१ शन्यदर्शेति पाठान्तरं वृत्तिग्रन्थे ।

१ संवत्सरसत्रेषु गवामयनिकधर्मातिदेशाधिकरणम्-११ ॥

गव्यस्य चं तदादिषु ॥ १८ ॥

१ निकायिनामुत्तरेषु पूर्वनिकायिधर्मातिदेशाधिकरणम्-१२ ॥

निकायिनां च पूर्वस्योत्तरेषु प्रवृत्तिः स्यात् ॥ १९ ॥

१ फलादीनामनतिदेशाधिकरणम्-१३ ॥

कर्मणस्त्वप्रवृत्तित्वात्फलनियमकर्तृसमुदायस्यानन्वयस्तद्बन्धनत्वात् ॥ ॥ २० ॥ प्रवृत्तौ[2] चापि ताद-

१ स्य चैतदोति पाठान्तरं वृत्तिग्रन्थे ।

२ त्तावपि इति पाठान्तरं वृत्तिग्रन्थे ।

थ्यात् ॥ २१ ॥ अश्रुतित्वाच्च ॥२२॥

१ गुणकामानां गोदोहनादीनामतिदेशाधिकरणम्– १४ ॥

गुणकामेष्वाश्रितत्वात्प्रवृत्तिः स्यात् ॥ २३ ॥ निवृत्तिर्वा कर्मभेदात् ॥२४॥ अपि वाऽतद्विकारत्वात्क्रत्वर्थत्वात्प्रवृत्तिः स्यात् ॥ २५ ॥

१ सौर्ये चरावाभिमर्शनद्वयस्य विकल्पाधिकरणम्–१५ ॥

एककर्मणि विकल्पोऽविभागो हि चोदनैकत्वात् ॥ २६ ॥

१ सौर्यचरावाग्नेयधर्मातिदेशाधि०–१६ ॥

लिङ्गसाधारण्याद्विकल्पः स्यात्२७

ऐकार्थ्याद्वा नियम्येत पूर्ववत्त्वाद्वि-कारो हि ॥ २८ ॥ अश्रुतित्वान्नेति चेत् ॥ २९ ॥ स्याल्लिंगभावात् ॥ ३० ॥ तथा चान्यार्थदर्शनम् ॥ ३१ ॥

१ हविर्देवतयोः सन्निपाते हविःसामान्यस्य बलीयस्त्वाधिकरणम्-- १७ ॥

विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपा[2]ख्यत्वात् ॥ ३२ ॥ तेन च कर्मसंयोगात् ॥ ३३ ॥ गुणत्वेन देवताश्रुतिः ॥ ३४ ॥

---

१ अ तत्वेति पाठान्तरं वृत्तिग्रन्थे ।

२ पाख्यत्वेति पाठान्तरं वृत्तिग्रन्थे ।

१ शतकृष्णलाख्याहिरण्ये औषधधर्मातिदेशाधिकरणम्– १८ ॥

हिरण्यमाज्यधर्मस्तेजस्त्वात् ॥ ३५ ॥ धर्मानुग्रहाच्च ॥ ३६ ॥ औषधं वा विशदत्वात् ॥ ३७ ॥ चरुशब्दाच्च ॥ ३८ ॥ तस्मिंश्च श्रपणश्रुतेः ॥ ३९ ॥

१ मधूदक उपांशुयाजीयाऽऽज्यधर्मातिदेशाधिकरणम्– १९ ॥

मधूदके द्रव्यसामान्यात्पयोविकारः स्यात् ॥ ४० ॥ आज्यं वा वर्णसामान्यात् ॥ ४१ ॥ धर्मानुग्रहाच्च ॥ ४२ ॥ पूर्वस्य चा[1]विशिष्ट-

---

१ चकाररहित पाठो द्वा॰ ग्रन्थे ।

स्यात् ॥ ४३ ॥ (१९) ॥ २१ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने (स्पष्टलिङ्गेनातिदेशविशेषनिरूपणं नाम) अष्टमस्याध्यायस्य प्रथम :पाद:॥८॥

---

१ ऐष्टिकसौत्रामण्योरैष्टिकधर्मातिदेशाधिकरणम्-१॥

वाजिने सोमपूर्वत्वं सौत्रामण्यां च ग्रहेषु ताच्छब्द्यात् ॥ १ ॥ अनुवषट्काराच्च ॥ २ ॥ समुपहूय भक्षणाच्च ॥३ ॥ क्रयणश्रपणपुरोरुगुपयामग्रहणासादनवासोपनहनञ्च तद्वत् ॥४॥ हविषा वा नियम्येत तद्विकारत्वात्५॥

प्रशंसा सोमशब्दः ॥ ६ ॥ वचनानीतराणि ॥७॥ व्यपदेशश्च तद्वत् ॥८॥ पशुपुरोडाशस्य च लिंगदर्शनम् ॥९॥

१ पशौ सान्नाय्यधर्मातिदेशाधि०— २ ॥

पशुः पुरोडाशविकारः स्याद्देवतासामान्यात् ॥ १० ॥ प्रोक्षणाच्च ॥ ११ ॥ पर्यग्निकरणाच्च ॥१२॥ सान्नाय्यं वा तत्प्रभवत्वात् ॥ १३ ॥ तस्य च पात्रदर्शनात् ॥ १४ ॥

१ पशौ पयोधर्मातिदेशाधिकरणम्—३ ॥

दध्नः स्यान्मूर्त्तिसामान्यात् ॥ १५ ॥ पयो वा कालसामान्यात् ॥ १६ ॥

पश्वानन्तर्यात् ॥ १७ ॥ द्रवत्वं चाविशिष्टम् ॥ १८ ॥

आमिक्षायां पयोधर्मातिदेशाधि०-४ ॥

आमिक्षोभयभाव्यत्वादुभयविकारः स्यात् ॥ १९ ॥ एकं वा चोदनैकत्वात् ॥ २० ॥ दधिसङ्घातसामान्यात् ॥ २१ ॥ पयो वा तत्प्रधानत्वाल्लोकवद्दध्नस्तदर्थत्वात् ॥ २२ ॥ धर्म्मानुग्रहाच्च ॥ २३ ॥ सद्योभावं[2] च दर्शयति ॥ २४ ॥

---

१ यांश्चेति पाठान्तरं वृत्तिग्रन्थे ।

२ इदं सूत्रमधिकं वृत्तिग्रन्थे पठ्यते ।

१ द्वादशाहे सत्राहीनयोर्व्यवस्थया धर्मातिदेशाधिकरणम्–९ ॥

सत्रमहीनश्च द्वादशाहस्तस्योभयथा प्रवृत्तिरेककर्म्यात् ॥ २५ ॥ अपि वा यजतिश्रुतेरहीनभूतप्रवृत्तिः स्यात्प्रकृत्या तुल्यशब्दत्वात् ॥ २६ ॥ द्विरात्रादीनामेकादशरात्रादहीनत्वं यजतिचोदनात् ॥ २७ ॥ [1]त्रयोदशरात्रादिषु सत्रभूतस्तेष्वासनोपायि चोदनात् ॥ २८ ॥ लिङ्गाच्च ॥ २९ ॥

---

१ इदं सूत्रं वृत्तिग्रन्थे नास्ति ।

२ पञ्चदशरात्रादिषु सत्रधर्मातिदेशाधि०–६॥

अन्यतरतोऽतिरात्रत्वात्पञ्चदशरात्रस्याहीनत्वं कुण्डपायिनामयनस्य च तद्भूतेष्वहीनत्वस्य दर्शनात्॥३०॥ अहीनवचनाच्च ॥ ३१ ॥ सत्रे[२] चोपायिचोदनात् ॥ ३२ ॥ सत्रलिङ्गं च दर्शयति ॥ ३३ ॥ (६) ॥ ७ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने (अस्पष्टलिंगैरतिदेशो नाम) अष्टमस्याध्यायस्य द्वितीयः पादः ॥८॥ २ ॥

---

१ त्वदर्शाति पाठान्तरं वृत्तिग्रन्थे ।

२ सत्रे चोपेयीति पाठान्तरं वृत्तिग्रन्थे ।

१ शुचिदेवक आग्नेयस्य आग्नावैष्णवे चाग्नीषोमीयस्य धर्मस्यातिदेशाधिकरणम्–१ ॥

हविर्गणे परमुत्तरस्य देशसामान्यात् ॥ १ ॥ देवतया वा नियम्येत शब्दवत्त्वादितरस्याश्रुतित्वात् ॥ २ ॥

१ जनकसप्तरात्रे त्रिवृत्स्वहस्सु द्वादशाहधर्मातिदेशाधिकरणम्–२ ॥

गणचोदनायां यस्य लिंगं तदावृत्तिः प्रतीयेताग्नेयवत् ॥ ३ ॥ नानाहानिवा सङ्घातत्वात्प्रवृत्तिर्लिंगे न चोदनात् ॥ ४ ॥ तथा चान्यार्थदर्शनम् ॥ ५ ॥

१ षट्त्रिंशद्रात्रे षडहधर्मातिदेशाधि०--३।

कालाभ्यासेऽपि बादरिः कर्मभेदात् ॥ ६ ॥ तदावृत्तिं तु जैमिनिरह्नामप्रत्यक्षसङ्ख्यत्वात् ॥ ७ ॥तस्मात्षडहाभ्यासः[1] ॥ ८ ॥

१ संस्थाशब्देषु द्वादशाहिकधर्मातिदेशाधिकरणम्--४ ॥

संस्थागणेषु तदभ्यासः प्रतीयेत कृतलक्षणग्रहणात् ॥ ९ ॥ अधिकाराद्वा प्रकृतिस्तद्विशिष्टा स्यादभिधानस्य तन्निमित्तत्वात् ॥ १० ॥

---

1 इदं सूत्रमधिकं वृत्तिग्रन्थे ।

१ शतोक्थ्यादौ ज्योतिष्टोमात्स्तोत्रोपचया-
धिकरणम्—५ ॥

गणादुपचयस्तत्प्रकृतित्वात् ॥ ११ ॥
एकाहाद्वा तेषां समत्वात्स्यात् ॥ १२ ॥

१ गायत्रीषूत्पत्तिगायत्रीणामतिदेशा-
धिकरणम्— ६ ॥

गायत्रीषु प्राकृतीनामवच्छेदःप्रवृ-
त्त्यधिकारात्सङ्ख्यात्वादग्निष्टोमवद-
व्यतिरेकात्तदाख्यत्वम् ॥ १३ ॥ तान्नि
त्यंवच्च पृथक्सतीषु तद्वचनम् ॥ १४ ॥
न विंशतौ दशेति चेत् ॥ १५ ॥

---

१ तन्नीत्यत्र तादिति पदरहितः पाठो वृत्तिग्रन्थे ।

ऐकसङ्ख्यमेव स्यात् ॥ १६ ॥ गुणाद्वा
द्रव्यशब्दः स्यादसर्वविषयत्वात् १७ ॥
गोत्ववच्च समन्वयः ॥ १८ ॥ सङ्ख्या
याश्च शब्दवत्त्वात् ॥ १९ ॥ इतर-
स्याश्रुतित्वाच्च ॥ २० ॥ द्रव्यान्तरेऽ
निवेशादुक्थ्यं लोपे[1] विशिष्टं स्यात् २१
अशास्त्रलक्षणत्वा[2]च्च ॥ २२ ॥ उत्पत्ति
नामधेयत्वाद्भक्त्या पृथक्सतीषु स्यात्[3]
॥ २३ ॥ वचनमिति चेत् ॥ २४ ॥

---

१ लोपे वीति वत्तिग्रन्थे पाठान्तरम् ।

२ त्वादीति चरहितःपाठो वृत्तिग्रन्थे ।

३ स्यादिति पदराहितं पाठांतरं वृत्तिग्रन्थे ।

यावदुक्तम् ॥ २५ ॥ अपूर्वे च विकल्पः स्याद्यदि सङ्ख्याविधानम् ॥ २६ ॥ ऋग्गुणत्वान्नेति चेत् ॥ २७ ॥ तथा पूर्ववति स्यात् ॥ २८ ॥ गुणावेशश्च सर्वत्र ॥ २९ ॥ निष्पन्नग्रहणान्नेति चेत् ॥ ३० ॥ तथेहापि स्यात् ॥ ३१ ॥ यदि वाऽविशये नियमः प्रकृत्युपबन्धाच्छरेष्वपि प्रसिद्धः स्यात् ॥ ३२ ॥ दृष्टः प्रयोग इति चेत् ॥ ३३ ॥ तथा शरेष्वपि ॥ ३४ ॥ भक्त्येति चेत् ॥ ३५ ॥

---

१ ग्रहान्नेतीति पाठान्तरं वृत्तिग्रन्थे ।

२ बन्धनाच्छरेष्वपीति वृत्तिग्रन्थे पाठान्तरम् ।

तथेरास्मिन् ॥ ३६ ॥ अर्थस्य चासमाप्तत्वान्न तासामेकदेशे स्यात्॥ ३७ ॥ (६) ॥ ७ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने (प्रबललिंगेनातिदेशो नाम) अष्टमस्याध्यायस्य तृतीयः पादः ॥ ८ ॥ ३ ॥

१ दार्विहोमशब्दस्य कर्मनामधेयताधि०-१

दार्विहोमो यज्ञाभिधानं होमसंयोगात् ॥ १ ॥

१ दार्विहोमशब्दस्य लौकिकवैदिकोभयकर्मनामधेयताधिकरणम्-२ ॥

स लौकिकानां स्यात्कर्तुस्तदाख्य

१ एतदाधिकरणशेषोत्र पञ्चसूत्राविर्नवमसूत्रान्तो ज्ञेयः ॥

त्यात् ॥ २ ॥ सर्वेषां वा दर्शनाद्वास्तु-
होमे ॥ ३ ॥

१ दर्विहोमशब्दस्य होमनोधयताधि०-३॥

जुहोतिचोदनानां वा सत्संयोगा-
त् ॥ ४ ॥

० सिंहावलोकितन्यायेन पुनरपि न प्रथमा-
धिकरणम् १ ॥

द्रव्योपदेशाद्वा गुणाभिधानं स्या-
त् ॥५ ॥ न लौकिकानामाचारग्रहण-
त्वाच्छब्दवतां चान्यार्थविधानात् ॥
॥ ६ ॥ दर्शनाच्चान्यपात्रस्य ॥ ७ ॥

१ प्रथमाधिकरणशेषोयं पञ्चमसूत्रादिनवमसूत्रा-
न्तो ग्रन्थः ।

तथाग्निहविषोः ॥ ८ ॥ उक्तश्चार्थेऽसम्बन्धः ॥ ९ ॥

१ दर्विहोमशब्दस्यापूर्वताधि०-४

तस्मिन्सोमः प्रवर्त्तेताव्यक्तत्वात् ॥ १० ॥ न वा स्वाहाकारेण संयोगाद्वषट्कारस्य च निर्देशात्तन्त्रेतेन विप्रतिषेधात् ॥ ११ ॥ शब्दान्तरत्वात् ॥१२॥ लिंगदर्शनाच्च ॥१३॥ उत्तरार्थस्तु स्वाहाकारो यथा साप्तदश्यं तत्राविप्रतिषिद्धा पुनः प्रवृत्तिलिंगदर्शनात्पशुवत् ॥ १४ ॥ अनु-

त्तरार्थो वाऽर्थवत्त्वादानर्थक्याद्धि प्राथम्यस्योपरोधः स्यात् ॥ १५ ॥ नप्रकृतावपीति चेत् ॥ १६ ॥ उक्तं समवाये पारदौर्बल्यम् ॥ १७ ॥ तच्चोदना चेष्टेः प्रवृत्तित्वाद्विधिःस्यात्॥१८॥ शब्दसामर्थ्याच्च ॥१९॥ लिंगदर्शनाच्च ॥२०॥ तत्राभावस्य हेतुत्वाद्गुणार्थे स्याददर्शनम् ॥२१॥ विधिरिति चेत् ॥२२॥ न वाक्यशेषत्वाद्गुणार्थे च समाधानं नानात्वेनोपपद्यते ॥ २३ ॥ येषां वाऽपरयोर्होमस्तेषां स्याद-

१ प्राकृतस्यो इति वृत्तिग्रन्थे पाठान्तरम् ।

विरोधात् ॥ २४ ॥ तत्रौषधानि चोद्यन्ते तानि स्थानेन गम्येरन् ॥ २५ ॥ लिंगाद्वा शेषहोमयोः ॥ २६ ॥ प्रतिपत्तौ तु ते भवतस्तस्मादतद्विकारत्वम् ॥ २७ ॥ सन्निपाते विरोधिनामप्रवृत्तिः प्रतीयेत विध्युत्पत्तिव्यवस्थानादर्थस्यापरिणेयत्वाद्वचनादतिदेशः स्यात् ॥ २८ ॥ (४) ॥ ४ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने (दर्विहोमेष्वतिदेशापवादो नाम) अष्टमस्याध्याय चतुर्थः पादः ॥ ८ ॥ ४ ॥

अष्टमोध्यायः समाप्तः ॥ ८ ॥

अथ नवमोऽध्यायः ।

अतिदिष्टेषूहानूहादिविचारो निरूप्यते–

१ अग्निहोत्रादिषूक्तानां धर्माणामपूर्वप्रयुक्तत्वाधिकरणम्–१ वर्णकत्रयम्–३ ॥

यज्ञकर्म प्रधानं तद्धि चोदनाभूतं तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वात् ॥ १ ॥

१ प्रोक्षणस्यापूर्वप्रयुक्तत्वाधिकरणम् २ वर्णकद्वये प्रथमं वर्णकम् १ ॥

संस्कारे युज्यमानानां तादर्थ्यात्तत्प्रयुक्तं स्यात् ॥ २ ॥

१ उच्चावचध्वनेः परमापूर्वाप्रयुक्तताधिकरणम् २ द्वितीयतृतीयवर्णके २–३ ॥

तेन त्वर्थेन यज्ञस्य संयोगाद्धर्मसम्बन्धस्तस्माद्यज्ञप्रयुक्तस्यात्संस्कारस्य तदर्थत्वात् ॥ ३ ॥

१ फलदेवतासम्बद्धधर्माणामप्यपूर्वप्रयुक्तत्वाधिकरणम्—३ ॥

फलदेवतयोश्च ॥ ४ ॥ न चोदनातो हि ताद्गुण्यम् ॥ ५ ॥

१ धर्माणामदेवताप्रयुक्तत्वाधि०—४ ॥

देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात् ॥ ६ ॥ अर्थपत्याच्च ॥ ७ ॥ ततश्च तेन सम्बन्धः ॥ ८ ॥

(१) अर्थपोति पाठान्तरं वृत्तिग्रन्थे ।

अपि वा शब्दपूर्वत्वाद्यज्ञकर्म प्रधानं स्याद्गुणत्वे देवताश्रुतिः ॥ ९ ॥ अतिथौ तत्प्रधानत्वमभावः कर्मणि स्यात्तस्य प्रीतिप्रधानत्वात् ॥ १० ॥

१ प्रोक्षणादीनामपूर्वप्रयुक्तत्वाधि०—९ ॥

द्रव्यसङ्ख्याहेतुसमुदायं वा श्रुतिसंयोगात् ॥ ११ ॥ अर्थकारिते च द्रव्येण न व्यवस्था स्यात् ॥ १२ ॥ अर्थो वा स्यात्प्रयोजनमितरेषामचोदनात्तस्य च गुणभूतत्वात् ॥ १३ ॥

१ तस्य गुणेतिचशब्दरहितं पाठान्तरं वृत्तिग्रन्थे ।

अपूर्वत्वाद्व्यवस्था स्यात् ॥ १४ ॥ तत्प्रयुक्तत्वे च धर्मस्य सर्वविषयत्वम् ॥ १५ ॥ नह्युक्तस्येति चेत् ॥ १६ ॥ नाश्रुतित्वात् ॥१७॥ अधिकारादिति चेत् ॥१८॥ तुल्येषु नाधिकारः स्यादचोदितश्च सम्बन्धः पृथक् सतां यज्ञार्थेनाभिसम्बन्धस्तस्माद्यज्ञप्रयोजनम् ॥ १९ ॥

१ अग्निष्टोमे उपांशुत्वस्य प्राचीनपदार्थप्रयुक्त्वाधिकरणम्--६ ॥

देशबद्धमुपांशुत्वं तेषां स्याच्छ्रुतिनिर्देशात्तस्य च तत्र भावात् ॥२०॥

(१) निर्देशेति पाठान्तरं वृत्तिग्रन्थे ।

यज्ञस्य वा तत्संयोगात् ॥ २१ ॥
अनुवादश्च तदर्थवत् ॥ २२ ॥

०वाङ्नियमस्यावान्तरापूर्वप्रयुक्तत्वाधि०—७ ॥

प्रणीतादि तथेति चेत् ॥ २३ ॥
न यज्ञस्याश्रुतित्वात् ॥ २४ ॥ तद्देशानां वा सङ्घातस्याचोदितत्वात् ॥ २५ ॥

१ इष्टकासु सकृद्विकर्षणाद्यनुष्ठानाधि०—८ ॥

अग्निधर्मः प्रतीष्टकं संघातात्पौर्ण-

---

१ इदमधिकरणं न पृथक्, किन्तु पूर्वाधिकरणेन सहैकमेवाधिकरणमिति—अधिकरणन्यायमालायाम् । शास्त्रदीपिकायामपि प्रणीतावाग्यमः षष्ठाधिकरण एवोक्तो न पृथक् । वृत्तिग्रथरीत्यां तु पृथगधिरकणम् ।

मासीवत् ॥ २६ ॥ अग्नेर्वा स्याद्द्रव्यैकत्वादितरासां तदर्थत्वात् ॥२७॥ चोदनासमुदायात्तु पौर्णमास्यां तथात्वं स्यात् ॥ २८ ॥

१ उत्तमान्येषामङ्गां पत्नीसंजायसंस्थाधिकरणम्-९ ॥

पत्नीसंयाजान्तत्वं सर्वेषामविशेषात् ॥ २९ ॥ लिंगाद्वा प्रागुत्तमात् ॥ ३० ॥ अनुवादो वा दीक्षा यथा नक्तं संस्थापनस्य ॥ ३१ ॥ स्याद्वाऽनारभ्य विधानादन्ते लिंगविरोधात् ॥ ३२ ॥

१ सामिधेनीनामभ्यासस्य स्थानधर्मताधिकरणम्— १० ॥

अभ्यासः सामिधेनीनां प्राथम्यात्स्थानधर्मः स्यात् ॥ ३३ ॥

१ सकृदारम्भणीयेष्ट्यनुष्ठानाधि०— ११ ॥

इष्ट्यावृत्तौ प्रयाजवदावर्त्तेतारम्भणीया ॥ ३४ ॥ सकृद्वाऽऽरम्भसंयोगादेकः पुनरारम्भो यावज्जीवप्रयोगात् ॥ ३५ ॥

१ निर्वापमन्त्रे सवित्रादिपदानामनूहाधिकरणम्—१२ ॥

अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात्तत्राचोदितमप्राप्तं चोदि-

ताभिधानात् ॥ ३६ ॥ तंतश्चावचनं तेषामितरार्थं प्रयुज्यते ॥ ३७ ॥

२ विकृतावग्निशब्दस्य तण्डुलनिर्वापमन्त्रे धान्यशब्दस्य चोहप्रदर्शकं चेति क्रमाद्वर्णकद्वयात्मकाधिकरणम्- १३ ॥

गुणशब्दस्तथेति चेत् ॥३८॥ न समवायात् ॥ ३९ ॥

१ इडोपाह्वानमन्त्रे यज्ञपतिशब्दस्यानूहाधिकरणम्- १४ ॥

चोदिते तु पदार्थत्वाद्विधिवदविकारः स्यात् ॥ ४० ॥

१ प्रस्तरप्रहरणसूक्तवाके यजमानपदस्योहाधिकरणम्- १५ ॥

---

१ वृत्तिग्रन्थे इदं सूत्रं नास्ति ।

विकारस्तत्प्रधाने स्यात् ॥ ४१ ॥

२ सुब्रह्मण्याह्वाननिगदे हरिवच्छब्दानूहस्य सोमक्रयसाधनकाण्डे तस्मै शृतम् इत्याद्यनूहस्य च, प्रदर्शकं वर्णकद्वयात्मकमधिकरणम्– १६ ॥

असंयोगात्तदर्थेषु तद्विशिष्टं प्रतीयेत ॥ ४२ ॥ कर्माभावादेवमिति चेत् ॥ ४३ ॥ न परार्थत्वात् ॥ ४४ ॥

१ सारस्वत्यां मेष्यामध्रिगुवचनानूहाधिकरणम्–१७ ॥

लिंगविशेषनिर्देशात्समानविधानेष्वप्राप्ता सारस्वती स्त्रीत्वात् ॥ ४५ ॥ पश्वभिधानाद्वा तद्धि चोदनाभूतं

पुंविषयं पुनः पशुत्वम् ॥ ४६ ॥ विशेषो वा तदर्थनिर्देशात् ॥ ४७ ॥ पशुत्वं चैकंशब्द्यात् ॥ ४८ ॥ यथोक्तं वा सन्निधानात् ॥ ४९ ॥

१ यज्ञायज्ञिये गिराशब्दस्थाने इराशब्दकर्तव्यताधिकरणम्–१८ ॥

आम्नातादन्यदधिकारे वचनाद्विकारः स्यात् ॥ ५० ॥ द्वैधं वा तुल्यहेतुत्वात्सामान्याद्विकल्पः स्यात् ॥ ५१ ॥ उपदेशाच्च साम्नः ॥ ५२ ॥ नियमो वा श्रुतिविशेषादितरत्सामदइयवत् ॥ ५३ ॥

---

१ एकशब्दादिति पाठान्तरम् ।

१ इराशब्दस्य प्रगीतताधि०—१९ ॥

अप्रगाणाच्छब्दान्यत्वे तथाभूतोपदेशः स्यात् ॥ ५४ ॥ यत्स्थाने वा तद्गीतिः स्यात्पदान्यत्वप्रधानत्वात् ॥ ५५ ॥ गानसंयोगाच्च ॥ ५६ ॥ वचनमिति चेत् ॥ ५७ ॥ न तत्प्रधानत्वात् ॥ ५८ ॥ (१९) ॥ १६ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने (उपोद्घातपूर्वकोहविचारारम्भो) नाम नवमस्याध्यायस्य प्रथमः पादः ॥ ९ ॥ १ ॥

---

२ गीतीनां सामनामत्वे ऊहग्रन्थस्य पौरुषेयत्वे च, क्रमेण वर्णकद्वयात्मकमधि०—१ ॥

सामानि मन्त्रमेके स्मृत्युपदेशा-
भ्याम् ॥ १ ॥ तदुक्तदोषम् ॥ २ ॥

१ साम्न ऋक्संस्कारकर्मताधि०– २ ॥

कर्म वा विधिलक्षणम् ॥ ३ ॥ त-
द्‌गृद्रव्यं वचनात्पाकयज्ञवत् ॥ ४ ॥
तत्राविप्रतिषिद्धो द्रव्यान्तरे व्यति-
रेकः प्रदेशश्च ॥ ५ ॥ शब्दार्थत्वात्तु
नैवं स्यात् ॥ ६ ॥ परार्थत्वाच्च शब्दा-
नाम् ॥ ७ ॥ असम्बन्धश्च कर्मणा
शब्दयोः पृथगर्थत्वात् ॥ ८ ॥ सं-
स्कारश्चाप्रकरणेऽग्निवत्स्यात्प्रयुक्तत्वा-
त् ॥ ९ ॥ अकार्य्यत्वाच्च शब्दानाम-

प्रयोगः प्रतीयेत ॥ १० ॥ आश्रितत्वाच्च ॥ ११ ॥ प्रयुज्यत इति चेत् ॥ १२ ॥ ग्रहणार्थं प्रतीयेत ॥ १३ ॥

१ त्र्यृचे प्रत्यृचं कृत्स्नसाम्नःसमापनाधि० ३ ॥

तृचे स्याच्छ्रुतिनिर्देशात् ॥ १४ ॥ शब्दार्थत्वाद्विकारस्य ॥ १५ ॥ दर्शयति च ॥ १६ ॥ वाक्यानां तु विभक्तत्वात्प्रतिशब्दं समाप्तिः स्यात्संस्कारस्य तदर्थत्वात् ॥ १७ ॥ तथा चान्यार्थदर्शनम् ॥ १८ ॥ अनवानो-

---

१ अश्रुतत्वाच्चेति क्वचित् पाठः ।

पदेशश्च तद्वत् ॥ १९ ॥ अभ्यासेने-
तरा श्रुतिः ॥ २० ॥

१ समास्वेव तिसृष्वक्षु गानाधि०–४ ॥

तदभ्यासः समासः स्यात् ॥ २१ ॥
लिङ्गदर्शनाच्च ॥ २२ ॥

१ उत्तराग्रन्थस्थयोर्ऋचोरेवोत्तरयोर्गायती-
त्यत्र ग्रहणाधि०९–[1]प्रथमवर्णकम् ॥ ,

नैमित्तिकं तूत्तरात्वमानन्तर्यात्प्र-

---

१ 'अत्र पञ्चमाधिकरणे २३-२४ तमसूत्रमुपन्यस्येदं प्रथमवर्णकमित्युक्त्वा, ततोऽतिजगत्यामभ्यस्यमानाय त्रिशोकगानाधिकरणमित्युक्त्वा पुनरपि २१-२२ २३ २४ तमसंख्याकान्येव सूत्राण्युपन्यस्य द्वितीयवर्णकमित्युक्तम्

तीयेत ॥ २३ ॥ ऐकार्थ्याच्च तद-
भ्यासः ॥ २४ ॥

४ बृहतीपङ्क्त्योरेव प्रग्रथनेन रथन्तरस्य बृहतीविष्टारपङ्क्त्योः प्रग्रथनेन रौरवयोधाजय साम्नोः अनुष्टुब्गायत्र्योः प्रग्रथनेन श्यावाश्वा-न्धीगवयोः, पादप्रग्रथनेन ब्रह्मसाम्नश्च, गानसा-धकं क्रमेण वर्णकचतुष्टयात्मकमाधिकरणम् ६॥

प्रागाथिकं तु ॥ २५ ॥ स्वे च ॥ २६ ॥ प्रगाथे च ॥२७॥ लिङ्ग-दर्शनाव्यतिरेकाच्च ॥ २८ ॥

१ गीतिसंपादकाक्षरविकारादीनां विकल्पा-धिकरणम्—७ ॥

अर्थैकत्वाद्विकल्पः स्यात् ॥२९॥

२ संज्ञैव स्तवे विधानस्य, प्रगीतयैवर्चा वहद्युपस्थानस्य याज्यानुवाक्यादीनां तानेन प्रयोगस्य च, साधकं क्रमेण वर्णकत्रयात्मकमधिकरणम्—८ ॥

अर्थैकत्वाद्विकल्पः स्यादृक्सामयोस्तदर्शत्वात् ॥ ३० ॥ वचनाद्विनियोगः स्यात् ॥ ३१ ॥

१ उत्तराऽवर्णवशेन गानाधिकरणम्—९ ॥

समप्रदेशे विकारस्तदपेक्षः स्याच्छास्त्रकृतत्वात् ॥ ३२ ॥ वर्णे तु बादरिर्यथाद्रव्यं द्रव्यव्यतिरेकात् ॥ ३३ ॥

१ उत्तरयोः स्तोभातिदेशाधिकरणम्—१० ॥

स्तोभस्यैके द्रव्यान्तरे निवृत्तिमृ-

ग्वत् ॥ ३४ ॥ सर्वातिदेशस्तु सामा-
न्याल्लोकवद्विकारः स्यात् ॥ ३५ ॥
अन्वयं चापि दर्शयति ॥ ३६ ॥ निवृ-
त्तिर्वाऽर्थलोपात् ॥ ३७ ॥ अन्वयो
वार्थवादः स्यात् ॥ ३८ ॥

१ स्तोभलक्षणाधिकरणम्– ११ ॥

अधिकं च विवर्णं च जैमिनिः
स्तोभशब्दत्वात् ॥ ३९ ॥

२ नीवारादिषु प्रोक्षणावघातादिधर्मानुष्ठा-
नाधिकरणम्– १२ ॥

धर्मस्यार्थकृतत्वाद्द्रव्यगुणविकार-
व्यतिक्रमप्रतिषेधे चोदनानुबन्धः सम-
वायात् ॥ ४० ॥

१ परिधौ यूपधर्मानुष्ठानाधिकरणम्-१३॥

तदुत्पत्तेस्तु निवृत्तिस्तत्कृतत्वात्स्यात् ॥ ४१ ॥ आवेश्येरन्वार्थवत्त्वात्संस्कारस्य तदर्थत्वात् ॥ ४२ ॥ आख्या चेवं तदावेशाद्विकृतौ स्यादपूर्वत्वात् ॥ ४३ ॥

१ शृतादौ प्रणीताधर्मानुष्ठनाधिकरणम्-१४॥

परार्थे न त्वर्थसामान्यं संस्कारस्य तदर्थत्वात् ॥ ४४ ॥ क्रियेरन्वार्थनिवृत्तेः ॥ ४५ ॥

१ बृहद्रथन्तरयोर्धर्मव्यवस्थाधिकरणम् १५॥

एकार्थत्वादविभागःस्यात् ॥ ४६ ॥

निर्देशाद्वा व्यवतिष्ठेरन् ॥ ४७ ॥

१ कण्वरथन्तरे बृहद्रन्तरधर्मसमुच्चयाधिकरणम्–१६ ॥

अप्राकृते तद्विकाराद्विरोधाद्व्यवतिष्ठेरन् ॥ ४८ ॥

१ द्विसामके बृहद्रथन्तरधर्मयोर्व्यवस्थाधिकरणम्– १७ ॥

उभयसाम्नि चैवमेकार्थापत्तेः ४९ ॥

स्यार्थत्वाद्वा व्यवस्था स्यात्प्रकृतिवत् ॥ ५० ॥

१ सौर्यादिषु पार्वणहोमाद्यननुष्ठानाधिकरणम्– १८ ॥

पार्वणहोमयोस्त्वप्रवृत्तिः समुदा-

यार्थसंयोगात्तदभोज्या हि ॥ ५१ ॥ कालस्येति चेत् ॥ ५२॥ नाप्रकरणत्वात् ॥ ५३ ॥ मन्त्रवर्णाच्च ॥५४॥ तदभावेऽग्निवदिति चेत् ॥ ५५ ॥ नाधिकारिकत्वात् ॥ ५६ ॥

१ दर्शपूर्णमासयोर्होमद्वयस्य व्यवस्थाधिकरणम्- १९ ॥

उभयोरविशेषात् ॥ ५७ ॥ पदभोज्या वा तद्विषयौ ॥ ५८॥

१समिदादीनां यागनामधेयताधि०-२० ॥

प्रयाजेऽपीति चेत् ॥ ५९ ना

चोदितत्वात् ॥ ६० ॥(२०)॥२८ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने (सपरिकरसामोहविचारो नाम) नवमस्याध्यायस्य द्वितीयः पादः ॥ ९ ॥ २॥

---

१ विकृतौ मन्त्रगताव्रीह्यादिशब्दानामूहाधिकरणम्—१ ॥

प्रकृतौ यथोत्पत्ति वचनमर्थानां[1] तथोत्तरस्यां ततौ[2] तत्प्रकृतित्वादर्थे चाकार्यत्वात् ॥ १ ॥ लिंगदर्शनाच्च॥२

२ पौंडरीकेषु बर्हिष्षु स्तरणमन्त्रोहाधि०२ ॥

जातिनैमित्तिकं यथास्थानम् ३ ॥

लिंगदर्शनाच्च[3] ॥ ४ ॥

---

१ र्थानामुत्तोति पाठ० । (२) तताविति नास्ति क्वचित् । (इदं सूत्रं वृत्तिग्रन्थेधिकं दृश्यते ।

अविकारमेकेऽनार्षत्वात् ॥ ५ ॥ लिंगदर्शनाच्च ॥ ६ ॥ विकारो वा तदुक्ते हेतुः ॥ ७ ॥ लिंगं मन्त्रचिकिर्षार्थम् ॥ ८ ॥ नियमो वोभयभागित्वात् ॥ ९ ॥

१ अग्नीषोमीयपशौ लौकिकयूपस्पर्शे प्रायश्चिताधिकरणम्--३ ॥

लौकिके दोषसंयोगादपवृक्ते हि चोद्यते निमित्तेन प्रकृतौ स्याद्भागित्वात् ॥ १० ॥

२ द्विपशुयागे पाशमन्त्रयोरेकवचनबहुवचनान्तयोर्द्विवचनान्तेनोहाधिकरणम्--४ ॥

१ समसंगादिति वृत्तिग्रन्थे पाठान्तरम् ।

अन्यायस्त्वविकारेण दृष्टप्रतिघातित्वादविशेषाच्च तेनास्य ॥ ११ ॥ विकारो वा तदर्थत्वात् ॥ १२॥ अपि त्वन्यायसम्बन्धात्प्रकृतिवत्परेष्वपि यथार्थं[1] स्यात् ॥ १३ ॥ यथार्थं[2] त्वन्यायस्याचोदितत्वात् ॥ १४ ॥ छन्दसि तु यथादृष्टम् ॥ १५ ॥ अन्यायस्या[3]चोदितत्वात् ॥ १६ ॥

१ अग्नीषोमीयपशौ पाशैकत्वबहुत्वाभिधायिमन्त्रयोर्विकल्पाधिकरणम्—९ ॥

---

१ न्याय्यसेति वृत्तिग्रन्थे पाठान्तरम् ।

२ र्थं चान्यायस्येति वृत्तिग्रन्थे पाठान्तरम् ।

३ इदं सूत्रं वृत्तिग्रन्थेऽधिकं दृश्यते ।

विप्रतिपत्तौ विकल्पः स्यात्तत्स मत्वाद्गुणे त्वन्यायकल्पनैकदेशत्वात् ॥ १७ ॥ प्रकरणाविशेषाच्च ॥ १८ ॥ उत्कर्षो वा द्वियज्ञवत् ॥१९॥ अर्थाभावात्तु नैवं स्याद्गुणमात्रमितरत् ॥ २० ॥ द्यावोस्तथेति चेत् ॥२१॥ नोत्पत्तिशब्दत्वात् ॥ २२ ॥

१ दर्शपूर्णमासयोर्द्विपत्नीके प्रयोगे " पत्नीं सन्नह्य " इति मन्त्रस्यानूहाधिकरणम्-६ ॥

अपूर्वे त्वविकारोऽप्रदेशात्प्रतीयेत ॥ २३ ॥

१ इदं सूत्रं वृत्तिग्रन्थेऽधिकं दृश्यते ।

१ द्विपत्नीके विकृतियागे "पत्नीं सन्नह्य" इति मन्त्रस्यानूहाधिकरणम्—७ ॥

विकृतौ चापि तद्वचनात् ॥ २४॥

१ सवनीयपशूनामग्नीषोमीयसमानविधानत्वे "प्रास्मा अग्निम्" इतिमन्त्रेऽनूहाधि०—८

अध्रिगुः सवनीयेषु तद्वत्समानविधानाश्चेत् ॥ २५ ॥

१ नीवाराणां व्रीहिप्रतिनिधित्वे मन्त्रे व्रीहिशब्दस्यानूहाधिकरणम्—९ ॥

प्रतिनिधौ चाविकारात् ॥ २६ ॥

अनाम्नानादशब्दत्वमभावाच्चेतरस्य

१ आध्रिगाविति जैमिनीयन्यायमालायां पाठान्तरम्

स्यात् ॥ २७ ॥ तादर्थ्याद्वा तदाख्यं स्यात्संस्कारैरविशिष्टत्वात् ॥ २८ ॥ उक्तं च तत्त्वमस्य ॥ २९ ॥

१ द्विपशुयागे "सूर्यं चक्षुर्गमयतात्" इत्यादिमन्त्राणामनूहाधिकरणम्-१० ॥

संसर्गिषु चार्थस्यास्थितपरिमाणत्वात् ॥ ३० ॥ लिङ्गदर्शनाच्च ॥ ३१ ॥

१ द्विपशुयागेऽध्रिगुप्रैषे "एकधा" इत्यस्याभ्यासाधिकरणम् ११ ॥

एकधेत्येकसंयोगादभ्यासेनाभिधानं स्यादसर्वविषयत्वात् ॥ ३२ ॥ अविकारो वा बहूनामेककर्मवत् ॥ ३३ ॥

सकृत्त्वं चैकध्यं स्यादेकत्वात्त्वचोऽनभिप्रेतं तत्प्रकृतित्वात्परेष्वभ्यासेनैवं[1] विवृद्धावभिधानं स्यात् ॥ ३४ ॥

३ द्विपश्वादिपशुविकृतौ मेधपतिशब्दस्य देवतानुसारेणोहाधि०—१२ ॥

मेधपतित्वं स्वामिदेवतस्य समवायात्सर्वत्र च प्रयुक्तत्वात्तस्यान्यायनिगदत्वात्सर्वत्रैवाविकारः स्यात् ॥ ३५ ॥ अपि वा द्विसमवायोऽर्थान्यत्वे यथासंख्यं प्रयोगः स्यात् ॥ ३६ ॥ स्वा-

---

१ त्वं वेकेति जैमि० न्या० पाठान्तरम् ।

२ सेन विब्रीति जैमि० न्या० पाठान्तरम् ।

मिनो वैकशब्द्यादुत्कर्षौ देवतायां स्या त्पत्न्यां द्वितीयशब्दः स्यात् ॥३७॥ देवता तु तदाशीष्ट्वात्सम्प्रातत्वात्स्वामिन्यनार्थिका स्यात् ॥ ३८ ॥ उत्सर्गाच्च भक्त्या तस्मिन्पतित्वं स्यात् ॥ ३९ ॥ उत्कृष्येतैकसंयुक्तौ द्विदेवते सम्भवात् ॥ ४० ॥ एकस्तु समवाया त्तस्य तल्लक्षणत्वात् ॥ ४१॥ संसर्गित्वाच्च तस्मात्तेन विकल्पः स्यात् ॥४२॥एकत्वेपि न गुणाऽपायात् ४३

---

१ इदं सूत्रमाधिकं जैमिनीयन्यायमालायाम् ।

१ बहुदेवत्ये पशावप्येकवचनान्तमेधपाति-
शब्दस्य विकल्पाधिकरणम्—१३ ॥

नियमो बहुदेवते विकारः स्यात् ॥४४॥ विकल्पो वा प्रकृतिवत् ॥४५॥

१ एकादशिन्यामेकवचनान्तमेधपतिशब्द-
स्योहाधिकरणम्—१४ ॥

अर्थान्तरे विकारः स्याद्देवतापृथक्त्वादेकाभिसमवायात्स्यात् ४६॥ (१४) ॥ १८ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने नवमस्याध्यायस्य
(मन्त्रोहविचारो नाम)
तृतीयः पादः ॥ ९॥३ ॥

३ "षड्विंशतिरस्य वङ्क्रयः" इत्यादौ समस्योहाधिकरणम्–१ ॥

षड्विंशतिरभ्यासेन पशुगणे तत्प्रकृतित्वाद्गुणस्य प्रविभक्तत्वादविकारे हि तासामकार्त्स्न्येनाभिसम्बन्धो विकाराद्य समासः स्यादसंयोगाच्च सर्वाभिः ॥ १ ॥ अभ्यासेऽपि तथेति चेत् ॥ २ ॥ न गुणादर्थकृतत्वाच्च ॥ ३ ॥ समासेऽपि तथेति चेत् ॥ ४ ॥ नासम्भवात् ॥ ५ ॥ स्वाभिश्च वचनं प्रकृतौ तथेह स्यात् ॥ ६ ॥ वङ्क्रीणान्तु प्रधानवत्त्व-

त्समासेनाभिधानं स्यात्प्राधान्यमाधि-
गोस्तदर्थत्वात् ॥ ७ ॥ तासां च-
कृत्स्नवचनात् ॥८॥ अपि त्वसन्निपा-
तित्वात्पत्नीवदाम्नातेनाभिधानं स्या-
त् ॥ ९ ॥ विकारस्तु प्रदेशत्वाद्यज-
मानवत् ॥ १० ॥ अपूर्वत्वात्तथा प-
त्न्याम् ॥ ११ ॥ आम्नातस्त्वविकारा-
त्सङ्ख्यासु सर्वगामित्वात् ॥१२॥
सङ्ख्या त्वेवं प्रधानं स्याद्गुणक्रयः पु-
नःप्रधानम् ॥ १३ ॥ अभ्यासो वाऽ-
विकारास्स्यात् ॥ १४ ॥ अनाम्नात-

१ इदं सूत्रं वृत्तिग्रन्थे नास्ति, भाष्यकृन्मते जै० न्या. मा. चास्ति ।

वचनमवचनेन हि वङ्क्रीणां स्यान्निर्देशः ॥ १५ ॥ पशुस्त्वेवं प्रधानं स्यादभ्यासस्य तन्निमितत्वात्तस्मात्समासशब्दः स्यात् ॥ १६ ॥

२ आश्वमेधिकसवनीयाश्वस्य चतुस्त्रिंशद्वङ्क्रिरूपविशेषवचनविकल्पाधिकरणम्-२

अश्वस्य चतुस्त्रिंशत्तस्य वचनाद्वैशेषिकम् ॥ १७ ॥

३ आश्वमेधिकसवनीयाश्वस्य चतुस्त्रिंशद्वङ्क्रिरूपविकल्पाधिकरणम्-३ ॥

तत्प्रतिषिध्य प्रकृतिर्नियुज्यते सा चतुस्त्रिंशद्वाच्यत्वात् ॥ १८ ॥ ऋग्वा

स्यादाम्नातत्वादविकल्पश्च न्यायः ॥ १९ ॥ तस्यां तु वचनादैरवत्पद-विकारः स्यात् ॥ २० ॥ सर्वप्रतिषेधो वा संयोगात्पदेन स्यात् ॥२१ ॥

२ अग्नीषोमीयपशावुरूकशब्दस्य वपापरत्वाधिकरणम्—४ ॥

वनिष्ठुसन्निधानादुरूकेण वपाभिधानम् ॥ २२ ॥

१ अग्निगौ प्रशसाशब्दस्य प्रशंसापरत्वाधिकरणम्—५ ॥

प्रशंसाऽस्यभिधानम् ॥ २३ ॥ बाहुप्रशंसा वा ॥ २४ ॥

१ प्रशंसात वात्तग्रन्थ पाठान्तरम् ।

१ अधिगुंप्रैषे श्येनादिशब्दानां कात्स्न्र्य-वाचकत्वाधिकरणम्--६॥

श्येन-शला-कश्यप-कवं[१]षोरुस्रेकपर्णे-ष्वाकृतिवचनं प्रसिद्धसन्निधानात्२५
[२]कात्स्न्र्यं वा स्यात्तथाभावात्॥२६॥
अध्रिगोश्च तदर्थत्वात् ॥ २७ ॥

१ दर्शार्थोद्धृताग्निलोपे प्रायश्चित्तरूपज्यो-तिस्मतया अननुष्ठानाधिकरणम्--७॥

प्रासंगिके प्रायश्चित्तं न विद्यते
परार्थत्वात्तदर्थो हि विधीयते॥ २८ ॥

---

२ वषस्रेकोति जै॰ न्या. मा. पाठान्तरम् ।
३ उत्तरसूत्रेण सहैकमेव सूत्रमिदं वृत्तिग्रन्थे ।

१ धायोद्गाने प्रायश्चित्तरूपज्योतिष्मत्यननुष्ठानाधिकरणम्—८ ॥

धारणे च परार्थत्वात् ॥ २९ ॥ क्रियार्थत्वादितरेषु कर्म स्यात् ॥ ३० ॥

१ दर्शार्थोद्धरणस्यामन्त्रकत्वाधि०—९ ॥

न तूत्पन्ने यस्य चोदनाऽप्राप्तकालत्वात् ॥ ३१ ॥

१ प्रायणीयचरौ प्रधानधर्माणामननुष्ठानाधिकरणम्—१० ॥

प्रदानदर्शनं श्रपणे तद्धर्मभोजनार्थत्वात्संसर्गाच्च मधूदकवत् ॥ ३२ ॥ संस्कारप्रतिषेधश्च तद्वत् ॥ ३३ ॥ तत्प्र-

(१) वृत्तिग्रन्थे प्रधानेत्यपपाठो दृश्यते ।

तिषेधे च तथाभूतस्य वर्जनात् ॥ ३४ ॥ अधर्मत्वमप्रदानात्प्रणीतार्थे विधानादतुल्यत्वादसंसर्गः ॥ ३५ ॥ परो नित्याऽनुवादः स्यात् ॥ ३६ ॥ विहितप्रतिषेधो वा ॥ ३७ ॥ वर्जने गुणभावित्वात्तदुक्तप्रतिषेधात्स्यात्कारणात्केवलाशनम् ॥ ३८ ॥ व्रतधर्माच्च लेपवत् ॥ ३९ ॥ रसप्रतिषेधो वा पुरुषधर्मत्वात् ॥ ४० ॥

१ अभ्युदयेष्टौ दधिशृतयोः प्रदेयधर्मानुष्ठानाधिकरणम्– ११ ॥

अभ्युदये दोहापनयः स्वधर्मा

स्यात्प्रवृत्तत्वात् ॥ ४१ ॥ शृतोपदेशाच्च ॥ ४२ ॥

१ पशुकामेष्टौ दधिशृतयोः प्रदेयधर्माननुष्ठानाधिकरणम्—१२ ॥

अपनयो वार्थान्तरे विधानाच्चरुपयोवत् ॥ ४३ ॥ लक्षणार्था शृतश्रुतिः ॥ ४४ ॥

१ ज्योतिष्टोमे श्रयणानां प्रदेयधर्माननुष्ठानाधिकरणम्— १३ ॥

श्रयणानां त्वपूर्वत्वात्प्रदानार्थविधानं स्यात् ॥ ४५ ॥ गुणो वा श्रयणार्थ-

१ इदं सूत्रं वृत्तिग्रन्थे नास्ति, भाष्ये त्वस्ति ।

त्वात् ॥ ४६ ॥ अनिर्देशाच्च ॥४७॥ श्रुतेश्च तत्प्रधानत्वात् ॥ ४८ ॥ अर्थवादश्च तदर्थत्वात् ॥ ४९ ॥ संस्कारं प्रति भावाच्च तस्मादन्यप्रधानम् ॥ ५० ॥

१ "ईशानाय परस्वतः" इत्यनेनाश्वमेधे यागान्तरविधानाधिकरणम्– १४ ॥

पर्य्यग्निकृतानामुत्सर्गे तादर्थ्यमुपधानवत् ॥ ५१ ॥ शेषप्रतिषेधो वाऽर्थाभावादिडान्तवत्॥५२॥ पूर्व (व) त्वाच्च शब्दस्य संस्थापयतीति चा-

प्रवृत्ते नोपपद्यते ॥ ५३ ॥ प्रवृत्तेर्यज्ञहेतुत्वात्प्रतिषेधे संस्काराणामकर्म स्यात्तत्कारितत्वाद्यथा प्रयाजप्रतिषेधे ग्रहणमाज्यस्य ॥ ५४ ॥ क्रिया वा स्यादवच्छेदादकर्म सर्वहानं स्यात् ॥ ५५॥

२ " आज्येन शेषं संस्थापयति" इत्यनेन कर्मान्तरविधानाधिकरणम्—१५॥

आज्यसंस्थाप्रतिनिधिः स्याद्द्रव्योत्सर्गात् ॥ ५६ ॥ समाप्तिवचनात् ॥ ५७ ॥ चोदना वा कर्मोत्सर्गाद-

१ इदं सूत्रं वृत्तिग्रन्थे नास्ति।

न्यैः स्यादविशिष्टत्वात् ॥ ५८ ॥ अग्निज्यां च वनस्पतेः प्रसिद्धाऽन्तेन दर्शयति ॥५९॥ संस्था (ख्या) तद्देवतात्वात्स्यात् ॥ ६० ॥(१५)॥२०॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने नवमस्याध्यायस्य(मंत्रोहप्रसङ्गापतितविचारो नाम) चतुर्थः पादः ॥ ९ ॥ ४ ॥
समाप्तो नवमोऽध्यायः ॥ ९ ॥

अथ दशमोऽध्यायः ।

तत्र कृष्णलेषु चोदकप्राप्तावघातस्य वितुषीकरणासंभवेन लोप इत्येवमादिबाधो निरूप्यते-

८ विकृतौ लुप्तार्थप्रापकबाधसाधकं, कृष्णलेष्ववहन्तिबाधसाधकं वैश्वदेवचरौ विष्णवावाहनबाधसाधकं च, इतिवर्णकत्रयात्मकमधिकरणम्–१ ॥

विधेः प्रकरणान्तरेऽतिदेशात्सर्वकर्म स्यात् ॥ १ ॥ अपि वाऽभिधानसंस्कारद्रव्यमर्थे क्रियेत तादर्थ्यात् ॥ २ ॥ तेषामप्रत्यक्षशिष्टत्वात् ॥ ३ ॥

१ दीक्षणीयादिष्वारम्भणीयाबाधाधि०–२ ॥

इष्टिरारम्भसंयोगादङ्गभूतान्निवर्त्तेतारम्भस्य प्रधानसंयोगात् ॥ ४ ॥

१ अनुयज्ञादिष्वारम्भणीयाबाधाधि०–३ ॥

प्रधानाच्चान्यसंयुक्तात्सर्वारम्भान्नि-
वर्तेतानङ्गत्वात् ॥ ५ ॥

१ आरम्भणीयायामारम्भणीयाबाधा-
धिकरणम्-४ ॥

तस्यां तु स्यात्प्रयाजवत् ॥ ६ ॥
न वांगभूतत्वात् ॥ ७ ॥ एकवाक्य-
त्वाच्च ॥ ८ ॥

२ खलेवाल्यां यूपाहुतिबाधाधि०-५ ॥

कर्म च द्रव्यसंयोगार्थमर्थाभावा-
न्निवर्तेत तादर्थ्यं श्रुतिसंयोगात् ॥ ९ ॥

२ साद्यस्के स्थाण्वाहुतिबाधाधि०-६ ॥

स्थाणौ तु देशमात्रत्वादनिवृत्तिः

प्रतीयेत ॥ १० ॥ अपि वा शेषभू-
तत्वात्संस्कारः प्रतीयेत ॥ ११ ॥ स-
माख्यानं च तद्वत् ॥ १२ ॥ मन्त्रव
र्णश्च उद्वत् ॥ १३ ॥

२ उत्तमप्रयाजस्य संस्कारकर्मताधि०—७॥

प्रयाजे च तन्न्यायत्वात् ॥ १४ ॥
लिङ्गदर्शनाच्च ॥ १५ ॥

२ अग्नियागस्याराडुपकारकत्वाधि०—८ ॥

तथाज्यभागाग्निरपीतिचेत्॥१६॥
व्यपदेशाद्देवतान्तरम् ॥ १७ ॥ सम-
त्वाच्च ॥ १८ ॥

२ पशुपुरोडाशयागस्य देवतासंस्कारकत्वाधिकरणम्-९ ॥

पशावपीति चेत् ॥ १९ ॥ न तद्भूतवचनात् ॥ २० ॥ लिंगदर्शनाच्च ॥ २१ ॥ गुणो वा स्यात्कपालवद्गुणभूतविकाराच्च ॥ २२ ॥ अपि वा शेषभूतत्वात्तत्संस्कारः प्रतीयेत स्वाहाकारवदंगानामर्थसंयोगात् ॥ २३ ॥ व्यूढवचनं च विप्रतिपत्तौ तदर्थत्वात् ॥ २४ ॥ गुणेपीति चेत् ॥२५॥ नासंहानात्कपालवत् ॥२६॥ ग्रहाणां च सम्प्रतिपत्तौ तद्वचनं तद-

र्थत्वात् ॥ २७ ॥ ग्रहाभावे तद्वचनम् ॥ २८ ॥ देवतायाश्च हेतुत्वे प्रसिद्धं तेन दर्शयति ॥ २९ ॥ अविरुद्धोपपत्तिरर्थापत्तेः श्रुतवद्गुणभूतविकारः स्यात् ॥ ३० ॥ सद्व्यर्थः स्यादुभयोश्रुतिभूतत्वाद्विप्रतिपत्तौ तादर्थ्याद्विकारत्वयुक्तं तस्यार्थवादत्वम् ॥ ३१ ॥ विप्रतिपत्तौ तासामाख्याविकारः स्यात् ॥ ३२ ॥ अभ्यासो वा प्रयाजवदेकदेशोऽन्यदेवत्यः ॥ ३३ ॥

२ सौर्ययागे चरुशब्दस्यौदनवाचकत्वाधिकरणम्– १० ॥

चरुर्हविर्विकारः स्यादिज्यासंयो-

गात् ॥ ३४ ॥ प्रसिद्धग्रहणत्वाच्च ३५ ॥ ओदनो वाऽन्नसंयोगात् ॥ ३६ ॥ न ह्यर्थत्वात् ॥ ३७ ॥ कपालविकारो वा विशये़ऽर्थोपपत्तिभ्याम् ॥ ३८ ॥ गुणमुख्यविशेषाच्च ॥ ३९ ॥ तद्भूतो चान्यहविष्ट्वात् ॥ ४० ॥ लिङ्गदर्शनाच्च ॥ ४१ ॥ ओदनो वाप्रयुक्तत्वात् ॥ ४२ ॥ अपूर्वव्यपदेशाच्च ॥ ४३ ॥ तथा च लिंगदर्शनम् ॥ ४४ ॥

४ सौर्यचरोः स्थाल्यामेव पाकाधि०-११॥

स कपाले प्रकृतया स्यादन्यस्य चाश्रुतिवात् ॥ ४५ ॥ न एकस्मिन्वा

विप्रतिषेधात् ॥ ४६॥ न वाऽर्थान्तर-संयोगादपूपे पाकसंयुक्तं धारणार्थं चरौ भवति तत्रार्थात्पात्रलाभः स्यादनि-यमोऽविशेषात् ॥ ४७ ॥ चरौ लिंग-दर्शनात् ॥ ४८ ॥

० सौर्यचरौ पेषणबाधाधिकरणम्– १ ॥

तस्मिन्पेषणमनर्थलोपात्स्यात्४९॥
अक्रिया वा अपूपहेतुत्वात् ॥ ५० ॥

० सौर्यचरौ संयवनबाधाधिकरणम्–२ ॥

पिण्डार्थत्वाच्च संयवनम्॥ ५१ ॥

---

१ इत आरभ्यापादपरिसमाप्ति मन्दप्रज्ञार्थानि सूत्राणि । तत एवाधिकरणसंख्या न लिखिता कारिकासंख्या च । स्पष्टं चैतज्जैमिनीयन्यायमालाटिप्पण्याम् ।

सौर्यचरौ संवपनबाधाधिकणरम्-३॥

संवपनं च तादर्थ्यात् ॥ ५२ ॥

॰ सौर्यचरौ सन्तापनबाधाधिकरणम्-४॥

सन्तापनमधःश्रपणात् ॥ ५३ ॥

॰ सौर्यचरावुपधानबाधाधि॰- ५ ॥

उपधानं च तादर्थ्यात् ॥ ५४ ॥

॰ सौर्यचरौ पृथुश्लक्ष्णबाधाधि॰- ६ ॥

पृथुश्लक्ष्णे चाऽनपूपत्वात्॥५५॥

॰ सौर्यचरावभ्यूहबाधाधि॰-७ ॥

अभ्यूहश्चोपरिपाकार्थत्वात् ५६॥

॰ सौर्यचरौ ज्वलनबाधाधि॰-८ ॥

तथा च ज्वलनम् ॥ ५७ ॥

० सौर्यचरौ व्युद्धृत्यासादनबाधाधिकरणम्—९ ॥

व्युद्धृत्यासादं च प्रकृतावश्रुतित्वात् ॥ ६८ ॥ (११+९) ॥२३॥

श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने (वेदिनिष्पादनद्वारलोपप्रयोज्योद्धननादिबाधावितुषीकरणद्वारलोपप्रयोज्यावघातबाधयोर्निरूपणं नाम) दशमस्याध्यायस्य प्रथमः पादः ॥ १० ॥ १ ॥

---

१ कृष्णले चरौ पाकानुष्ठानाधि०—१ ॥

कृष्णलेष्वर्थलोपादपाकः स्यात् ॥ १ ॥

स्याद्वा प्रत्यक्षशिष्टत्वात्प्रदानवत् ॥ २ ॥

१ कृष्णले उपस्तरणाभिघारणयोर्बाधाधिकरणम्- २ ॥

उपस्तरणाभिघारणयोरमृतार्थत्वादकर्म स्यात् ॥ ३ ॥ क्रियेत वाऽर्थवादत्वात्तयोः संसर्गहेतुत्वात् ॥ ४ ॥ अकर्म वा चतुर्भिराप्तिवचनात्सह पूर्णं पुनश्चतुरवत्तम् ॥ ५ ॥ क्रिया वा मुख्यावदानपरिमाणात्सामान्यात्तद्गुणत्वम् ॥ ६ ॥ तेषां चैकावदानत्वात् ॥ ७ ॥ आप्तिः संख्या समानत्वात् ॥ ८ ॥ सतोस्त्वाप्तिवचनं व्यर्थम् ॥ ९ ॥ विलपकस्त्वेकावदान-

त्वात् ॥ १० ॥ सर्वविकारे त्वभ्यासा-
नर्थक्यं हविषो हीतरस्य स्यादपि
वा स्विष्टकृतः स्यादितरस्यान्याय्य-
त्वात् ॥११॥ अकर्मा वा संसर्गार्थनि-
वृत्तत्वात्तस्यादाप्तिसमर्थत्वात् ॥१२॥

१ कृष्णलचरौ भक्षसद्भावाधिकरणम्-२ ॥

भक्षाणां तु प्रीत्यर्थत्वादकर्म स्या-
त् ॥ १३ ॥ स्याद्वा निर्द्धानदर्शनात्
॥ १४ ॥ वचनं त्वाज्यभक्षं प्रकृतौ
स्यादभागित्वात् ॥ १५ ॥ वचनं वा
हिरण्यस्य प्रदानवदाज्यस्य गुणभू-
तत्वात् ॥ १६ ॥

१ कृष्णलचरौ सहपरिहारविधानाधि०-४ ॥

एकधोपहारे सहत्वं ब्रह्मभक्षाणां प्रकृतौ विहितत्वात् ॥ १७ ॥

१ कृष्णलचरौ ब्रह्मणे सर्वभक्षभागार्पणाधिकरणम्- ५ ॥

सर्वत्वंच तेषामधिकारात्स्यात् १८॥

पुरुषापनयो वा तेषामवाच्यत्वात् १९

१ भक्षभागानां स्वस्वकाले ब्रह्मणा भक्षणाधिकरणम्- ६ ॥

पुरुषापनयात्स्वकालत्वम् ॥२०॥

ब्रह्मभक्षे चतुर्धा करणाद्यभावाधि०-७ ॥

एकार्थत्वादविभागःस्यात् ॥२१ ॥

१ ऋत्विग्दानस्यानत्यर्थताधि०—८ ॥

ऋत्विग्दानं धर्ममात्रार्थं स्याद्दातिसामर्थ्यात् ॥ २२ ॥ परिक्रयार्थं वा कर्मसंयोगाल्लोकवत् ॥ २३ ॥ दक्षिणायुक्तवचनाच्च ॥ २४ ॥ नचाऽन्येनानम्येत परिक्रयात्कर्मणः परार्थत्वात् ॥ २५ ॥ परिक्रीतवचनाच्च ॥ २६ ॥ सनिवन्ये च भृति वचनात् ॥ २७॥ नैष्कर्तृकेण संस्तवात् २८॥

२ ज्योतिष्टोमे भक्षस्य प्रतिपत्त्यर्थताधि०९॥

शेषभक्षाश्च तद्वत् ॥ २९ ॥ सं-

---

१ इदं सूत्रं वात्तिकृन्मते नास्ति ।

स्कारो वा द्रव्यस्य परार्थत्वात् ॥ ३० ॥ शेषे च समत्वात् ॥ ३१ ॥ स्वामिनि च दर्शनात्तत्सामान्यादितरेषां तथात्वम् ॥ ३२ ॥ तथा चान्यार्थदर्शनम् ॥ ३३ ॥

१ सत्रे ऋत्विग्वरणाभावाधि०-१० ॥

वरणमृत्विजामानमनार्थत्वात्सत्रे न स्यात्स्वकर्मत्वात् ॥ ३४ ॥

१ सत्रे परिक्रयाभावाधिकरणम्-११ ॥

परिक्रयश्च तादर्थ्यात् ॥ ३५ ॥ प्रतिषेधश्च कर्मवत् ॥ ३६ ॥ स्याद्वा

---

१ न्यायमालाकृन्मते इदमाधिकं सूत्रम् ।

प्रसर्पिकस्य धर्ममात्रत्वात् ॥ ३७ ॥

न दक्षिणाशब्दात्तस्मान्नित्यानुवादः स्यात् ॥ ३८ ॥

२ उदवसानीये दानस्य परिक्रयार्थत्वाधिकरणम्–१२ ॥

उदवसानीयः सत्रधर्मा स्यात्तदङ्गत्वात्तत्र दानं धर्ममात्रं स्यात् ॥ ३९ ॥

न त्वतत्प्रकृतित्वादविभक्तचोदितत्वात् ॥ ४० ॥

१ उदवसानीयस्यर्त्विजामेकैकेनानुष्ठानाधिकरणम्–१३ ॥

तेषां तु वचनाद्द्वियज्ञवत्सहप्रयोगः स्यात् ॥ ४१ ॥

१ उदवसानीयस्यार्त्विजां सत्रिभ्यो भेदाधिकरणम्-१४ ॥

तत्रान्यानृत्विजो वृणीरन् ॥४२॥

१ पृष्ठशमनीये प्रत्येकं यष्टृताधिकरणम्०१५

एकैकशस्त्वविप्रतिषेधात्प्रकृतेश्चैकसंयोगात् ॥ ४३ ॥

१ कामेष्टौ दानस्यादृष्टार्थताधिकरणम्-१६

कामेष्टौ च दानशब्दात् ॥ ४४ ॥

वचनं वा सत्रत्वात् ॥ ४५ ॥

१ दर्शपूर्णमासयोर्द्वेष्याय दानस्यादृष्टार्थताधिकरणम्-१७ ॥

१द्वेष्ये वा चोदनाद्दक्षिणापनयात् ४६।

---

१ द्वेष्ये चाचोदेति जै० न्या० मा० पाठः ।

१ जीवतामस्थियज्ञाधिकरणम्–१८ ॥

अस्थियज्ञोऽविप्रतीषेधादितरेषां स्याद्विप्रतिषेधादस्थ्नाम् ॥ ४७ ॥

यावदुक्तमुपयोगः स्यात् ॥ ४८ ॥

१ अस्थियागेस्थ्नां जपाद्यननुष्ठानाधिकरणम्–१९ ॥

यदि तु वचनात्तेषां जयसंस्कारमर्थलुप्तं सेष्टि तदर्थत्वात् ॥ ४९ ॥

१ अस्थियज्ञे शाखामानशुक्रस्पर्शाधि० २० ॥

क्रत्वर्थं तु क्रियेत गुणभूतत्वात् ५०

१ अस्थियागेस्थ्नां काम्यकर्माद्यनुष्ठानाधिकरणम्–२१ ॥

काम्यानि तु न विद्यन्ते कामा-

ज्ञानाद्यथेतरस्यानुच्यमानानि॥ ५१॥

१ अस्थियज्ञेस्थनां सूक्तवाकगताशासनान नुष्ठानाधिकरणम्–२२ ॥

ईहार्थाश्चाभावात्सूक्तवाकवत्५२॥ स्युर्वाऽर्थवादत्वात् ॥ ५३ ॥ नेच्छाभिधानत्तदभावादितरस्मिन्॥ ५४ ॥

१ अस्थियज्ञे होतृकामाभावाधि०२३ ॥

स्युर्वा होतृकामाः ॥ ५५ ॥ न तदाशीष्ठ्वात् ॥ ५६ ॥

१ यजमानस्य मरणेपि सर्वस्वारस्यसमापनाधिकरणम्–२४ ॥

सर्वस्वारस्यदिष्टे गतौ समापनं न

विद्यते कर्मणो जीवसंयोगात् ॥५७॥
स्याद्वोभयोः प्रत्यक्षशिष्टत्वात्॥५८॥

सर्वस्वारे कार्यबाध्यव्यवस्थाधि०२५॥

गते कर्मास्थियज्ञवत् ॥ ५९ ॥

१ सर्वस्वारे यजमानस्य दिष्टगतावप्यायुराशंसनाधिकरणम्--२६ ॥

जीवत्यवचनमायुराशिषस्तदर्थत्वात् ॥ ६० ॥ वचनं वा भागित्वात्प्राग्यथोक्तात् ॥ ६१ ॥

१द्वादशाहे ऋतुयाज्याद्यनुष्ठानाधिकरणम्२७॥

क्रिया स्याधर्ममात्राणाम् ॥ ६२॥

१ पवमानेष्टौ सर्वनिर्वापानुष्ठानाधि०२८ ॥

गुणलोपे तु मुख्यस्य ॥ ६३ ॥

३ वाजपेये मुष्टिलोपाधिकरणम्--२९ ॥

मुष्टिलोपात्तु संख्यालोपस्तद्गुणत्वात्स्यात् ॥ ६४ ॥ न निर्वापशेषत्वात् ॥ ६५ ॥ संख्या तु चोदनां प्रति सामान्यत्ताद्विकारः संयोगाच्च परं मुष्टेः ॥ ६६ ॥ न चोदनाभिसम्बन्धात्प्रकृतौ संस्कारयोगात् ॥ ६७

१ धेन्वादिशब्दानां गोवाचिताधि०--३०॥

औत्पत्तिके तु द्रव्यतो विकारः स्यादकार्यत्वात् ॥ ६८ ॥

---

१ मे च मुख्येति जैमिनीयन्यायमालाकृत्पाठः ।

१ वायव्यं श्वेतमित्यत्राजस्यैवालम्भना-धिकरणम्—३१ ॥

नैमित्तिके तु कार्यत्वात्प्रकृतेः स्या-त्तदापत्तेः ॥ ६९ ॥

३ खलेवालीतण्डुलयोः खादिरत्वेहत्वाऽनि-यमाधिकरणम्—३२ ॥

विप्रतिषेधे तद्वचनात्प्राकृतगुण-लोपः स्यात्तेन[1] कर्मसंयोगात् ॥७०॥

१ खलेवाल्यां तक्षणाद्यननुष्ठानाधि०—३३

परेषां प्रतिषेधः स्यात् ॥ ७१ ॥

प्रतिषेधाच्च[2] ॥ ७२ ॥

---

१ तेन च केति जै० न्या० मा० पाठः ।

२ विप्रेति वृत्तिकृत्पाठः ।

३ खलेवाल्यां पर्यूहणादिसंस्काराणामनुष्ठानाधिकरणम्-३४ ॥

अर्थाभावे संस्कारत्वं स्यात्७३॥

२ महापितृयज्ञे धानास्ववघातानुष्ठानमिति भाष्यमतेन पेषणस्य प्राकृततावोधकत्वमिति वार्तिकमतेन च सहितमधिकरणम्-३५ ॥

अर्थेन च विपर्यासे तादर्थ्यात्तत्त्वमेव स्यात् ॥ ७४ ॥ (३५) ॥ ४३॥

इति श्रीमज्जैमिनिमहार्षिप्रणीते पूर्वमीमांसादर्शने दशमस्याध्यायस्य (संक्षिप्योक्तद्वारलोपस्योदाहरणैर्विस्तरणं नाम) द्वितीयः पादः ॥ १० ॥ २ ॥

---

२ पश्वादौ सामिधेन्यादिप्राकृतेतिकर्तव्यतानुष्ठानाधिकरणम्-१ ॥

विकृतौ शब्दवत्त्वात्प्रधानस्य गु-
णानामधिकोत्पत्तिः सन्निधानात् ॥
॥१॥प्रकृतिवत्त्वस्य चानुपरोधः॥२॥
चोदनाप्रभुत्वाच्च ॥ ३ ॥ प्रधानं
त्वङ्गसंयुक्तं तथाभूतमपूर्वं स्यात्तस्य
विध्युपलक्षणात्सर्वो हि पूर्ववान्विधि-
रविशेषात्प्रवर्तितः ॥ ४ ॥ न चांग-
विधिरनङ्गे स्यात् ॥ ५ ॥ कर्मणश्चै-
कशब्द्यात्सन्निधानविधेराख्यासंयोगो-
गुणेन तद्विकारः स्याच्छब्दस्य विधि-
गामित्वाद्गुणस्य चोपदेश्यत्वात्॥६॥
अकार्यत्वाच्च नाम्नः ॥ ७ ॥

तुल्याच प्रभुता गुणे ॥ ८ ॥ सर्वमेवं प्रधानमिति चेत् ॥ ९ ॥ तथाभूतेन संयोगाद्यथार्थविधयः स्युः ॥ १० ॥ विधित्वं चाविशिष्टं वैकृतैः कर्मण योगात्तस्मात्सर्वप्रधानार्थम् ॥ ११ ॥ समत्वाच्च तदुत्पत्तेः संस्कारैरधिकारः स्यात् ॥ १२ ॥

१ 'हिरण्यगर्भ' इत्यादिमन्त्रस्योत्तराघार-
गुणताधिकरणम्--२ ॥

हिरण्यगर्भः पूर्वस्यः मन्त्रलिं-

---

२ विशिष्टमेवं प्राकृतानां वैक्रिति जैमिनीयन्या. मालाकृत्पाठः ।

गात् ॥ १३ ॥ प्रकृत्यनुपरोधाच्च ॥ १४ ॥ उत्तरस्य वा मंत्रार्थित्वात् ॥ १५ ॥ विध्यतिदेशात्तच्छ्रुतौ विकारः स्याद्गुणानामुपदेश्यत्वात् ॥ १६ ॥ पूर्वस्मिंश्चामन्त्रदर्शनात् ॥ १७ ॥

२ चातुर्मास्येषु सोमेष्वासादननियोजनयोः प्राकृतगुणविधित्वाधिकरणम् २ ॥

संस्कारे तु क्रियांतरं तस्य विधायकत्वात् ॥ १८ ॥ प्रकृत्यनुपरोधाच्च ॥ १९ ॥ विधेस्तु यत्र भावात्सन्देहे यस्य शब्दस्तदर्थं स्यात् ॥ २० ॥ संस्कारसामर्थ्याद्गुणसंयो-

गाच्च ॥ २१ ॥ विप्रतिषेधात्क्रियाप्रकरणे स्यात् ॥२२ ॥

२ अग्निचयने प्राकृतवैकृतोभयदीक्षाहुतीनामनुष्ठानाधिकरणम्—४ ॥

षड्भिर्दीक्षयतीति तासां मन्त्रविकारः श्रुतिसंयोगात् ॥ २३ ॥ अभ्यासात्तु प्रधानस्य ॥ २४ ॥आवृत्त्या मन्त्रकर्म स्यात् ॥ २५ ॥ अपि वा प्रतिमन्त्रत्वात्प्राकृतानामहानिः स्यादन्यायश्च कृतेऽभ्यासः ॥२६॥ पौर्वापर्यञ्चाभ्यासे नोपपद्यते नैमित्तिकत्वात् ॥२७॥ तत्पृथक्त्वं च द-

शंयति ॥२८॥ न वाविशेषाद्व्यपदेशः स्यात् ॥ २९ ॥

२ पुनराधानेऽग्न्याधानदक्षिणानां निवृत्त्यधिकरणम्—५ ॥

अग्न्याधेयस्य नैमित्तिके गुणविकारे दक्षिणादानमधिकं स्याद्वाक्यसंयोगात् ॥ ३० ॥ शिष्टत्वाच्चेतरासां यथास्थानम् ॥ ३१ ॥ विकारस्त्वप्रकरणे हि काम्यानि ॥ ३२ ॥ शङ्कते च निवृत्तेरुभयत्वं हि श्रूयते ॥३३ ॥

२ वासोवत्साभ्यामन्वाहार्यस्याग्रयणे निवृत्त्यधिकरणम्—६ ॥

वासो वत्सश्च सामान्यात् ॥३४ ॥

१ वासोवत्सयोराग्रयणेन्वाहार्यधर्मानुष्ठानाधिकरणम्--७ ॥

अर्थापत्तेस्तद्धर्मः स्यान्निमित्ताख्याभिसंयोगात् ॥ ३५ ॥

१ आग्रयणे वत्से पाकाभावाधि०--८ ॥

दाने पाकोऽर्थलक्षणः ॥ ३६ ॥

१ आग्रयणे वाससि पाकाभावाधि०--९ ॥

पाकस्य चान्नकारित्वात्॥ ३७ ॥

१ आग्रयणे वासोवत्सयोरभिधारणाभावाधिकरणम्--१० ॥

तथाभिघारणस्य ॥ ३८ ॥

६ ज्योतिष्टोमे गवामेव द्वादशशतस्य दक्षिणात्वाधिकरणम्--११ ॥

द्रव्यविधिसन्निधौ सङ्ख्या तेषां गुणत्वात्स्यात् ॥ ३९ ॥ समत्वात्तु गुणानामेकस्य श्रुतिसंयोगात् ॥ ४० ॥ यस्य वा सन्निधाने स्याद्वाक्यतो ह्यभिसम्बन्धः ॥ ४१ ॥ असंयुक्तास्तु तुल्यवदितराभिर्विधीयन्ते तस्मात्सर्वाधिकारः स्यात् ॥ ४२ ॥ असंयोगाद्विधिश्रुतावेकजाताधिकारः स्याच्छ्रुत्याकोपात्क्रतोः ॥ ४३ ॥ शब्दार्थश्चापि लोकवत् ॥ ४४ ॥

---

१ द्रव्यविधीति सूत्रमारभ्य लिङ्गदर्शनाच्चेत्यन्तमेकम-धिकरणं जै०न्या० लानुसाराद्भवति ।

० तस्य द्वादशशतमित्यनेनसंख्याभिधानाधिकरणम्- १२ ॥

सां पशूनामुत्पत्तितो विभागात् ४५॥

० पशुषु गवां दक्षिणानियमाधि०- १३॥

अनियमोऽविशेषात् ॥४६॥ भागित्वाद्वा गवां स्यात् ॥ ४७ ॥ प्रत्ययात् ॥ ४८ ॥ लिंदगर्शनाच्च ॥४९॥

२ विभज्य गोदक्षिणाया दानाधि०-१४॥

तंत्र दानं विभागेन प्रदानानां पृथक्त्वात् ॥ ५० ॥ परिक्रयाच्च लोक

१ इदमधिकरणद्वयं शाबरभाष्यरीत्या। शास्त्रदी०न्यायमा० स्त्वेकमेव ३९-४९ सूत्रादि सूत्रान्तम्। तत्रेत्यत्र तस्येति जै० न्या० का० संमतः पाठः।

वत् ॥ ५१ ॥ विभागं चापि दर्श-
यति ॥ ५२ ॥

१ समाख्यानुसारेण ज्योतिष्टोमे दक्षिणा-
विभागाधिकरणम्—१५ ॥

समं स्यादश्रुतित्वात् ॥ ५३ ॥
अपि वा कर्मवैषम्यात् ॥ ५४ ॥
अतुल्याः स्युः परिक्रये विषमाख्या
विधिश्रुतौ परिक्रयान्न कर्मण्युपपद्यते
दर्शनाद्विशेषस्य तथाभ्युदये ॥५५॥

१ भूनाम्नि धेनुदानेन दक्षिणाविभागा-
धिकरणम्—१६ ॥

तस्य धेनुरिति गवां प्रकृतौ वि-

भक्तं चोदितत्वात्तत्सामान्यात्तद्विकारः स्याद्यथेष्टिर्गुणशब्देन ॥ ५६ ॥ सर्वस्य वा क्रतुसंयोगादेकत्वं दक्षिणार्थस्य गुणानां कार्य्यैकत्वादर्थे विकृतौ श्रुतिभूतं स्यात्तया समवायादिकर्मभिः ॥ ५७ ॥ चोदनानामनाश्रयाल्लिंगेन नियमः स्यात् ॥५८॥

१ एका गामित्यनेन प्राकृतसंख्याबाधाधिकरणम्-१७ ॥

एका[२] पञ्चेति धेनुवत् ॥ ५९ ॥

---

१ त्तस्मात्सेति जै० न्या० ला० संमतः पाठः।
२ एकां पेति जै० न्या० ला० संमतः पाठः।

१ साद्यस्के त्रिवत्सेन सोमक्रयसाधनमात्रबाधाधिकरणम्—१८ ॥

त्रिवत्सश्च ॥ ६० ॥ तथा लिंगदर्शनम् ॥ ६१ ॥ एके तु श्रुतिभूतत्वात्सङ्ख्याया गवां लिंगविशेषेण ॥ ६२ ॥

१ अश्वमेधे प्रकाशावित्यनेनाध्वर्युभागबाधाधिकरणम्—१९ ॥

प्राकाशौ चँ तथेति चेत् ॥६३॥ अपि त्ववयवार्थत्वाद्विभक्तप्रकृति-

१ तथा चेति चशब्दोऽधिकः जै॰ न्या॰ लाकृन्मते पाठः।
२ चशब्दोऽधिको वृत्तिकृन्मते।

त्वाद्गुणेदन्ताविकारः स्यात् ॥ ६४ ॥

१ उपहव्ये श्यावाश्वेनाखिलदक्षिणाबा-
धाधिकरणम्-२० ॥

धेनुवच्चाश्वदक्षिणा स ब्रह्मण इति पुरुषापनयो यथा हिरण्यस्य ॥ ६५ ॥ एके तु कर्तृसंयोगात्स्रग्वत्तस्य लिंगविशेषेण ॥ ६६ ॥ अपिवा तदधिकाराद्धिरण्यवद्विकारः स्यात् ६७

४ ऋतपेये सोमचमसेन कृत्स्नदक्षिणापुरुषान्तरयोर्बाधाधिकरणम्-२१ ॥

तथा च सोमचमसः ॥ ६८ ॥ सर्वविकारो वा क्रत्वर्थे पशूनां प्रतिषे-

१ र्थे प्रतिषेधात्पशूनामिति जै० न्या० ला० रसंमतः पाठः ।

धात् ॥ ६९ ॥ ब्रह्मदानेऽविशिष्टमिति चेत् ॥ ७० ॥ उत्सर्गस्य क्रत्वर्थत्वात्प्रतिषिद्धस्य कर्मत्वान्न च गौणः प्रयोजनमर्थः स दक्षिणानां स्यात् ॥ ७१ ॥ यदि तु ब्रह्मस्तदूनं तद्विकारः स्यात् ॥ ७२ ॥ सर्वं वा पुरुषापनयात्तासां क्रतुप्रधानत्वात् ॥ ७३ ॥

१ वाजपेये रथस्य भागनियामकताधि०–२२॥

यजुर्युक्तोऽध्वर्य्योर्दक्षिणा विकारः स्यात् ॥ ७४ ॥ अपि वा श्रुतिभू-

२ मंस्यान्नोति जै० न्या० ला० संमतः पाठः ।

तत्वात्सर्वासां तस्य भागो नियम्यते ॥ ७८ ॥ (२२) ॥ ३३ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने दशमस्याध्यायस्य (बाधकरणं कार्यैकत्वं नाम) तृतीयः पादः ॥ १० ॥ ३ ॥

---

१ नारिष्टहोमादिभिर्नक्षत्रेष्ट्यादीनां समुच्चयाधिकरणम्- १ ॥

प्रकृतिलिंगासंयोगात्कर्मसंस्कारं विकृतावधिकं स्यात् ॥ १ ॥

२+२ वाजपेये शरमयबर्हिषा कौशबर्हिषो बाधः १-रथघोषदुन्दुभिघोषाभ्यां दर्भमन्त्रयोर्बाधः २-इति वर्णकद्वययुक्तमाधि०- २ ॥

चोदनालिङ्गसंयोगे तद्विकारः प्रती-

येत प्रकृतिसन्निधानात् ॥ २ ॥

१ बार्हस्पत्यग्रहादिभिः प्राकृतेन्द्रवायवादिग्रहाणां समुच्चयाधि०—३ ॥

सर्वत्र तु ग्रहाम्नातमधिकं स्यात्प्रकृतिवत् ॥ ३ ॥ अधिकश्चैकवाक्यत्वात् ॥ ४ ॥ लिंगदर्शनाच्च ॥ ५ ॥

२ वाजपेये प्राजापत्यपशुभिः क्रतुपशूना समुच्चयाधिकरणम्—४ ॥

प्राजापत्येषु चाम्नानात् ॥ ६ ॥

१ सांग्रहिणीष्टावामनहोमैरनुयाजानां समुच्चयाधि—५ ॥

आमने लिंगदर्शनात् ॥ ७ ॥

---

१ प्रथमं द्वितीयं चेति सूत्रद्वयं मिलित्वैकमधिकरणं प्रथममेवेति वृत्तौ शास्त्रदीपिकायां च ।

२ पत्न्युपगाने नार्त्विगुपगानस्य महाव्रते समुच्चयाधिकरणम्- ६ ॥

उपगेषु शरवत्स्यात्प्रतिलिंगसंयोगात् ॥ ८ ॥ आनर्थक्यात्त्वधिकं स्यात् ॥ ९ ॥

१ अञ्जनाभ्यञ्जने नवनीताभ्यञ्जनस्य गौग्गुलवाभ्यञ्जनादिभिःसमुच्चयाधि० ७ ॥

संस्कारे चान्यसंयोगात् ॥ १० ॥ प्रयाजवदिति[1] चेन्नार्थान्यत्वात् ॥ ११ ॥

१ अहतवाससस्तार्प्यादिभिर्महाव्रते समुच्चयाधिकरणम्- ८ ॥

आच्छादने त्वैकार्थ्यात्प्राकृतस्य

---

१ दिति चेदित्यन्तमंके, तत उत्तरमेकमिति सूत्रद्वयमिति जै० न्या० मा० मते ।

विकारः स्यात् ॥ १२ ॥ अधिकं वा-न्यार्थत्वात् ॥ १३॥ संमुच्चयं च दर्श-यति ॥ १४ ॥

१ महाव्रते रथन्तरादिसाम्नां श्लोकादिसा-माभिः समुच्चयाधिकरणम्—९ ॥

सामैस्वर्थान्तरश्रुतेरविकारः प्रती-येत ॥ १५ ॥

१ विकृतिविशेषे प्राकृतसाम्नां कौत्सादिभि-र्बाधाधिकरणम्—१० ॥

---

१ इदं सूत्रं वृत्तिकृन्मते नास्ति। भाष्ये जै० न्यायमा-लाकृन्मते चास्ति।

२ उत्तरसूत्रेण सहैकमधिकरणं तथा पृथगुत्तरसूत्रमात्रं पुनः पठित्वाऽधिकरणान्तरमिति जै० न्या०मालाकृन्मते शास्त्रदीपिकाकृन्मते तूत्तरसूत्रं पूर्वाधिकरणस्यैव वर्णका-न्तरं द्रष्टव्यम्।

अर्थेत्वश्रूयमाणे शेषत्वात्प्राकृतस्य विकारः स्यात् ॥ १६ ॥

१ कौत्सादिभिर्व्यवस्थयैकादिबाधाधिकरणम्–११ ॥

सर्वेषामविशेषात् ॥ १७ ॥ एकस्य वा श्रुतिसामर्थ्यात्प्रकृतेश्चाविकारात् ॥ १८ ॥

१ विवृद्धाविवृद्धस्तोमक्रतुषु क्रमेण प्राकृतसामबाधाबाधाधिकरणम्–१२ ॥

स्तोमविवृद्धौ त्वाधिकं स्यादविवृद्धौ द्रव्यविकारः स्यादितरस्याश्रुतित्वात् ॥ १९ ॥

१ पवमाने विवृद्धस्तोमकक्रतूनां सामावा-
पोद्वापाधिकरणम्–१३ ॥

पावमाने स्यातां तस्मिन्नावापोद्वापदर्शनात् ॥ २० ॥ वचनानि त्वपूर्वत्वात् ॥ २१ ॥

१ यागादौ विधिशब्देनैव देवताभिधानाधिकरणम्–१४ ॥

विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन चोदना ॥ २२ ॥ शेषाणां वा चोदनैकत्वात्तस्मात्सर्वत्र श्रूयते ॥ २३ ॥

अतिदेशस्थलेपि वैधशब्देनैव देवताभिधानाधिकरणम्–१५ ॥

तथोत्तरस्यांततौतत्प्रकृतित्वात् ॥ २४

१ आधानेऽग्नेःसगुणेनाभिधानाधि०--१६॥

प्राकृतस्य गुणश्रुतौ सगुणेनाभिधानं स्यात्॥२५॥अविकारो वाऽर्थशब्दानपायात्स्याद्द्रव्यवत् ॥ २६ ॥ आरम्भासमवायाद्वा चोदितेनाभिधानं स्यादर्थस्य श्रुतिसमवायित्वादवचने च गुणशासनमनर्थकं स्यात् ॥२७॥ द्रव्येष्वारम्भगामित्वादर्थे विकारः[२]सामर्थ्यात् ॥ २८ ॥

---

१ तथोरित्ति जै० न्या० ला० संमतः पाठः।
२ कारे सति वृत्तिकृरसम्मतः पाठः।

१ आधानाज्ययोरग्नेर्निर्गुणेनाभिधाना-
धिकरणम्- १७ ॥

वृधन्वान्पवमानवद्विशेषानिर्देशात् ॥ २९ ॥ मन्त्रविशेषानिर्देशान्न देवताविकारः स्यात् ॥ ३० ॥

२ गवानुबन्धपृषदाज्यहोमयोर्विधिशब्दा-
भ्यामेवोस्रावनस्पतिशब्दाभ्याममभिधाना-
धिकरणम्- १८ ॥

विधिनिगमभेदात्प्रकृतौ तत्प्रकृतित्वाद्विकृतावपिभेदः स्यात् ॥ ३१ ॥ यथोक्तं वा विप्रतिपत्तेर्न चोदना ३२ ॥

---

१ वृधेति जैमिनीयन्यायमालाकृतः शाबरभाष्यकृतः शास्त्रदीपिकाकृतश्च सम्मतः पाठः ।

२ अवभृथेऽग्निवरुणयोः सस्विष्टकृच्छब्देना-
भिधानाधिकरणम्- १९ ॥

स्विष्टकृद्देवतान्यत्वे तच्छब्दत्वा-
न्निवर्त्तेत ॥ ३३ ॥ संयोगो वाऽर्थाप-
त्तेरभिधानस्य कर्मजत्वात् ॥ ३४ ॥

१ अग्नीषोमीयपशौ सर्वत्रैव प्रयोगे निर्गुणा-
ग्निशब्देनाग्नेरभिधानाधिकरणम्-२० ॥

सगुणस्य गुणलोपे निगमेषु गुणा
स्थाने[1] यावदुक्तं स्यात् ॥३५ ॥ सर्व-
स्य वैककर्म्यात् ॥ ३६ ॥

---

१ गुणस्थाने इति पदं वृत्तिकृन्मते एवाधिकम् ।

२ अनुयाजेषु स्विष्टकृद्यागस्य संस्कारकर्म-
ताधिकरणम्-२१ ॥

स्विष्टकृदावापिकोऽनुयाजे स्यात्प्रयोजनवदङ्गानामर्थसंयोगात् ॥ ३७॥

१ दर्शपूर्णमासयोर्याज्यापुरोनुवाक्ययोः
संस्कारकर्मताधिकरणम्-२२ ॥

अन्वाहेति च शस्त्रवत्कर्म स्याच्चोदनान्तरात् ॥ ३८ ॥ संस्कारो वा चोदितस्य शब्दस्य वचनार्थत्वात् ॥३९॥ अवाच्यत्वान्नेति चेत्॥४०॥ स्याद्गुणार्थत्वात् ॥ ४१ ॥

२ मनोतायामूहाभावाधिकरणम्-२३ ॥

---

१ इदं सूत्रमधिकं वृत्तिकृन्मते ।

मनोतायां तु वचनादविकारः स्यात् ॥ ४२ ॥

२ कण्वरथन्तरस्य स्वयोनौ गानाधि-२४॥

पृष्ठार्थेऽन्यद्रथन्तरात्तद्योनिपूर्वत्वा[२]दृचां प्रविभक्तत्वात् ॥ ४३॥ स्वयोनौ वा सर्वाख्यत्वात् ॥ ४४ ॥ यूपवदिति चेत् ॥ ४५ ॥ न कर्मसंयोगात् ॥ ४६ ॥

१ कण्वरथन्तरस्य स्वयोन्युत्तरयोर्गानाधि० २५

कार्य्यत्वादुत्तरयोर्यथाप्रकृति ४७ समानदेवते वा तृचस्य विभागात् ४८

---

२ स्वारस्कादृचामिति जै. न्या. सम्मतः पाठः

१ अग्निष्टुति स्तुतशस्त्रयोरविकाराधि० २६॥

ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यात् ॥ ४९ ॥

२ चातुर्मास्येष्वाज्यशब्दस्य विकारेणावाहनाधिकरणम्–२७ ॥

उभयपानात्पृषदाज्ये दध्नोप्युपलक्षणं निगमेषु पातव्यस्योपलक्षणत्वात् ५०

न वा परार्थत्वाद्यज्ञपतिवत् ॥ ५१ ॥

स्याद्वा आवाहनस्य तादर्थ्यात् ॥५२॥

न वा संस्कार शब्दत्वात् ॥ ५३ ॥

स्याद्वा द्रव्याभिधानात् ॥ ५४ ॥

---

१ क्षणादीति स्या० भा० मते पाठः ।

दध्नस्तु गुणभूतत्वादाज्यपानिगमाः स्युर्गुणत्वं श्रुतेराज्यप्रधानत्वात् ५५॥ दधि वा स्यात्प्रधानमाज्ये प्रथमान्त्यसंयोगात् ॥ ५६ ॥ अपिवाज्यप्रधानत्वाद्गुणार्थे व्यपदेशो भक्त्या संस्कारशब्दः स्यात् ॥५७॥ अपि वाख्याविकारत्वात्तेन स्यादुपलक्षणम् ॥५८ न वा स्याद्गुणशास्त्रत्वात् ॥ ५९ ॥ (२७) ॥ ४२ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने दशमस्याध्यायस्य (नक्षत्रेष्टिविहितोपहोमानां चोदकप्राप्तनरिष्टहोमैः सह समुच्चयो नाम) चतुर्थः पादः ॥ १० ॥ ४ ॥

१ एकदेशग्रहणे प्राथमिकानामेव ग्रहणाधिकरणम्– १९ ॥

आनुपूर्व्यवतामेकदेशग्रहणेष्वागमवदन्त्यलोपः स्यात् ॥ १ ॥ लिंगदर्शनाच्च ॥ २ ॥ विकल्पो वा समत्वात् ॥ ३ ॥ क्रमादुपसर्जनोऽन्ते स्यात् ॥ ४ ॥ लिंगमविशिष्टं सङ्ख्याया हि तद्वचनम् ॥ ५ ॥ आदितो वा प्रवृत्तिः स्यादारम्भस्य तदादित्वाद्वचनादन्त्यविधिः स्यात् ॥ ६ ॥

१ एकत्रिके आद्ये त्यृचे गानाधि–०२ ॥

एकत्रिके तृचादिषु माध्यंदिने-

१ न्दिने छन्देति जै॰ न्या॰ ला॰ संमतः पाठः ।

च्छन्दसां श्रुतिभूतत्वात् ॥ ७ ॥ अ
दितो वा तन्नयायत्वादितरस्यानुमानि
कत्वात् ॥ ८ ॥ यथानिवेशश्च प्रकृ
वत्सङ्ख्यामात्राविकारत्वात् ॥ ९

१ एकस्यामृचि धूर्गानाधिकरणम्-३

त्रिकस्तृचे धुर्य्ये स्यात् १०॥एक
स्यां वा स्तोमस्यावृत्तिधर्मत्वात् ११॥

२ द्विरात्रादिषु दशरात्रस्य विध्यन्तानुष्ठा-
नाधिकरणम्-४ ॥

चोदनासु त्वपूर्वत्वाल्लिंगेन धर्म-
नियमः स्यात् ॥ १२ ॥ प्राप्तिस्तु
रात्रिशब्दसम्बन्धात् ॥ १३ ॥

२ अग्नौ धूननाद्यर्थानां मन्त्राणामनियमे-
नोपादानाधिकरणम्—९ ॥

अपूर्वासु तु संख्यासु विकल्पः स्यात्सर्वासामर्थवत्त्वात् ॥ १४ ॥

१ विवृद्धस्तोमकेऽप्राकृतानां साम्नामागमाधिकरणम्—६ ॥

स्तोमविवृद्धौ प्राकृतानामभ्यासेन सङ्ख्यापूरणमविकारात्सङ्ख्यायां गुणशब्दत्वादन्यस्य चाश्रुतित्वात् ॥ १५ ॥ आगमेन वाऽभ्यासस्याश्रुतित्वात् ॥ १६ ॥ सङ्ख्यायाश्च पृथक्त्वे निवेशात् ॥ १७ ॥ पराक्छन्द-

त्वात् ॥१८॥उक्ताविकाराच्च ॥१९
अश्रुतित्वादिति चेत्॥२० ॥ स्याद्
चोदितानां परिमाणशास्त्रम्२१आवा
वनचं वांभ्यासे नोपपद्यते॥२२॥साम
चोत्पत्तिसामर्थ्यात् ॥ २३ ॥ धुर्येष्व
पीति चेत् ॥ २४ ॥ नावृत्तिधर्मत्वा
त् ॥ २५ ॥

१ बहिष्पवमाने ऋगागमाधि०–७ ॥

बहिष्पवमाने तु ऋगागमः सामै-
कत्वात् ॥ २६ ॥

---

१ न चेति जे० न्या० ला० संमतःपाठः ।

३ सामिधेनीष्ववशिष्टानामागमेन संख्या-
पूरणाधिकरणम्–८ ॥

अभ्यासेन तु संङ्ख्यापूरणं सामिधे-
नीष्वभ्यासप्रकृतित्वात् ॥ २७ ॥ अविशे
षान्नेति चेत् ॥ २८ ॥ स्यात्तद्धर्मत्वात्
प्रकृतिवदभ्यस्येताऽऽसङ्ख्यापूरणात् ।
॥ २९ ॥ यावदुक्तं वा कृतपरिमाण-
त्वात् ॥ ३० ॥ अधिकानाञ्च दर्श-
नात् ॥ ३१ ॥ कर्मस्वपीति चेत् ॥ ३२ ॥
न चोदितत्वात् ॥ ३३ ॥

---

१ न कर्मोति जै० न्या० ला० समंतः पाठः ।

१ षोडशिनां प्राकृतत्वाधिकरणम्-९ ॥

षोडशिनो वैकृतत्वं तत्र कृत्स्नविधानात् ॥ ३४ ॥ प्रकृतौ चाऽभावदर्शनात् ॥ ३५ ॥ अयज्ञवचनाच्च ॥ ॥३६॥ प्रकृतौ वा शिष्टत्वात्॥३७॥ प्रकृतिदर्शनाच्च ॥ ३८ ॥ आम्नानं परिसंख्यार्थम् ॥३९॥ उक्तमभावदर्शनम्॥४०॥गुणादयज्ञत्वम् ॥ ४१ ॥

१ आग्रयणादेव षोडशिग्रहणाधि०-१०॥

तस्याग्रयणाद्ग्रहणम् ॥ ४२ ॥ उक्थ्याच्च वचनात् ॥ ४३ ॥

---

१ म्नातं मेति जै० न्या० ला० संमतः पाठः ।

१ तृतीयसवन एव षोडशिग्रहणाधि०—११

तृतीयसवने वचनात्स्यात् ॥४४॥ अनभ्यासे पराक्छन्दस्य तादर्थ्यात् ॥ ४५ ॥ उक्थ्यविच्छेदवचनाच्च ॥ ॥ ४६ ॥ आग्रयणाद्वा पराक्छन्दस्य देशवाचित्वात्पुनराधेयवत् ॥ ४७ ॥ विच्छेदः स्तोमसामान्यात् ॥४८ ॥

षोडशिग्रहस्य सस्तोत्रशस्त्रताधि०—१२॥

उक्थ्याऽग्निष्टोमसंयोगादस्तुतशस्त्रः स्यात्सति संस्थान्यत्वम् ॥४९ ॥ स्तुतशस्त्रो वा तदङ्गत्वात् ॥ ५० ॥

१ चनत्वादित्ति चशब्दशून्यः पाठो जै० न्या० मा० संमतः ।

लिङ्गदर्शनाच्च ॥५१॥ वचनात्संस्था-न्यत्वम् ॥ ५२ ॥

२+१ अङ्गिरसां द्विरात्रे षोडशिनः परि-सङ्ख्याधिकरणम्--१३ ॥

अभावादतिरात्रेषु गृह्यते ॥ ५३ ॥ अन्वयो वानारभ्य विधानात् ॥५४॥

२ नानाहीने षोडशिग्रहग्रहणाधि०१४ ॥

चतुर्थेचतुर्थेऽहन्यहीनस्य गृह्यत इत्यभ्यासेन प्रतीयेत भोजनवत्५५॥ अपि वा सङ्ख्यावत्त्वान्नाहीनेषु गृह्यते पक्षवदेकस्मिन्त्संख्यार्थभावात ॥५६। भोजने चं तत्सङ्ख्यं स्यात् ॥ ५७ ॥

१ चशब्दो नास्ति जैमि० न्या० मा० मते।

१+३ ग्रहाणामाग्रयणाग्रतासाधकत्वमि-
ति--जगत्साम्नो । जगत्पृथगुत्पन्नसामताकत्व-
मिति च वर्णकद्वयात्मकमधिकरणम्—१५ ॥

जगत्साम्नि सामाभावादृक्तः साम तदाख्यं स्यात् ॥ ५८ ॥

२ गोसवे उपवत्यग्रवत्योरभावाधि०१६ ॥

उभयसाम्नि नैमित्तिकं विकल्पेन समत्वात्स्यात् ॥ ५९ ॥ मुख्येन वा नियम्यते ॥ ६० ॥ निमित्तविघाताद्वा क्रतुयुक्तस्य कर्म स्यात् ॥ ६१ ॥

१ ऐन्द्रवायवस्यासर्वादावतिकर्षाधि०--१७॥

ऐन्द्रावायवस्याग्रवचनादादितः प्रतिकर्षः स्यात् ॥ ६२ ॥ अपि वा ध-

र्मविशेषात्तद्धर्माणां स्वस्थाने प्रतिकर्षणादग्रत्वमुच्यते ॥ ६३ ॥ धारासंयोगाच्च ॥ ६४ ॥

१ कामसंयोगैष्ट्यैन्द्रवायवस्यादावप्रतिकर्षाधिकरणम्-१८ ॥

कामसंयोगे तु वचनादादितः प्रतिकर्षः स्यात् ॥ ६५ ॥ तद्देशानां वाऽग्रसंयोगात्तद्युक्तं कामशास्त्रं स्यान्नित्यसंयोगात् ॥ ६६ ॥

२ आश्विनाग्रादीनां ग्रहाणां प्रतिकर्षाधिकरणम्-१९ ॥

---

१ युक्त केति जे० न्या० ला० सम्मतः पाठः ।

परेषु वाग्रशब्दः पूर्ववत्स्यात्तदादिषु ॥ ६७ ॥ प्रतिकर्षो वा नित्यार्थेनाग्रस्य तदसंयोगात् ॥ ६८ ॥ प्रतिकर्षञ्च दर्शयति ॥ ६९ ॥

२ आश्विनादीनां ग्रहाणामैन्द्रवायवस्य पुरस्तात्प्रतिकर्षाधिकरणम्--२० ॥

पुरस्तादैन्द्रवायवादग्रस्य कृतदेशत्वात् ॥ ७० ॥ तुल्यधर्मत्वाच्च ॥ ७१ ॥ तथा च लिङ्गदर्शनम् ॥ ७२ ॥

---

(१) पु चाग्रेति जै॰ न्या॰मा॰ पाठः ।

२ त्याग्रस्येति क्वचित्पाठः ।

३ यवस्याग्रेति जै॰ न्या॰ ग्रा॰ संमतः पाठः ।

१ सादनस्यापि प्रतिकर्षाधिकरणम्-२१॥

सादनं चापि शेषत्वात् ॥ ७३ ॥ लिङ्गदर्शनाच्च ॥ ७४ ॥

१ प्रदानस्याप्रतिकर्षाधिकरणम्- २२ ॥

प्रदानं चापि सादनवत् ॥७५॥ न वा प्रधानत्वाच्छेषत्वात्सादनंतथा ७६

१ त्र्यनीकायामैन्द्रवायवाग्रतोक्तेः समानविध्यर्थताधिकरणम्-२३ ॥

त्र्यनीकायां न्यायोक्तेष्वाम्नानं गुणार्थं स्यात् ॥ ७७ ॥ अपि वाऽहर्गणेष्वग्निवत्समानं विधानं स्यात् ७८

---

२ मानवीति जै० न्या० ला० संमतः पाठः ।

१ व्यूढद्वादशाहस्य समूढविकारत्वाधिकरणम्–२४ ॥

द्वादशाहस्य व्यूढसमूढत्वं पृष्ठवत्समानविधानं स्यात् ॥७९॥ व्यूढो वा लिंगदर्शनात्समूढविकारः स्यात् ॥ ८० ॥ कामसंयोगात् ॥ ८१ ॥ तस्योभयथा प्रवृत्तिरैककर्म्यात् ८२॥

१ संवत्सरसत्रेनीकानां विवृद्ध्यधि०–२५॥

एकादशिनीवत्त्र्यनीका प्रवृत्तिः स्यात् ॥ ८३ ॥ स्वस्थानविवृद्धिर्वाऽह्नामप्रत्यक्षसङ्ख्यत्वात् ॥ ८४ ॥ पृ-

१ जै० न्या० स्यादिति नास्ति ।

२ शिवनवत्त्र्यनीका परिवृत्तिरिति जै०न्या०मा०पाठ० ।

ष्टयावृत्तौ चाग्रयणस्य दर्शनात्त्रय
स्त्रिंशे परिवृत्तौ पुनरैन्द्रवायवः स्यात
॥ ८५ ॥ वचनात्परिवृत्तिरैकादशिनेषु
॥ ८६ ॥ लिंगदर्शनाच्च ॥ ८७ ॥

१ व्यूढेमन्त्राणां छन्दोव्यतिक्रमाधि०-२६॥

छन्दोव्यतिक्रमाद्व्यूढे भक्षपवमान-
परिधिकपालमन्त्राणां यथोत्पत्तिवच-
नमूहवत्स्यात्॥८८॥(२६)॥४२॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमां-
दर्शने दशमस्याध्यायस्य (बाधप्रसङ्गाग-
तग्रहादिविचारो नाम) पञ्चमः
पादः ॥ १० ॥ ५ ॥

१ रथन्तरादीनां साम्नां तृचे गानाधि०–१

एककूंस्थानानि यज्ञे स्युः स्वाध्यायवत् ॥ १ ॥ तृचे वा लिंगदर्शनात् ॥ २ ॥

१ स्वर्दृक्छब्देन वीक्षणस्य कालार्थताधिकरणम्– २ ॥

स्वर्दृशं प्रति वीक्षणं कालमात्रं-परार्थत्वात् ॥ ३ ॥

१ गवामयनिके पृष्ठचषडहे बृहद्रथन्तरयोर्विभागाधि०– ३ ॥

पृष्ठ्यस्य युगपद्विधेरेकाहवद्विसामत्वम् ॥ ४ ॥ विभक्ते वा समस्तविधानात्तद्विभागेऽप्रतिषिद्धम् ॥ ५ ॥

१ प्रायणीयोदयनीययोरैकादशिनानां विभागाधिकरणम्- ४ ॥

समासस्त्वेकादशिनेषु तत्प्रकृतित्वात् ॥ ६ ॥ विहारप्रतिषेधाच्च॥७ श्रुतितो वा लोकवद्विभागः स्यात् ॥ ८ ॥ विहारप्रकृतित्वाच्च ॥ ९ ॥ यावच्छक्यं तावद्विहारस्यानुग्रहीतव्य विशये च तदासत्तिः ॥ १० ॥ त्रय स्तथेति चेत् ॥ ११ ॥ न समत्वात्प्रयाजवत ॥ १२ ॥

१ सर्वपृष्ठे देशविशेषव्यवस्थाधिकरणम्-५॥

सर्वपृष्ठे पृष्ठशब्दात्तेषां स्यादेकदे-

शत्वं पृष्ठस्य कृत्स्नदेशत्वात् ॥ १३ ॥
विधेस्तु विप्रकर्षः स्यात् ॥ १४ ॥

१ वैरूपवैराजसाम्नोः पृष्ठकार्ये निवेशाधिकरणम्–६ ॥

वैरूपसामा क्रतुसंयोगात्त्रिवृद्वदेकसामा स्यात् ॥ १५ ॥ पृष्ठार्थे वा प्रकृतिलिंगसंयोगात् ॥ १६ ॥ त्रिवृद्वदिति चेत् ॥ १७ ॥ न प्राकृतावकृत्स्नसंयोगात् ॥ १८ ॥ विधित्वान्नेति चेत् ॥ १९ ॥ न स्याद्विशये तन्न्यायत्वात्कर्माविभागात् ॥ २० ॥ प्रकृतेश्चाविकारात् ॥ २१ ॥

१ त्रिवृति स्तोमगतसंख्याविकाराधि०-७

त्रिवृति सङ्ख्यात्वेन सर्वसङ्ख्याविकारः स्यात् ॥२२॥ स्तोमस्य वा तल्लिंगत्वात् ॥ २३ ॥

२ उभयसाम्नि बृहद्रथन्तरयोः समुच्चया-धिकरणम्-८ ॥

उभयसाम्नि विश्वजिद्वद्विभाग स्यात् ॥२४॥ पृष्ठार्थे वाऽतदर्थत्वात् ॥ २५ ॥ लिंगदर्शनाच्च ॥ २६ ॥

१ मध्वशनघृताशनयोः षडहान्तेनुष्ठाना-धिकरणम्-९ ॥

पृष्ठे रसभोजनमावृत्ते संस्थिते त्र

यस्त्रिंशेऽहनि स्यात्तदानन्तर्य्यात्प्रकृतिवत् ॥ २७ ॥ अन्ते वा कृतकालत्वात् ॥ २८ ॥

१ षडहावृत्तावपि मध्वशनघृताशनयोः सकृदनुष्ठानाधिकरणम्–१० ॥

अभ्यासे च तदभ्यासः कर्मणः पुनः प्रयोगात् ॥ २९ ॥ अन्ते वा कृतकालत्वात् ॥ ३० ॥

१ गवामयने मध्वशनघृताशनयोः प्रतिमासमावृत्त्यधिकरणम्–११ ॥

आवृत्तिस्तु व्यवाये कालभेदात् ॥ ३१ ॥ ॥

१ द्वादशाहे सत्रिभिरपि मध्वशनाधि०-१२॥

मधु न दीक्षिता ब्रह्मचारित्वात् ॥ ३२ ॥ प्राश्येतवायज्ञार्थत्वात् ॥ ३३ ॥

१ मानसस्य द्वादशाहाङ्गताधिकरणम्-१३॥

मानसमहरन्तरं स्यां[1]द्वादशाहे व्यपदेशात् ॥ ३४ ॥ तेन च संस्तवात् ॥ ३५ ॥ अहरन्ताच्च परेण चोदना ॥ ३६ ॥ पक्षे सङ्ख्या सहस्रवत् ॥ ३७ ॥ अहरंगवांशुवच्चोदनाभावात् ॥ ३८ ॥ दशमविसर्गवचनाच्च ॥ ३९ ॥ दशमेऽहनीति च तद्गुण-

---

१ स्याद्भेदेन च्छेदयोरिति जै० न्या० ला० सं मतः पाठः ।

शास्त्रात् ॥ ४० ॥ सङ्ख्यासामञ्ज-स्यात् ॥ ४१ ॥ पश्चातिरेके चैकस्य भावात् ॥ ४२ ॥ स्तुतिव्यपदेशमंगेन विप्रातिषिद्धं व्रतवत् ॥ ४३ ॥ वचना-नतान्तत्वम् ॥ ४४ ॥

१ सत्रस्य बहुकर्तृकत्वाधिकरणम्—१४ ॥

सत्रमेकः प्रकृतिवत् ॥४५॥ बंहु-वचनात्तु बहूनां स्यात् ॥ ४६ ॥अप-देशः स्यादिति चेत् ॥ ४७ ॥नैकव्य पदेशात् ॥ ४८ ॥ सन्निवापं च दर्श-

१ बहुवेत्यत्र बहुशब्दरहितः पाठो जै० न्या० ला० संमतः ।

यति ॥ ४९ ॥ बहूनामिति चैकस्मि

न्विशेषवचने व्यर्थम् ॥ ५० ॥

१ सत्रे यजमानानामेव ऋत्विक्त्वाधिकरणम्- १५॥

अन्ये स्युर्ऋत्विजः प्रकृतिवत्५१॥ अपि वा यजमानाः स्युर्ऋत्विजामभिधानसंयोगात्तेषां स्याद्यजमानत्वम् ॥ ५२ ॥ कर्तृसंस्कारो वचनादाधातृवदिति चेत् ॥ ५३ ॥ स्याद्विशये तन्न्यायत्वात्प्रकृतिवत् ॥ ५४ ॥ स्वाम्याख्याः स्युर्गृहपतिवदिति चे-

१ चनं व्येति जै० न्या० सम्मतः पाठः ।

त् ॥ ५५॥ न प्रसिद्धग्रहणत्वादसंयु-
क्तस्य तद्धर्मेण ॥ ५६ ॥ बहूनामिति
तुल्येषु विशेषवचनं नोपपद्यते॥५७॥
दीक्षिताऽदीक्षितव्यपदेशश्च नोपपद्य-
तेऽर्थयोर्नित्यभावित्वात् ॥५८॥अद-
क्षिणत्वाच्च ॥ ५९ ॥

१ सत्राहीनयोर्विवेकाधिकरणम्—१६ ॥

द्वादशाहस्य सत्रत्वमासनोपेयिचो-
दनेन यजमानबहुत्वेन च सत्रशब्दा-
भिसंयोगात् ॥ ६० ॥ यजतिचोदना.

१ इदं सूत्रमधिकं वृत्तिकृन्मते ।

दृहीनत्वं स्वामिनां चाऽस्थितपरिमाणत्वात्॥ ६१ ॥

१ पौण्डरीके सकृदेव दक्षिणादानाधिकरणम्- १७ ॥

अहीने दाक्षिणाशास्त्रं गुणत्वात्प्रत्यहं कर्मभेदः स्यात् ॥ ६२ ॥ सर्वस्य वैककर्म्यात् ॥ ६३ ॥ पृषदाज्यवद्वाऽह्नां गुणशास्त्रं स्यात् ॥ ६४ ॥ ज्योतिष्टोम्यस्तु दाक्षिणाः सर्वासामेककर्मत्वात्प्रकृतिवत्तस्मात्तासां विकारः स्यात् ॥ ६५ ॥ द्वादशाहे तु वचनात्प्रत्यहं दाक्षिणाभेदस्तत्प्रकृतित्वात्परेषु तासां विकारः

स्यात् ॥ ६६ ॥ परिक्रयाविभागाद्वा समस्तस्य विकारः स्यात् ॥ ६७ ॥ भेदस्तु गुणसंयोगात् ॥ ६८ ॥

२ पौण्डरीके सर्वासां दक्षिणानां विभज्य नयनाधिकरणम्–१८ ॥

प्रत्यहं सर्वसंस्कारःप्रकृतिवत्सर्वासां सर्वशेषत्वात् ॥६९॥ एकार्थत्वान्नेति चेत् ॥ ७० ॥ उत्पत्तौ कालभेदात् ॥ ७१ ॥ विभज्य तु संस्कारवचनाद्द्वादशाहवत् ॥ ७२ ॥

१ स्यादुत्पत्तौति जै० न्या० संमतः पाठः ।

१ मानवीषु पञ्चदशानामेव सामिधेनीवि-
धिकरणम्-१९ ॥

लिंगेन द्रव्यनिर्देशे सर्वत्र प्रत्ययः स्याल्लिंगस्य सर्वगामित्वात् ॥ ७३ ॥ यावदर्थं वाऽर्थे शेषत्वादतोऽर्थेन परिमाणं स्यात्तस्मिंश्च लिंगसामर्थ्यम् ॥७४॥ आग्नेये कृत्स्नविधिः॥७५॥ ऋजीषस्य प्रधानत्वादहर्गणे सर्वस्य प्रतिपत्तिः स्यात् ॥ ७६ ॥

१ वाससि मानोपावहरणयोरनुष्ठानाधिकर-
णम्-२० ॥

वाससि मानोपावहरणौ प्रकृतौ सोमस्य वचनात् ॥ ७७ ॥

१ अहर्गणे वासोन्तरोत्पादनाधि०–२१ ॥

तत्राहर्गणेऽर्थाद्वासःप्रकृतिःस्यात्७८।

१ उपावहरणार्थमेव वासोन्तरोत्पादनाधिकरणम्–२२ ॥

मानं प्रत्युत्पादयेत्प्रकृतौ तेन दर्शनादुपावहरणस्य ॥ ७९ ॥ हरणे वा श्रुत्यसंयोगादर्थाद्विकृतौ तेन ॥८०॥ (२२) ॥ २७ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने दशमस्याध्यायस्य(बाधप्रसङ्गागतसामविचारो नाम)षष्ठः पादः॥१०॥६॥

---

१ ज्योतिष्टोमे प्रत्यङ्गं हविर्भेदाधिकरणम्–१

पशावेकहविष्ट्वं समस्तचोदितत्वा-

त् ॥ १ ॥ प्रत्यङ्गं वा ग्रहवदङ्गान
पृथक्कल्पनत्वात् ॥ २ ॥

२ पशोर्हृदयादिभिरेवाङ्गविशेषैर्यागविशेषा
नुष्ठानाधिकरणम्--२ ॥

हविर्भेदात्कर्मणोऽभ्यासस्तस्मा-
त्तेभ्योऽवदानं स्यात् ॥ ३ ॥ आज्य-
भागवद्वा निर्देशात्परिसंख्या स्यात्
॥ ४ ॥ तेषां वा व्यवदानत्वं विवक्ष-
न्नभिनिर्दिशेत्पशोः पञ्चावदानत्वात्
॥ ५ ॥ अंसशिरोनूकसक्थिप्रतिषे-
धश्च तदन्यपरिसंख्यानेऽनर्थकः स्या-
त्प्रदानन्यात्वात्तेषां निरवदानप्रतिषेधः

स्यात् ॥ ६ ॥ अपि वा परिसंख्या स्यादवदीयशब्दत्वात् ॥ ७ ॥ अब्राह्मणे च दर्शनात् ॥ ८ ॥ श्रुताश्रुतोपदेशाच्चतेषामुत्सर्गवदयज्ञशेषत्वं सर्वेषांन श्रपणं स्यात् ॥ ९ ॥

१ ज्योतिष्टोमेऽनिज्याशेषैरुयज्ञैः स्विष्टकृद्धोमाधिकरणम्—३ ॥

इज्याशेषात्स्विष्टकृदिज्येत प्रकृतिवत् ॥ १० ॥ त्र्यंगैर्वा शरवद्विकारः स्यात् ॥ ११ ॥

---

१ न श्रपणं स्यादिति जै० न्या० लाकुम्मते नाऽस्ति ।

२ अध्वर्युभक्षया इडाभक्षविकारताधिकरणम् ४

अध्वर्युर्वा होतुस्त्वयं[1] वादिडाभक्षविकारः स्यात् ॥ १२ ॥ शेषे वा समवेतत्वात्तस्मात् द्रथवान्नियमः स्यात् ॥ १३ ॥ अशास्त्रत्वात्तु नैवं स्यात् ॥ १४ ॥ अपि वा दानमात्रं स्याद्भक्षशब्दानभिसम्बन्धात् ॥ १५ ॥ दातुस्त्वविद्यमानत्वादिडाभक्षविकारः स्याच्छेषं प्रत्याविशिष्टत्वात् ॥ १६ ॥

२ वनीष्ठोर्भक्षविकारताधिकरणम्–५ ॥

अग्नीधश्च वनिष्ठरध्वर्युवत् ॥ १७ ॥

---

१ श्री रियाति तुच्चदोधिको जै० न्या० न्मते ।

१ मैत्रावरुणस्यापि शेषभक्षास्तितत्त्वा-
धिकरणम्—६ ॥

अप्राकृतत्वान्मैत्रावरुणस्याभक्ष-
त्वम् ॥ १८ ॥ स्याद्वा होत्रध्वर्यु-
विकारत्वात्तयोःकर्माभिसम्बन्धात् १९

१ मैत्रावरुणस्यैकभागताधिकरणम्—७ ॥

द्विभागः स्याद्विकर्मत्वाद् ॥२०॥
एकत्वाद्वैकभागः स्याद्भागस्याश्रुति-
भूतत्वात् ॥ २१ ॥

१ प्रतिप्रस्थातुर्भक्षाभावाधिकरणम्—८ ॥

प्रतिप्रस्थातुश्च वपाश्रपणात् ॥२२॥
अभक्षो वा कर्मभेदात्तस्याः सर्वप्रदा-
नत्वात् ॥ २३ ॥

७ गृहमेधीयकेऽपूर्वाज्यभागविधानाधिकरणम्-९ ॥

विकृतौ प्राकृतस्य विधेर्ग्रहणात्पुनः श्रुतिरनर्थकं स्यात् ॥ २४ ॥ अपि वाऽऽग्नेयवद्द्विशब्दत्वं स्यात् ॥ २५ ॥ न वा शब्दपृथक्त्वात् २६ ॥ अधिकं वार्थवत्त्वात्स्यादर्थवादगुणाभावे वचनादविकारे तेषु हि तादर्थ्यं स्यादपूर्वत्वात् ॥ २७ ॥ प्रतिषेधः

१ नर्थिका स्येति जै० न्या कृत्संमतः पाठः । नर्थकः स्येति वृत्तिपुस्तके मूले पाठः । वृत्त्यानुसारेण नर्थकं स्येति पाठः

स्यादिति चेत् ॥ २८ ॥ नाश्रुतत्वात् ॥२९॥ अग्रहणादिति चेत् ॥ ३०॥ न तुल्यत्वात् ॥ ३१ ॥ तथा तद्ग्रहणे स्यात् ॥ ३२ ॥ अपूर्वतां तु दर्शयेद्ग्रहणस्यार्थवत्त्वात् ॥ ३३ ॥

१ गृहमेधीये स्विष्टकृताद्यनुष्ठानाधि० १०॥

ततोऽपि यावदुक्तं स्यात् ॥३४॥

१ गृ०--प्राशित्रादिभक्षणाभावाधि० ११ ॥

स्विष्टकृति भक्षप्रतिषेधःस्यात्तुल्यकारणत्वात् ॥ ३५ ॥ अप्रतिषेधो वा दर्शनादिडायां स्यात ॥ ३६ ॥ प्रतिषेधो वा विधिपूर्वस्य दर्शनात्॥३७॥

२ प्रायणीयातिथ्ययोः शंय्विडान्ततानि यमाधिकरणम्—१२ ॥

शंय्विडान्तत्वे विकल्पः स्यात्परेषुपत्न्यनुयाजप्रतिषेधोऽनर्थकः स्यात् ॥ ३८ ॥ नित्यानुवादो वा कर्मणः स्यादशब्दत्वात् ॥ ३९ ॥

२ प्रायणीयातिथ्ययोः पूर्वाभ्यामेव शंय्विडाभ्यां संस्थाधिकरणम् १३ ॥

प्रतिषेधवच्चोत्तरस्य परस्तात्प्रतिषेधः स्यात् ॥ ४० ॥ प्राप्तेर्वा पूर्वस्य वचनादतिक्रमः स्यात् ॥ ४१ ॥ प्रति

---

१ षेधार्थवेति जै० न्या० कृत्सम्मतः पाठः ।

षेधस्य त्वरायुक्तत्वात्तस्य च नान्यदेशत्वम् ॥ ४२ ॥

२ उपसदामपूर्वार्थत्वाधिकरणम्—१४ ॥

उपसत्सु यावदुक्तमकर्म स्यात् ॥ ॥ ४३ ॥ स्रौवेण वाऽगुणत्वाच्छेषप्रतिषेधः स्यात् ॥ ४४ ॥ अप्रातिषेधो वा प्रतिषिध्यप्रतिप्रसववत् ४५॥ अनिज्या वा शेषस्य मुख्यदेवतानभीज्यत्वात् ॥ ४६ ॥

२अवभृथेऽ पूर्वकर्मताधिकरणम्—१५ ॥

अवभृथे बर्हिषः प्रतिषेधाच्छेषक-

१ त्वादिति जै॰ न्या॰ छा॰ सं॰ पाठः।

र्मं स्यात् ॥ ४७ ॥ आज्यभागयोर्वा गुणत्वाच्छेषप्रतिषेधः स्यात् ॥४८॥ प्रयाजानां त्वेकदेशप्रतिषेधवाक्यशेषत्वं तस्मान्नित्यानुवादः स्यात्॥४९॥ आज्यभागयोर्ग्रहणं नित्वानुवादो वा गृहमेधीयवत्स्यात् ॥ ५० ॥

१ वाजपेयादौ यूपादीनां खादिरत्वादिनियमाधिकरणम्-१६ ॥

विरोधिनामेकश्रुतौ नियमः स्याद्ग्रहणस्यार्थवत्त्वाच्छरवच्च श्रुतितो विशिष्टत्वात् ॥ ५१ ॥ उभयप्रदेशादिति

१ ज्ञोनवीति जै० न्या० मा० पाठः ।

चेत् ॥५२॥ शरेष्वपीति चेत्॥५३॥ विरोध्यग्रहणात्तथा शरेष्विति चेत्॥ ॥ ५४ ॥ तथेतरस्मिन्[1] ॥ ५५ ॥ श्रुत्यानर्थक्यमिति चेत् ॥ ५६ ॥ ग्रहणस्यार्थवत्त्वादुभयोरप्रतिपत्तिः स्यात् ॥ ५७ ॥

२ काम्येष्टिषु प्राकृतद्रव्यदैवतस्य निवृत्त्यधिकरणम्—१७ ॥

सर्वासाञ्च गुणानामर्थवत्त्वाद्ग्रहणमप्रवृत्ते स्यात् ॥ ५८ ॥ अधिकं स्यादिति चेत्॥५९॥नार्थाभावात्॥६०॥

---

१ तथोत्तरस्मिन्निति जै० न्या० संमतः पाठः ।

१ सोमापौष्णपशौ खादिरयूपस्य नियमाधिकरणम्-१८ ॥

तथैकार्थविकारे प्राकृतस्याप्रवृत्तिः प्रवृत्तौ हि विकल्पः स्यात् ॥ ६१ ॥ यावच्छ्रुतीति चेत् ॥ ६२ ॥ न प्रकृतावशब्दत्वात् ॥ ६३ ॥

२ ब्रह्मवर्चसकामैर्व्रीहिभिरेव यागाधि०-१९॥

विकृतौ त्वनियमः स्यात्पृषदाज्यवद्ग्रहणस्य गुणार्थत्वादुभयोश्च प्रदिष्टत्वाद्गुणशास्त्रं यदेति स्यात् ॥ ॥ ६४ ॥ ऐकार्थ्याद्वा नियम्येत श्रुतितो विशिष्टत्वात् ॥ ६५ ॥ विरो-

धित्वाच्च लोकवत् ॥ ६६ ॥ क्रतोश्च तद्गुणत्वात् ॥ ६७ ॥ [1]विरोधिना-श्च तच्छ्रुतावशब्दत्वाद्विकल्पः स्यात् ॥ ६८ ॥ पृषदाज्ये समुच्चयाद्ग्रहण-स्य गुणार्थत्वम् ॥ ६९ ॥ [2]यद्यपि चतुरवत्तीति तु नियमे नोपपद्यते ७० ॥ क्रत्वन्तरे वा तन्न्यायत्वात्कर्मभे-दात् ॥ ७१ ॥

१ पञ्चावदानतायाः सर्वांगसाधारणता-धिकरणम्—२० ॥

यथाश्रुतीति चेत् ॥ ७२ ॥ न

[1] इदं सूत्रं वृत्तिकृन्मते नास्ति ।

[2] इदं सूत्रं वृत्तिकृन्मते नास्ति ।

चोदनैकत्वात् ॥७३॥ (२०) ॥३४॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने दशमस्याध्यायस्य (पश्वंगेषु पत्यंगं हविर्भेदो न कृत्स्नः पशुहविर्भेदो गृहमेधीयमपूर्वं कर्मेत्यादिबाधप्रसंगागतप्रकीर्णविचारो नाम) सप्तमऽपादः॥ १० ॥७॥

---

१ प्रदेशानारभ्यविधानयोर्निषेधस्य पर्युदासत्वाधिकरणम्-१ ॥

प्रतिषेधः प्रदेशोऽनारभ्य विधाने प्राप्तप्रतिषिद्धत्वाद्विकल्पः स्यात्१॥

---

१ ने च प्रेति जै० न्या० संमतः पाठः ।

अर्थप्राप्तवदिति चेत् ॥ २ ॥ न तुल्यहेतुत्वादुभयं शब्दलक्षणम् ॥ ३ ॥ अपि तु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य विधिनामेकदेशः स्यात् ॥ ४ ॥

३ निषेधस्यार्थवादताधि०-२ ॥

अपूर्वे चार्थवादः स्यात् ॥ ५ ॥

२ अतिरात्रे षोडशिग्रहनिषेधस्य विकल्परूपताधिकरणम्-३ ॥

शिष्टा तु प्रतिषेधः स्यात् ॥ ६ ॥

१ जर्तिलोक्तौ निषेधस्यार्थवादताधि०४ ॥

न चेदन्यं प्रकल्पयेत्प्रक्लृप्तावर्थवादः

स्यादानर्थक्यात्परसामर्थ्यात् ॥ ७ ॥

२ त्रैयम्बकादावभिघारणानभिघारणादीना-
मर्थवादताधिकरणम्-५ ॥

पूर्वैश्च तुल्यकालत्वात् ॥ ८ ॥

२ आधाने उपवादस्य विकल्पताधि०-६॥

उपवादश्च तद्वत् ॥ ९ ॥ प्रतिषे-
धादकर्मेति चेत् ॥ १० ॥ न शब्द-
पूर्वत्वात् ॥ ११ ॥

२ दीक्षितदाननिषेधस्य पर्युदासताधि०-७

दीक्षितस्य दानहोमपाकप्रतिषेधेऽ-
विशेषात्सर्वदानहोमपाकप्रतिषेधः
स्यात् ॥ १२ ॥ अक्रतुयुक्तानां वा

१ ध्याँचोति जै० न्या० संमतः पाठः ।

धर्मः स्यात्क्रतोः प्रत्यक्षशिष्टत्वात् ॥ १३ ॥ तस्य वाप्यानुमानिकमविशेषात् ॥ १४ ॥ अपि तु वाक्यशेषत्वादितरपर्युदासः स्यात् प्रतिषेधे विकल्पः स्यात् ॥ १५ ॥

२ वर्त्महोमादिभिराहवनीयस्य बाधाधि०—८॥

अविशेषेण यच्छास्त्रमन्याय्यत्वाद्विकल्पस्य तत्सन्दिग्धमाराद्विशेषशिष्टं स्यात् ॥ १६ ॥

२ वैमृधादिषु साप्तदश्यविधिवाक्यशेषताधिकरणम्—९ ॥

अप्रकरणे तु यच्छास्त्रं विशेषे श्रू-

यमाणमाविकृतमाज्यभागवत्प्राकृतप्रतिषेधार्थम् ॥ १७ ॥

विकारे तु तदर्थं स्यात् ॥ १८ ॥

वाक्यशेषो वा क्रतुना ग्रहणात्स्यादनारभ्य विधानस्य ॥ १९ ॥

२ अविहितस्वाहाकारेषु प्रदानेषु स्वाहाकारविधानाधिकरणम्– १० ॥

मन्त्रेष्ववाक्यशेषत्वं गुणोपदेशात्स्यात् ॥ २० ॥ अनाम्नाते[2] दर्शनात् ॥ २१ ॥ प्रतिषेधाच्च ॥ २२ ॥

---

१ इदं सूत्रं वृत्तिकृन्मते नास्ति ।

२ ते च देति जै० न्या० संमतः पाठः ।

२ अग्र्यतिग्राह्यस्य विकृतावुपदेशाधि-
करणम्– ११ ॥

अग्र्यतिग्राह्यस्य विकृतावुपदेशा-
दप्रवृत्तिः स्यात् ॥२३ ॥ मासि ग्रहणं
च तद्वत् ॥ २४ ॥ ग्रहणं वा तुल्य-
त्वात् ॥ २५ ॥ लिङ्गदर्शनाच्च ॥२६॥
ग्रहणं समानविधानं स्यात् ॥ २७ ॥
मासि ग्रहणमभ्यासप्रतिषेधार्थम् २८॥

१ उपस्तरणाभिघारणाभ्यां सहैव चतुर-
वदानाधिकरणम्– १२ ॥

उत्पत्तितादर्थ्याच्चतुरवत्तं प्रधान-
स्य होमसंयोगादधिकमाज्यमतुल्य-

त्वाल्लोकवदुत्पत्तेर्गुणभूतत्वात् ॥ २९ ॥ तत्संस्कारश्रुतेश्च ॥ ३० ॥ ताभ्यां वा सह स्विष्टकृतः संहृत्त्वे द्विरभिघारणेन तदाप्तिवचनात् ॥ ३१ ॥ तुल्यवद्वाभिधाय सवैषुभ त्त्यनुक्रमणात् ३२ ॥

१ उपांशुयाजेपि चतुरवत्तस्यावश्यकताधिकरणम्-१३ ॥

साप्तदश्यवन्नियम्येत ॥ ३३ ॥ हविषो वा गुणभूतत्वात्तथाभूतविवक्षा स्यात् ॥ ३४ ॥

---

१ सकृत्त्वे इति जै० न्या० संमतः पाठः ।

२ रवघेति जै० न्या० संमतः पाठः ।

३ क्रमादिति वृत्तिकृत्संमतः पाठः ।

४ दर्शपूर्णमासयोराग्नेयैन्द्राग्नयोरनुवादताधिकरणम्– १४ ॥

पुरोडाशाभ्यामित्यधिकृतानां पुरोडाशयोरुपदेशस्तच्छ्रुतित्वाद्वैश्यस्तोमवत् ॥ ३५ ॥ न त्वनित्याधिकारोऽस्ति विधेर्नि (धौ नि) त्येन सम्बन्धस्तस्मादवाक्यशेषत्वम् । ३६ ॥ सति चं नैकदेशेन कर्तुः प्रधानभूतत्वात् ॥ ३७ ॥ कृत्स्नत्वात्तु तथा स्तोमे ॥ ३८ ॥ कर्तुः स्यादिति चेत् ॥ ३९ ॥ न गुणार्थत्वात्प्राप्ते नं चो-

१ ति न चैकेति वृत्तिकृत्संमतः पाठः ।
२ प्ते च नोपेति जै० न्या० संमतः पाठः ।

पदेशार्थः ॥ ४० ॥ कर्मणोस्तु प्रकरणे तन्न्यायत्वाद्गुणानां लिङ्गेन कालशास्त्रं स्यात् ॥ ४१ ॥ यदि तु सान्नाय्यं सोमयाजिनो न ताभ्यां समवायोऽस्ति विभक्तकालत्वात् ॥ ४२ ॥ अपि वा विहितत्वाद्गुणार्थायां पुनःश्रुतौ सन्देहे श्रुतिर्द्विदेवतार्था स्याद्यथाऽनभिप्रेतस्तथाऽऽग्नेयो दर्शनादेकदेवते ॥ ४३ ॥ विधिं तु बादरायणः ॥ ४४ ॥ प्रतिषिद्धविज्ञानाद्वा ॥ ४५ ॥ तथा चान्यार्थदर्शनम् ॥ ४६ ॥

१ उपांशुयाजस्य ध्रौवाज्यद्रव्यकत्वाधि०–१५

उपांशुयाजमन्तरा यजतीति हविर्लिंगाश्रितत्वाद्यथाकामी प्रतीयेत ॥ ४७ ॥ ध्रौवाद्वा सर्वसंयोगात् ॥ ४८॥

१ उपांशुयाजस्य प्रकृतदेवतानियमाधि०– १६

तद्वच्च देवतायां स्यात् ॥ ४९ ॥ तान्त्रीणां प्रकरणात् ॥ ५० ॥

५ --२ उपांशुयाजस्य विष्ण्वादिदेवताकत्वपौर्णमासीकर्तव्यत्वाधि०–१७–१८ ॥

धर्माद्वा स्यात्प्रजापतिः ॥ ५१ ॥ देवतायास्त्वनिर्वचनं तत्र शब्दस्येह मृदुत्वं तस्मादिहाधिकारेण ॥ ५२ ॥

विष्णुर्वा स्याद्धौत्राम्नानादमावास्या-
हविश्च स्याद्धौत्रस्य तत्र दर्शनात्
॥ ५३ ॥ अपि वा पौर्णमास्यां
स्यात्प्रधानशब्दसंयोगाद्गुणत्वान्मन्त्रो
यथा प्रधानं स्यात् ॥ ५४ ॥ आन-
न्तर्यं च सान्नाय्यस्य पुरोडाशेन दर्श-
यत्यमावास्याविकारे ॥ ५५ ॥ अग्नी-
षोमविधानात्तु पौर्णमास्यामुभयत्र
विधीयते॥५६॥प्रतिषिद्धचविधानाद्वा
विष्णुः समानदेशः स्यात् ॥ ५७ ॥
तथा चान्यार्थदर्शनम् ॥ ५८ ॥ न

चानंगं सकृच्छुतावुभयत्र विधीयेतासम्बन्धात् ॥ ५९ ॥ गुणानां च परार्थत्वात्प्रवृत्तौ विधिलिंगानि दर्शयति ॥ ६० ॥ विकारे चाश्रुतित्वात् ॥ ६१ ॥

१ एकपुरोडाशायामप्युपांशुयागाधि०–१९ ॥

द्विपुरोडाशायां स्यादन्तरा (लगुणा) र्थत्वात् ॥ ६२ ॥ अजामिकरणार्थत्वाच्च ॥ ६३ ॥ तदर्थमिति चेन्न तत्प्रधानत्वात् ॥ ६४ ॥ अशिष्टेन च सम्बन्धात् ॥ ६५ ॥ उत्पत्तेस्तु निवेशः स्याद्गुणस्यानुपरोधेनार्थस्य

१ न्यायमालाक्रमस्त सूत्रमेतद्बाधकम् ।

विद्यमानत्वाद्विधानादन्तरार्थस्य नैमित्तिकत्वात्तदभावेऽश्रुतौ स्यात् ६६ उभयोस्तु विधानात् ॥ ६७ ॥ गुणानाञ्च परार्थत्वादुपवेषवद्यदेति स्यात् ॥ ६८ ॥ अनपायश्च कालस्य लक्षणं हि पुरोडाशौ ॥ ६९ ॥ प्रशंसार्थमजामित्वम् ॥७०॥ (१९)॥३८॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने दशमस्याध्यायस्य (नानुयाजेषु नातिरात्रमित्यादिबाधोपयोगिनञर्थविचारो नाम) अष्टमः पादः ॥ १० ॥ ८ ॥

इति दशमोऽध्यायः समाप्तः ॥ १० ॥

अथ एकादशोऽध्यायः ॥

बहूनामाग्नेयादीनां प्रधानानां सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकारइति तन्त्रमिति निरूप्यते–

१ आग्नेयादीनां समुदितानां तन्त्रेण स्वर्गफलकत्वाधिकरणम्– १ ॥

प्रयोजनाभिसम्बन्धात्पृथक् सतां ततः स्यादेककर्म्यमेकशब्दाभिसंयोगात् ॥ १ ॥ शेषवद्वा प्रयोजनं प्रतिकर्म विभज्येत ॥ २ ॥ अविधानात्तु नैवं स्यात् ॥ ३ ॥ शेषस्य हि परार्थत्वाद्विधानात्प्रतिप्रधानभावः स्यात् ॥ ४ ॥

१ अङ्गानामेककार्याधिकरणम्– २ ॥

अंगानान्तु शब्दभेदात्क्रतुवत्स्यात्

फलान्यत्वम् ॥५॥ अर्थभेदस्तु तत्रा-र्थेह्यैकार्थ्यादैककर्म्यम् ॥६॥ शब्दभे-दान्नेति चेत् ॥७॥ कर्मार्थत्वात्प्रयोगे ताच्छब्द्यं स्यात्तदर्थत्वात् ॥८॥ कर्तृ-विधेर्नानार्थत्वाद्गुणप्रधानेषु ॥९॥ आर-म्भस्य शब्दपूर्वत्वात् ॥ १० ॥

२ दर्शपूर्णमासादिकाम्यकर्मणां सर्वाङ्गोप-संहाराधिकरणम्- २ ॥

एकेनापि समाप्येत कृतार्थत्वाद्यथा क्रत्वन्तरेषु प्राप्तेषु चोत्तरावत्स्यात् ॥११॥ फलाभावादिति चेत् ॥१२॥ न कर्मसंयोगात्प्रयोजनमशब्ददोषं

स्यात ॥ १३ ॥ ऐकशब्द्यादिति चेत् ॥ १४॥ नार्थपृथक्त्वात्समत्वादगुणत्वम् ॥ १५ ॥ विधेस्त्वेकश्रुतित्वादपर्यायविधानान्नित्यवच्छ्रुतभूताभिसंयोगादर्थेन युगपत्प्राप्तेर्यथाक्रमं [1]स्वशब्दो निवीतवत्तस्मात्सर्वप्रयोगे प्रवृत्तिः स्यात् ॥ १६ ॥ तथा कर्मोपदेशःस्यात्॥१७॥क्रत्वन्तरेषु पुनर्वचनम् ॥ १८॥ उत्तरास्वश्रुतित्वाद्विशेषाणां कृतार्थत्वात्स्वदोहे यथाकामी प्रतीयेत ॥ १९ ॥

---

१ स्वशब्द इति वृत्तिकृन्मते न पठ्यते।

१ काम्यकर्मणां भूयोभ्यासाधिकरणम्-४॥

कर्मण्यारम्भभाव्यत्वात्कृषिवत्प्रत्यारम्भं फलानि स्युः ॥२०॥ अधिकारश्च सर्वेषां कार्यत्वादुपपद्यते विशेषः ॥२१॥ सकृत्तु स्यात्कृतार्थत्वादंगवत् ॥ २२ ॥ शब्दार्थश्च तथा लोके ॥२३॥ अपि वा संप्रयोगे यथाकामी प्रतीयेताश्रुतित्वाद्विधिषु वचनानि स्युः ॥ २४ ॥ एकशब्द्यात्तथांगेषु ॥ २५ ॥ लोके कर्माऽर्थलक्षणम् ॥ २६ ॥

१ अवघातादीनामातण्डुलनिर्वृत्तेरभ्यासाधिकरणम्-५ ॥

क्रियाणामर्थशेषत्वात्प्रत्यक्षम (त्यक्षो) तस्तन्निर्वृत्त्याऽपवर्गः स्यात्॥ २७॥

१ अदृष्टफलस्यावघातादेः सकृदनुष्ठानाधिकरणम्-६ ॥

धर्ममात्रे त्वदर्शनाच्छब्दार्थेनापवर्गः स्यात् ॥ २८ ॥

१ प्रयाजादीनामङ्गानां सकृदनुष्ठानाधिकरणम्- ७ ॥

क्रतुवद्वानुमानेनाभ्यासे फलभूमा-

---

१ इदं पूर्वाधिकरणान्न पृथगधिकरणमिति शास्त्रदीपिकायाम् ।

स्यात् ॥ २९ ॥ सकृद्वा करणैकत्वा-
त् ॥३०॥ परिमाणं चानियमेन स्या-
त् ॥ ३१ ॥ फलारम्भानिवृत्तेः क्रतुषु
स्यात्फलान्यत्वम् ॥ ३२ ॥ अर्थवां-
स्तु नैकत्वादभ्यासः स्यादनर्थको यथा
भोजनमेकस्मिन्नर्थस्यापरिमाणत्वात्प्र-
धाने च क्रियार्थत्वादनियमः स्या-
त् ॥ ३३ ॥ पृथक्त्वाद्विधितः परि-
माणं स्यात् ॥ ३४ ॥ अनभ्यासो वा
प्रयोगवचनैकत्वात्सर्वस्य युगपच्छा-
स्त्रादफलत्वाच्च कर्मणः स्यात्क्रियार्थ-

१ द्वा कारेति जै० न्या० पा० ।

त्वात् ॥ ३५॥ अभ्यासो वा छेदनस-
म्मार्गाऽवदानेषु वचनात्सकृत्त्वस्य ३६
अनभ्यासस्तु वाच्यत्वात् ॥ ३७ ॥

१ बहुवचनस्य त्रित्वपरत्वे कापिञ्जलाधिक-
रणम्—८ ॥

बहुवचनेन सर्वप्राप्तेर्विकल्पः स्या-
त् ॥ ३८ ॥ दृष्टः प्रयोग इति चे-
त्॥३९॥तथेह ॥ ४० ॥ भक्त्येति
चेत्॥४१॥तथेतरस्मिन्॥४२॥प्रथमं
वा नियम्येत कारणादतिक्रमः स्यात्
॥४३॥श्रुत्यर्थाविशेषात्॥४४॥ तथा

१ क्वचित्सूत्रपाठपुस्तके अधिकमिदं सूत्रम् ।

चान्यार्थदर्शनम् ॥ ४५ ॥ प्रकृत्या च पूर्ववत्तदासत्तेः ॥ ४६ ॥

१ "उत्तरा दोहयति" इत्यत्र सर्वासां गवां दोहनाधिकरणम्—९ ॥

उत्तरासु यावत्स्वमपूर्वत्वात् ॥ ४७ यावत्स्वं वाऽन्यविधानेनानुवादः स्यात् ॥ ४८ ॥ साकल्यविधानात् ॥ ४९ ॥ बह्वर्थत्वाच्च ॥ ५० ॥ अग्निहोत्रे चाशेषवद्यवागूनियमः ॥ ५१ ॥ इति व्याख्यातम् ॥ ५२ ॥ तथा पयःप्रतिषेधः कुमाराणाम् ॥ ५३ ॥ सर्वप्रापिणापि

---

१ वृत्तिकृन्मते इदं सूत्रमधिकम् ।

लिंगेन संयुज्य देवताभिसंयोगात्५४॥

२ आग्नेयादीनां प्रधानानां भेदेप्याघारादीनामङ्गानां तन्त्रेणानुष्ठानाधिकरणम्- १०॥

प्रधानकर्मार्थत्वादंगानां तद्भेदात्कर्मभेदः प्रयोगे स्यात् ॥ ५५ ॥ क्रमकोपश्च यौगपद्ये स्यात् ॥ ५६ ॥ तुल्यानां तु यौगपद्यमेकशब्दोपदेशात् स्याद्विशेषाग्रहणात् ॥ ५७ ॥ ऐकार्थ्यादव्यवायः स्यात् ॥ ५८ ॥ तथा चान्यार्थदर्शनं कामुकायनः ॥ ५९ ॥ तन्न्यायत्वादशक्तेरानुपूर्व्यं स्यात्संस्कारस्य तदर्थत्वात् ॥ ६० ॥ असंस्पृष्टो

ऽपि तादर्थ्यात् ॥६१॥ विभवाद्वा प्रदीपवत् ॥ ६२ ॥ अर्थात्तु लोके विधिः प्रतिप्रधानं स्यात् ॥ ६३ ॥ सकृदिज्यां कामुकायनः परिमाणविरोधात् ॥ ६४ ॥ विधेस्त्वितरार्थत्वात्सकृदिज्याश्रुतिव्यतिक्रमः स्यात् ॥६५॥ विधिवत्प्रकरणाविभागे प्रयोगं बादरायणः ॥ ६६ ॥ अपि चैकेन सन्निधानमविशेषको हेतुः॥६७॥क्वचिद्विधानान्नेति चेत् ॥६८॥ न विधेश्चोदितत्वात् ॥ ६९ ॥

---

१ कचिन्मूलपुस्तके इदमधिकं सूत्रम् । वृत्ति० न्या० पुस्तकयोर्नास्ति ।

१ कृष्णग्रीवयोः प्रथमतृतीययोर्भेदेन प्रदा-
नाधिकरणम्—११ ॥

व्याख्यातं तुल्यानां यौगपद्यम-
गृह्यमाणविशेषाणाम् ॥ ७० ॥ भेदस्तु
कालभेदाच्चोदनाव्यवायात् स्याद्विशि-
ष्टानां विधिः प्रधानकालत्वात् ॥ ७१ ॥
तथा चान्यार्थदर्शनम् ॥ ७२ ॥ विधि-
रिति चेन्न वर्तमानापदेशात् ॥ ७३ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसा-
दर्शने एकादशस्याध्यायस्य (तन्त्रस्योपो-
द्घातो नाम) प्रथमः पादः ॥ ११ ॥ १ ॥

---

२ आग्नेयादीनां प्रधानानां तन्त्राधि०—१ ॥

एकदेशकालकर्तृत्वं मुख्यानामेक-

शब्दोपदेशात् ॥ १ ॥ अविधिश्चेत्कर्मणामभिसम्बन्धः प्रतीयेत तल्लक्षणार्थाभिसंयोगाद्विधित्वाच्चेतरेषां प्रतिप्रधानं भावः स्यात् ॥ २ ॥

१ अङ्गानामपि समदेशादिनियमाधि०--२॥

अङ्गेषु[2] च तदभावः प्रधानं प्रति निर्देशात् ॥ ३ ॥ यदि तु कर्मणो विधिसम्बन्धः स्यादेकशब्द्यात्प्रधानार्थाभिसंयोगात् ॥ ४ ॥ तथा चान्यार्थदर्शनम् ॥ ५ ॥ श्रुतिश्चैषां प्रधान-

---

१ येत लक्षेति वृत्ति॰ पा॰ ।

२ पूर्वाधिकरणान्न पृथगधिकरणभिदामिति शास्त्रदीपिका ॥

त्कर्मश्रुतेः परार्थत्वात्कर्मणोऽश्रुति
त्वाच्च ॥ ६ ॥ अंगानि तु विधान-
त्वात्प्रधानेनोपदिश्येरंस्तस्मात्स्यादे-
कदेशत्वम् ॥ ७ ॥ द्रव्यदेवतं तथेति
चेत् ॥ ८ ॥ न चोदनाविधिशेषत्वा-
न्नियमार्थो विशेषः ॥ ९ ॥ तेषु सम-
वेतानां समवायात्तन्त्रमंगानि भेदस्तु
तद्भेदात्कर्मभेदः प्रयोगे स्यात्तेषां प्रधा-
नशब्दत्वात्तथा चान्यार्थदर्शनम् ॥ १०

१ दर्शपूर्णमासेष्टिप्रभृतिषु सङ्घभेदेनांगानां
भेदेनानुष्ठानाधिकरणम्—३ ॥

इष्टिराजसूयचातुर्मास्येष्वेककर्म्या-

१ श्रुतत्वेति व्या० पा०।

दंगानां तन्त्रभावः स्यात् ॥ ११ ॥ कालभेदान्नेति चेत् ॥ १२ ॥ नैकदेशत्वात्पशुवत् ॥ १३ ॥ अपि वा कर्मपृथक्त्वात्तेषां तन्त्रविधानात्सांगानामुपदेशः स्यात् ॥ १४ ॥ तथा चान्यार्थदर्शनम् ॥ १५ ॥ तथा तद[1]वयवेषु स्यात् ॥ १६ ॥ पशौ तु चोदनैकत्वात्तन्त्रस्य विप्रकर्षः स्या[2]त् १७

२ अध्वरकल्पायां त्रिषु सङ्घेष्वंगानां भेदेनानुष्ठानाधिकरणम्-४ ॥

तथा स्यादध्वरकल्पे[3]ष्टौ विशेषस्यै-

---

१ तथा तदवयवेत्यस्य स्थाने वृत्तिकृ० तदावयेति पाठः ।
२ सू० स्यादिति नास्ति ।
३ कल्पेष्टावित्यस्य स्थाने कल्पायामिति पाठो सू० ।

कैकालत्वात् ॥ १८ ॥ इष्टिरिति चैकवच्छ्रुतिः ॥ १९॥ अपि वापृथक्त्वात्तेषां च तन्त्रविधानात्सांगानामुपदेशः स्यात् ॥ २० ॥ प्रथमस्य वा कालवचनम् ॥ २१ ॥ फलैकत्वादिष्टिशब्दो यथान्यत्र ॥ २२ ॥

१ प्राजापत्यवसाहोमानां तंत्रेणानुष्ठानाधिकरणम्—९ ॥

वसाहोमस्तन्त्रमेकदेवतेषु स्यात्प्रदानस्यैककालत्वात् ॥ २३ ॥

---

१ न वा कर्मपृथक्त्वात्तेषां चाङ्गेति वृ० पा०।

२ प्रथानेति वृ० पा०।

१ ऐकादशिनगतवसाहोमस्य भेदेनानुष्ठानाधिकरणम्--६ ॥

कालभेदात्त्वावृत्तिर्देवताभेदे[1] ॥२४॥

१ यूपैकादशिन्यां तन्त्रेण यूपाहुत्यनुष्ठानाधिकरणम्-७ ॥

अन्ते यूपाहुतिस्तद्वत् ॥ २५ ॥ इतरप्रतिषेधो वा ॥ २६ ॥ अशास्त्रत्वाच्च देशनाम् ॥ २७ ॥

१ साङ्गस्यावभृथस्याप्स्वनुष्ठानाधि०-८ ॥

अवभृथे प्रधानेऽग्निविकारः स्यान्न हि तद्धेतुराग्निसंयोगः ॥ २८ ॥ द्रव्य-

---

१ भेदे स्यादावृत्तिरिति वृत्तिग्रन्थे पाठान्तरम् ।

देवतावत् ॥ २९ ॥ साङ्गो वा प्रयो-
गवचनैकत्वात् ॥ ३० ॥ लिंगदर्श-
नाच्च ॥ ३१ ॥ शब्दविभागाच्च देव-
तानपनयः ॥ ३२ ॥

१ वरुणप्रघासेष्वाग्नेयादीनां मारुत्या भेदे-
नानुष्ठानाधिकरणम्-९ ॥

दक्षिणेऽग्नौ वरुणप्रघासेषु देशभे-
दात्सर्वं विक्रियते ॥ ३३॥ अचोदने-
ति चेत् ॥ ३४ ॥ स्यात्पौर्णमासीवत्
॥ ३५ ॥प्रयोगचोदनेति चेत्॥३६॥
न (अ) थेह ॥ ३७॥ आसादनमिति
चेत् ॥ ३८ ॥ नोत्तरेणैकवाक्य-

त्वात् ॥३९॥ अवाच्यत्वात् ॥४०॥ आम्नायवचनं तद्वत् ॥ ४१ ॥

१ उत्तरदक्षिणविहारयोः कर्त्रभेदाधि०--१० ॥

कर्तृभेदस्तथेति चेत् ॥ ४२ ॥ न समवायात् ॥ ४३ ॥ लिङ्गदर्शनाच्च ॥४४॥ वेदिसंयोगादिति चेत्॥४५॥ न देशमात्रत्वात् ॥ ४६ ॥

१ उत्तरदक्षिणविहारयोः पत्नीसंयाजादीनां भेदेनानुष्ठानाधिकरणम्-११ ॥

एकाग्नित्वादपरेषु तन्त्रैः स्यात् ॥४७॥ नाना वा कर्तृभेदात्॥४८ ॥

१ वाजपेये प्राजापत्यपश्वालम्भशेषस्य ब्रह्मसामकाल उत्कर्षाधिकरणम्–१२ ॥

पर्यग्निकृतानामुत्सर्गे प्राजापत्यानां कर्मोत्सर्गः श्रुतिसामान्यादारण्यवत्तस्माद्ब्रह्मसाम्नि चोदनापृथक्त्वं स्यात् ॥ ४९ ॥ संस्कारप्रतिषेधो वा वाक्यैकत्वे क्रतुसामान्यात् ॥५० ॥ वपानां चानभिघारणस्य दर्शनात् ॥ ५१ ॥

१ अहीने उक्ष्णामुत्सर्गस्य कर्मशेषप्रतिषेधार्थताधिकरणम्–१३ ॥

पञ्चशारदीयास्तथेति चेत्॥५२॥

---

१ पार्योत्ति वृ. पा॰

न चोदनैकवाक्यत्वात् ॥ ५३ ॥ संस्काराणां च दर्शनात् ॥ ५४ ॥

१ दशपेयाभिषेचनीययोर्भेदेन प्रयोगाधि-१४

दशपेये क्रयप्रतिकर्षात्प्रतिकर्षस्ततः प्राचां तत्समानं तन्त्रं स्यात् ॥ ५५ ॥ अप्रतिसमानवचनं तद्वत् ॥ ५६ ॥ अप्रतिकर्षौ वाऽर्थहेतुत्वात्सहत्वं विधीयते ॥ ५७ ॥ पूर्वस्मिश्चावभृथस्य दर्शनात् ॥ ५८ ॥ दक्षिणानां चोत्तरस्य ॥ ५९ ॥ समानः कालसामान्यात् ॥ ६० ॥

२ वारुणीनिष्कासावभृथस्यार्थकर्मताधिकरणम्-१५ ॥

निष्कासस्यावभृथे तदेकदेशत्वात्

पशुवत्प्र[1]शूनाविप्रकर्षः स्यात् ॥ ६१ ॥
अपनयो वा प्रसिद्धेनाभिसंयोगात्
॥ ६२ ॥ प्रतिपत्तिरिति चेन्न कर्म-
संयोगात् ॥ ६३ ॥

२ प्रायणीयनिष्कास उदयनीयनिर्वापस्य
संस्कारकर्मताधिकरणम्–१६ ॥

उदयनीये च तद्वत् ॥ ६४ ॥
प्रतिपत्तिर्वाऽकर्मसंयोगात् ॥ ६५ ॥
अर्थकर्म वा शेषत्वाच्छ्र[2]पणवत्तदर्थेन
विधानात् ॥ ६६ ॥ (१६) ॥ २२ ॥

---

१ प्रायणीये इति वृत्ति० पा० ।
२ च्छ्रयणेति न्या० मा० पा० ।

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसा-
दर्शने एकादशस्याध्यायस्य
(संक्षेपेण तन्त्रवापनिरूपणं नाम)
द्वितीयः पादः॥११॥२॥

---

१ वेद्याद्यङ्गानां प्रधानान्यकालकर्तव्यता-
धिकरणम्–१ ॥

**अङ्गानां मुख्यकालत्वाद्वचनाद-
न्यकालत्वम् ॥ १ ॥**

१ आधानस्य तंत्रेणानुष्ठानाधि०–२ ॥

**द्रव्यस्याकर्मकालनिष्पत्तेः प्रयो-
गः सर्वार्थः स्यात्स्वकालत्वात् ॥२॥**

---

१ व्यस्य चाकोंति न्या० पा० ।

१ अग्नीषोमीयादिषु यूपस्य तंत्रेणानुष्ठानाधिकरणम्--३ ॥

यूपश्चाकर्मकालत्वात् ॥ ३ ॥ एकयूपं च दर्शयति ॥ ४ ॥

१ यूपसंस्काराणां तंत्रेणानुष्ठनाधि०—४॥

संस्कारास्त्वावर्तेरन्नर्थकालत्वात् ॥५॥ तत्कालास्तु यूपकर्मत्वात्तस्य धर्मविधानात्सर्वार्थानां च वचनादन्यकालत्वम् ॥६॥ सकृन्मानं च दर्शयति ॥ ७ ॥

१ इदं सूत्रं वृत्तिकृन्मते नास्ति ।

१ स्वरोस्तन्त्रेणानुष्ठानाधिकरणम्-- ५ ॥

स्वरुस्तन्त्रापवर्गः स्यादस्वकालत्वात् ॥ ८ ॥ साधारणो वाऽनुनिष्पत्तिस्तस्य साधारणत्वात् ॥ ९ ॥ सोमान्ते च प्रतिपत्तिदर्शनात् ॥ १० ॥ तत्कालो वा प्रस्तरवत् ॥ ११ ॥ न वोत्पत्तिवाक्यत्वात्प्रदेशात्पस्तरे तथा ॥ १२ ॥

२ अहर्गणे कृष्णविषाणाप्रासनस्यान्त्याहनियमाधिकरणम्-- ६ ॥

अहर्गणे विषाणाप्रासनं धर्मविप्रतिषेधादन्त्ये प्रथमे वाहनि विकल्पः स्यात् ॥ १३ ॥ पाणेस्त्वश्रुतिभूतत्वा-

द्विषाणानियमः स्यात्प्रातःसवनमध्य-
त्वाच्छिष्टे चाभिप्रवृत्तत्वात् ॥ १४ ॥

१ राजसूये नानाबीजेषु वाग्विसर्गस्य चर-
मकालनियमाधिकरणम्– ७ ॥

वाग्विसर्गो हविष्कृता बीजभेदे
तथा स्यात् ॥ १५ ॥

१ अग्नीषोमीये पौरोडाशिककाल एव
वाग्विसर्गाधिकरणम्– ८ ॥

पशौ च पुरोडाशे समानतन्त्रं
भवेत् ॥ १६ ॥

१ अग्निचयनेऽग्निविमोकस्य मतभेदेन व्यव-
स्थाधिकरणम्– ९ ॥

अग्नियोगः सोमकाले तदर्थत्वात्

संस्कृतकर्मणः परेषु सांगस्य तस्मात्सर्वापवर्गे विमोकः स्यात् ॥ १७ ॥ प्रधानापवर्गे वा तदर्थत्वात् ॥ १८ ॥ अवभृथे च तद्वत्प्रधानार्थस्य प्रतिषेधोऽप्रवृत्तार्थत्वात् ॥ १९ ॥ अहर्गणे च प्रत्यहं स्यात्तदर्थत्वात् ॥ २० ॥

१ उपसत्कालस्य सुब्रह्मण्याह्वानस्य तन्त्रेणानुष्ठानाधिकरणम्-१० ॥

सुब्रह्मण्या तु तन्त्रं दीक्षावदन्यकालत्वात् ॥ २१ ॥

१ सुत्याकालिकसुब्रह्मण्याह्वानस्य भेदेनानुष्ठानाधिकरणम्- ११ ॥

तत्काळात्त्वावर्तेत प्रयोगतो वि-

शेषंसम्बन्धात् ॥ २२ ॥ अप्रयोगांग-
मिति चेत् ॥२३ ॥ स्यात्प्रयोगनिर्दे-
शात्कर्तृभेदवत् ॥२४॥ तद्भूतस्थाना-
दग्निवदिति चेत्[2]तदपवर्गस्तदर्थत्वात्
॥ २५ ॥ अग्निवदिति चेत् ॥२६॥
न प्रयोगसाधारण्यात् ॥२७॥ लिंगद-
र्शनाच्च ॥ २८ ॥ तद्धि तथेति चेत्
॥२९ ॥ नाशिष्टत्वादितरन्यायत्वाच्च[3]
॥३०॥ विध्येकत्वादिति चेत् ॥३१॥

---

१ षसंयोगादिति वृत्तिकृन्मते पाठः ।

२ चेदपेति वृत्ति॰ पाठः ।

३ चकारो वृत्ति॰ नास्ति ।

न कृत्स्नस्य पुनः प्रयोगा-प्रधानवत् ॥ ३२ ॥

१ देशपात्रर्त्विजामन्यप्रयोगे पूर्वदेशाद्या-दानस्यैच्छिकताधिकरणम्-१२ ॥

लौकिकेषु यथाकामी संस्कारा-नर्थलोपात् ॥ ३३ ॥

१ पात्राणां तन्त्रस्य नियमाधि०-१३ ॥

यज्ञायुधानि धार्येरन्प्रतिपत्तिविधा-नादृजीषवत् ॥ ३४ ॥ यजमानसं-स्कारो वा तदर्थः श्रूयते तत्र यथा-कामी तदर्थत्वात् ॥ ३५ ॥ मुख्यस्य[2]

१ रार्थलोपादिति वृत्ति० पाठः ।

२ ध्यस्याथेति कै० ज्या० मा० पाठः ।

धारणं वा मरणस्यानियतत्वात् ॥ ३६ ॥ यो वा यजनीयेऽहनि म्रियेत[1] सोऽधिकृतः स्यादुपवेषवत् ॥ ३७ ॥ न शास्त्रलक्षणत्वात् ॥ ३८ ॥ उत्पत्तिर्वा प्रयोजकत्वादाशिरवत् ॥ ३९ ॥ शब्दासामञ्जस्यामिति चेत् ॥ ४० ॥ तथाऽऽशिरे ॥ ४१ ॥ शास्त्रात्तु विप्रयोगस्तत्रैकद्रव्यचिकीर्षा[2] प्रकृतावथेहापूर्वार्थवद्भूतोपदेशः ॥ ४२ ॥

---

१ म्रियते इति॰ पा॰ ।

२ कीर्षया इतीति सू॰ पा॰ ।

१ पात्राणामाधानमारभ्य धारणनियमाधिकरणम्— १४ ॥

प्रकृत्यर्थत्वात्पौर्णमास्याः क्रियेरन् ॥ ४३ ॥ अग्न्याधेये वाऽविप्रतिषेधात्तानि धारयेन्मरणस्यानिमित्तत्वात् ॥ ४४ ॥ प्रतिपत्तिर्वा यथान्येषाम् ॥ ४५ ॥

२ सर्वसोमानामुपरिष्टात्प्राजापत्यप्रचाराधिकरणम्—१५ ॥

उपरिष्टात्सोमानां प्राजापत्यैश्चर-

---

१ पूर्वाधिकरणान्तर्गतमिदमाधिकरणमिति शास्त्रदीपिकातो ज्ञायते ।

२ वाऽप्यन्ये इति वृत्ति० पा० ।

न्तीति सर्वेषामविशेषादवाच्यो हि प्रकृतिकालः ॥ ४६ ॥ अंगविपर्यासो विना वचनादिति चेन्न ॥ ४७ ॥ उत्कर्षः संयोगात्कालमात्रमितरत्र ॥ ४८ ॥ प्रकृतिकालासत्तेः शस्त्रवतामिति चेत् ॥ ४९ ॥ न श्रुतिप्रतिषेधात् ॥ ५० ॥ विकारस्थान इति चेत् ॥ ५१ ॥ न चोदनापृथक्त्वात् ॥ ५२ ॥

१ सवनीये पुरोडाशे देवतोत्कर्षाधि०–१६ ॥

उत्कर्षे सूक्तवाकस्य न सोमदेवतानामुत्कर्षः पश्वनंगत्वाद्यथा निष्कर्षेऽनन्वयः ॥ ५३ ॥ वाक्यसंयो-

गाद्वोत्कर्षः समानतन्त्रत्वादर्थलोपादनन्वयः ॥ ५४ ॥ (१६) ॥ २० ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने एकादशस्याध्यायस्य (तन्त्रोपोद्घातो नाम) तृतीयः पादः ॥ ११ ॥ ३ ॥

---

१ राजसूये सोमापौष्णादिकेङ्गानां भेदेनानुष्ठानाधिकरणम्- १ ॥

चोदनैकत्वाद्राजसूयेऽनुक्तदेशकालानां समवायात्तन्त्रमंगानि ॥ १ ॥ प्रातिदक्षिणं वा कर्तृसम्बन्धादिष्टिवदंगभूतत्वात्समुदायो हि तन्निर्वृत्त्या तदेकत्वा-

देकशब्दोपदेशः स्यात् ॥ २ ॥ तथा चान्यार्थदर्शनम् ॥ ३ ॥

२ राजसूये कर्तुस्तन्त्रताधिकरणम्– २ ॥

अनियमः स्यादिति चेत् ॥ ४ ॥ नोपादिष्टत्वात् ॥ ५ ॥ लाघवापत्तिश्च ॥ ६ ॥ प्रयोजनैकत्वात् ॥७॥ विशेषार्थां पुनः श्रुतिः ॥ ८ ॥

१ अवेष्टावङ्गानां भेदाधिकरणम्– ३ ॥

अवेष्टौ चैकतन्त्र्यं स्याल्लिङ्गदर्शनात् ॥ ९ ॥ वचनात्कामसंयोगेन ॥ १० ॥ क्रतवर्थायामिति चेन्न वर्णसंयोगात् ११

वापत्तीति ०पा०।

१ पवमानेष्टिहविषां भेदेनानुष्ठानाधि०-४॥

पवमानहविःष्वेकतन्त्रयं प्रयोगवचनेकत्वात्॥१२॥लिंगदर्शनाच्च १३॥ वचनात्तु तन्त्रभेदः स्यात्॥ १४॥ सहत्वे नित्यानुवादः स्यात्॥ १५॥

५ द्वादशाहे दीक्षोपसत्सुत्यानां प्रत्येकस्य द्वादशाहताधिकरणम्- ५॥

द्वादशाहे तत्प्रकृतित्वादेकैकमहरपवृज्येत कर्मपृथक्त्वात्॥ १६॥ अह्नां वा श्रुतिभूतत्वात्तत्र सांगं क्रियेत यथा माध्यन्दिने॥ १७॥ अपि वा फलकर्तृसम्बन्धात्सह प्रयोगः स्यादा-

ग्रेयाग्नीषोमीयवत्॥ १८ ॥ साङ्गकाल-
श्रुतित्वाद्वा स्वस्थानानां विकारः
स्यात् ॥ १९ ॥ तदपेक्षं च द्वादश-
त्वम् ॥ २० ॥ दीक्षोपसदां च संख्या
पृथक्पृथक् प्रत्यक्षसंयोगात्॥२१ ॥
तथा चान्यार्थदर्शनम् ॥ २२॥ चोद-
नापृथक्त्वे त्वैकतन्त्र्यं समवेतानां
कालसंयोगात् ॥ २३ ॥

१ प्रधानैरपृथक्कालानामङ्गानां भेदेनानुष्ठा-
नाधिकरणम्– ६ ॥

भेदस्तु तद्भेदात्कर्मभेदः प्रयोगे
स्यात्तेषां प्रधानशब्दत्वात् ॥ २४ ॥

तथा चान्यार्थदर्शनम् ॥ २५ ॥ श्वःसुत्यावचनं तद्वत् ॥ २६ ॥ पश्चातिरेकश्च ॥ २७ ॥

२ उपसत्काले सुब्रह्मण्याह्वानस्याविकारेण कर्तव्यताधिकरणम्-७ ॥

सुत्याविवृद्धौ सुब्रह्मण्यायां सर्वेषामुपलक्षणं प्रकृत्यन्वयादावाहनवत् ॥२८॥ अपि वेन्द्राभिधानत्वात्सकृत्स्यादुपलक्षणं कालस्य लक्षणार्थत्वादविभागाच्च ॥ २९ ॥

---

१ नं च सेति पु० पा० ।

१वाजपेये प्राजापत्येषु कुम्भ्यादीनां तन्त्रताधिकरणम्-८ ॥

पशुगणे कुम्भीशूलवपाश्रपणीनां प्रभुत्वात्तन्त्रभावः स्यात् ॥ ३० ॥

१ भिन्नदेवताकेष्वपि शूलादीनां तंत्रताधिकरणम्-९ ॥

भेदस्तु सन्देहाद्देवतान्तरे स्यात् ॥ ३१ ॥ अर्थाद्वा लिंगकर्म स्यात् ३२ ॥

१ वसाकुम्भ्यापि तंत्रताधिकरणम्-१० ॥

अयाज्यत्वाद्वसानां भेदः स्यात्स्वयाज्याप्रदानत्वात् ॥ ३३ ॥ अपि वा

---

१ पूर्वाधिकरण एवास्याधिकरणस्यान्तर्भाव उक्तः शास्त्रदीपिकायाम् ।

प्रतिपत्तित्वात्तंत्रं स्यात्स्वत्वस्याश्रुतिभूतत्वात् ॥ ३४ ॥ सकृदिति चेत् ॥ ३५ ॥ न कालभेदात् ॥३६ ॥

१ भिन्नजातिषु कुम्भ्यादीनां भेदेनानुष्ठानाधिकरणम्–११ ॥

जात्यन्तरेषु भेदः पक्तिवैषम्यात् ॥ ३७ ॥ वृद्धिदर्शनाच्च ॥ ३८ ॥

१ अश्वप्रतिग्रहेष्ट्यां प्रतिपुरोडाशं कपालभेदाधिकरणम्–१२ ॥

कपालानि च कुम्भीवत्तुल्यसंख्यानाम् ॥ ३९ ॥ प्रतिप्रधानं वा प्रकृति-

१ न्तरभेद इति वृ० पा० ।

वत् ॥ ४० ॥ सर्वेषां चाभिप्रथनं स्यात् ॥ ४१ ॥

१ व्रीह्यवहननादौ प्रतिप्रहारं मंत्रस्यानावृत्त्यधिकरणम्—१३ ॥

एकद्रव्ये संस्काराणां व्याख्यातमेककर्मत्वम् ॥ ४२॥ तस्मिन्मंत्रार्थनानात्वादावृत्तौ मंत्रस्यासकृत्प्रयोगः स्यात् ॥ ४३ ॥

१ नानाबीजेष्टौ प्रतिप्रहारं मंत्रावृत्त्यधिकरणम्— १४ ॥

द्रव्यान्तरे कृतार्थत्वात्तस्य पुनः

---

१ इदं सूत्रं नेति बहवो विवदन्ते ।

प्रयोगान्मंत्रस्यं च तद्गुणत्वात्पुनः प्रयोगः स्यात्तदर्थेन विधानात् ॥ ४४ ॥

१ दर्शपूर्णमासादौ प्रतिनिर्वापादेमन्त्रावृत्त्यधिकरणम्– १५ ॥

[1]निर्वपणलवनैस्तरणाज्यग्रहणेषु चैकद्रव्यवत्प्रयोजनैकत्वात् ॥ ४५ ॥ द्रव्यान्तरवद्वा स्यात्तत्संस्कारात् ॥ ४६ ॥

१ वेदिप्रोक्षणे प्रत्यावृत्ति मंत्रानावृत्त्यधिकरणम्– १६ ॥

वेदिप्रोक्षणे मन्त्राभ्यासः कर्मणः पुनः प्रयोगात् ॥ ४७ ॥ एकस्य वा

१ स्थ तीति वृ० पा० ।

२ वनास्तेति वृ० पा० ।

गुणविधिर्द्रव्यैकत्वात्तस्मात्सकृत्प्रयोगः स्यात् ॥ ४८ ॥

१ कण्डूयनमन्त्रस्यानावृत्त्यधि०-१७ ॥

कण्डूयने प्रत्यङ्गं कर्मभेदात्स्यात् ॥ ४९ ॥ अपि वा चोदनैककालमेककर्म्यं स्यात् ॥ ५० ॥

ज्योतिष्टोमे स्वप्नादिमन्त्रानावृत्त्यधि०-१८॥

स्वप्ननदीतरणाभिवर्षणामेध्यप्रतिमन्त्रणेषु चैवम् ॥ ५१ ॥

१ दीक्षितस्य प्रयाणे मन्त्रानावृत्त्यधि०--१९॥

प्रयाणे त्वार्थनिर्वृत्तेः ॥ ५२ ॥

---

१ भेदः स्योति वृ० पा०।

१ उपरवमन्त्रस्यावृत्त्याधिकरणम्-२० ॥

उपरवमन्त्रस्तंत्रं स्याल्लोकवद्बहुवचनात् ॥५३॥ न सन्निपातित्वादसन्निपातिकर्मणां विशेषाग्रहणे कालैकत्वात्सकृद्वचनम् ॥ ५४ ॥

१ हविष्कृदादिमन्त्राणामावृत्त्याधि०-२१ ॥

हविष्कृदाध्रिगुपुरोऽनुवाक्यामनोतस्यावृत्तिः कालभेदात्स्यात्॥५५॥ अध्रिगोश्च विपर्यासात् ॥ ५६॥कारिष्यद्वचनात् ॥५७॥(२१)॥ २७॥

---

१ वच्च वाह्नीति पु० पा० ।

२ वृत्तिकृन्मते स्यादिति नास्ति ।

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने एकादशस्याध्यायस्य (आवापप्रपञ्चो नाम) चतुर्थः पादः ॥ ११ ॥ ४ ॥

समाप्त एकादशोऽध्यायः ॥ ११ ॥

अथ द्वादशोऽध्यायः ॥

बह्वाग्नेयादिप्रधानानां सकृदनुष्ठितप्रयाजाद्यंगेनोपकार इति निरूप्यते–

१ अग्नीषोमीयप्रयाजादिभिः पुरोडाशस्योपकाराधिकरणम्–१ ॥

तन्त्रिसमवाये चोदनातः समानानामेकतन्त्रत्वमतुल्येषु तु भेदः स्याद्वि-

१ न्त्रमित्विीत वृ० पा० ।

२ भेदो विधिक्रमोति वृ० पा० ।

धिप्रक्रमतादर्थ्यात्तादर्थ्यं श्रुतिकालनिर्देशात् ॥ १ ॥ गुणकालविकाराच्च तन्त्रभेदः स्यात् ॥ २ ॥ तन्त्रमध्यविधानाद्वा मुख्यतन्त्रेण सिद्धिःस्यात्तन्त्रार्थस्याविशिष्टत्वात् ॥ ३ ॥ विकाराच्च न भेदः स्यादर्थस्याविकृतत्वात् ॥ ४ ॥ एकेषां चाशक्यत्वात् ॥ ५ ॥ एकाग्निवच्च दर्शनम् ॥ ६ ॥

१ पुरोडाशे आज्यभागयोः कर्तव्यताधिकरणम्-२ ॥

जैमिनेः परतन्त्रत्वापत्तेः स्वतन्त्रप्रतिषेधः स्यात् ॥ ७ ॥

---

१ सिद्धः स्येति वृ० पा० ।

२ तन्त्रापेति वृ० पा० ।

१ सोमे दार्शिकवेद्यकरणाधि० –३ ॥

नानार्थत्वात्सोमे दर्शपूर्णमासप्रकृतीनां वेदिकर्म स्यात् ॥ ८ ॥ अकर्म वा कृतदृषा स्यात् ॥ ९ ॥

१ सौम्यचर्वादिहोमस्यैष्टिकपात्रैरनुष्ठानाधिकरणम्–४ ॥

पात्रेषु च प्रसंगः स्याद्धोमार्थत्वात् ॥ १० ॥ न्याय्यानि वा प्रयुक्तत्वादप्रयुक्ते प्रसंगः स्यात् ॥ ११ ॥

२ शामित्रे पशुपुरोडाशश्रपणाभावाधि०५॥

शामित्रे च पशुपुरोडाशो न स्यादितरस्य प्रयुक्तत्वात् ॥ १२ ॥

२ कौण्डपायिनामयनेऽग्निहोत्रद्रव्यस्य प्राजहितेश्रपणाधिकरणम्—६॥

श्रपणं चाऽग्निहोत्रस्य शालामुखीये न स्यात्प्राजाहितस्य विद्यमानत्वात् ॥ १३ ॥

१ हविर्धानशकटान्यशटकटेनौषधद्रव्यकपुरोडाशनिर्वापाधिकरणम्— ७ ॥

हविर्धाने निर्वपणार्थं साधयेतां प्रयुक्तत्वात् ॥ १४ ॥ अप्रसिद्धिर्वाऽन्यदेशत्वात्प्रधानवैगुण्यादवैगुण्ये प्रसंगः स्यात्॥ १५ ॥ अनसां च दर्शनात् १६

१ प्रायणीयादिषु दीक्षाजागरणस्याभावा-
धिकरणम्–८ ॥

तद्युक्तं च कालभेदात् ॥ १७ ॥

१ विहारभेदेन मन्त्रभेदाधिकरणम्–९ ॥

मन्त्राश्च सन्निपातित्वात् ॥ १८॥

१ दीक्षणीयादिष्वग्न्यन्वाधानस्याभावा-
धिकरणम्--१० ॥

धारणार्थत्वात्सोमेऽग्न्यन्वाधानं न विद्यते ॥ १९ ॥

१दीक्षणीयादिषु व्रतोपायनाभावाधि०–११॥

तथा व्रतमुपेतत्वात् ॥२०॥ विप्र-

---

१ मुपेत्यत्वोति मू० पा० ।

तिषेधाच्च ॥ २१ ॥ सत्यवदिति चेत् ॥२२॥ न संयोगपृथक्त्वात् ॥ २३ ॥

१ ऐष्टिकेष्वग्न्यन्वाधानाननुष्ठानाधि०--१२॥

ग्रहार्थं[1] च पूर्वमिष्टेस्तदर्थत्वात् २४ शेषवदिति चेत् ॥ २५ ॥ न वैश्वदेवो हि ॥२६॥ स्याद्व्यपदेशात्[2]॥२७॥ न गुणार्थत्वात् ॥ २८ ॥

१ ऐष्टिकेषु पत्नीसन्नहनाननुष्ठानाधि०--१३

सन्नहनञ्च[3] वृत्तत्वात् ॥ २९ ॥

---

१ ग्रहणार्थमिति अधिकरणन्यायमालायां पाठान्तरम्।

२ स्याद्वा व्यपेति षु० पा० ।

३ चशब्दरहितः पाठो युक्तिक्षमः ।

१ ऐष्टिकेष्वारण्यभोजनाभावाधि०--१४ ॥

अन्यविधानादारण्यभोजनं न स्या-
दुभयं हि वृत्त्यर्थम् ॥ ३० ॥

१ तेषु शेषभक्षानुष्ठानाधि०--१५ ॥

शेषभक्षास्तथेति चेन्नान्यार्थत्वात् ३१

१ तेष्वन्वाहार्यदानाभावाधि०--१६ ॥

भृतत्वाच्च परिक्रयः ॥ ३२ ॥

१ तेषु शेषभक्षस्य संस्कारार्थतया कर्तव्य-
त्वाधिकरणम्--१७ ॥

शेषभक्षास्तथेति चेत् ॥३३॥ न
कर्मसंयोगात् ॥ ३४ ॥

१ तेषु होतुर्वरणसद्भावाधिकरणम्--१८ ॥

प्रवृत्तवरणात्प्रतितंत्रं वरणं होतुः

क्रियेत ॥ ३५ ॥ ब्रह्मापीति चेत् ॥ ३६ ॥ न प्राङ्नियमात्तदर्थं हि ॥ ३७ ॥ निर्देशस्येति चेत् ॥ ३८ ॥ नाश्रुतत्वात् ॥ ३९ ॥ होतुस्तथेति चेत् ॥ ४० ॥ न कर्मसंयोगात् ॥ ४१ ॥

१ आतिथ्यायां बर्हिषः प्रतिकर्मप्रोक्षणाभावाधिकरणम्—१९ ॥

यज्ञोत्पत्त्युपदेशे निष्ठितकर्मप्रयोगभेदात्प्रतितंत्रं क्रियेत ॥ ४२ ॥ न

---

१ क्रियते इति पु० पा० ।

२ तोऽनुष्ठीति पु०पा० ।

३ क्रियते इति पुस्तकान्तरे पाठः ।

वा कृतत्वात्तदुपदेशो हि ॥ ४३ ॥

१ तस्यां स्तरणमंत्रावृत्त्यधि०—२० ॥

देशपृथक्त्वान्मंत्रोऽभ्यावर्तते॥४४॥

१ बर्हिषो देशान्तरनयने सन्नहनहरण-
मन्त्रयोरप्रयोगाधि०—२१ ॥

सन्नहनहरणे तथेति चेत् ॥४५॥

नान्यार्थत्वात्॥ ४६ ॥(२१)॥२४॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमी-
मांसादर्शने द्वादशस्याध्यायस्य (पशुधर्माणां
पशुपुरोडाशे सौमिकवेदेरुत्तरकालिककर्मसु
प्रसङ्ग इत्यादिविचारो नाम)

प्रथमः पादः ॥१२॥१॥

---

१ ऽभ्यावर्तेत मू० पा० ।

१ विहाराग्नेर्वैदिककर्ममात्रार्थताधि०–१ ॥

विहारो लौकिकानामर्थं साधयेत् प्रभुत्वात् ॥ १ ॥ मांसपाकप्रतिषेधश्च तद्वत् ॥ २ ॥ निर्देशाद्वा वैदिकानां स्यात् ॥ ३ ॥ सति चोपासनस्य दर्शनात् ॥ ४ ॥ अभावदर्शनाच्च ॥ ५ ॥ मांसपाको विहितप्रतिषेधः स्यादाहुतिसंयोगात् ॥ ६ ॥ वाक्यशेषो वा दक्षिणेस्मिन्ननारभ्य विधानस्य ॥ ७ ॥

१ सवनीयपशौ पशुपुरोडाशस्य कर्तव्यताधिकरणम्–२ ॥

सवनीये छिद्रापिधानार्थत्वात्पशु-

---

१ स्यादाहुतीति भृ० पा० ।

२ दक्षिणेऽस्मिन्नादौति जै० न्या० पा० ।

पुरोडाशो न स्यादन्येषामेवमर्थत्वात् ॥ ८ ॥ क्रिया वा देवतार्थत्वात् ॥ ९॥ लिङ्गदर्शनाच्च ॥ १० ॥

१ सवनीयपुरोडाशे हविष्कृदाह्वानस्याभावाधिकरणम्–३ ॥

हविष्कृत्सवनीयेषु न स्यात्प्रकृतौ यदि सवार्थां पशुं प्रत्याहूता सा कुर्याद्विद्यमानत्वात् ॥ ११ ॥

१ तृतीयसवने हविष्कृदाह्वानस्यापुनरावृत्त्यधिकरणम्–४ ॥

पशौ तु संस्कृ[1]ते विधानात्तार्तीयस-

---

१ संश्रुते इति जै० न्या पा० ।

वन (नि)केषु स्यात्सौम्याश्विनयोश्चा पवृत्तार्थत्वात् ॥ १२॥ योगाद्वा यज्ञाय तद्विमोके विसर्गः स्यात् ॥ १३ ॥

१ निशि यज्ञे अमावास्यातंत्रप्रयोगाधि०५

निशि यज्ञे प्राकृतस्याप्रवृत्तिः स्यात् प्रत्यक्षशिष्टत्वात् ।१४॥ कालवाक्यभेदाच्च तन्त्रभेदः स्यात् ॥ १५॥ वेद्युद्धननव्रतं विप्रतिषेधात्तदेव स्यात् ॥१६॥ तंत्रमध्ये विधानाद्वा तत्तन्त्रा सवनीयवत् ॥ १७ ॥ वैगुण्यादिध्माबर्हिर्न साधयेदग्न्याधानं च यदि देवतार्थम् ॥ १८॥

१ विकृतिष्वप्यारम्भणीयाननुष्ठानाधि०–६ ॥

आरम्भणीया विकृतौ न स्यात्प्रकृतिकालमध्यत्वात्कृता पुनस्तदर्थेन ॥ १९ ॥ संकृद्वाऽऽरम्भासंयोगात् ॥ २० स्याद्वा कालस्याशेषभूतत्वात् ॥ २१ ॥ आरम्भाविभागाच्च ॥ २२ ॥

२–२ प्रधानानां धर्मविरोधे बहूनां धर्मानुष्ठानाधिकरणम्–७ ॥

विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्सधर्मत्वम् ॥ २३ ॥

१इदं सूत्रं भाष्ये जैमिनिन्यायमालायां च नास्ति, तिक्रम्यतेऽस्ति ।

१ तुल्यसंख्याकानां धर्मविरोधे प्रथमस्यैव धर्मानुष्ठानाधिकरणम्-८ ॥

मुख्यं वा पूर्वचोदनाल्लोकवत् ॥२४॥

तथा चान्यार्थदर्शनम् ॥२५॥

२ अङ्गगुणविरोधे प्रधानगुणस्यैव बलवत्त्वाधिकरणम्-९ ॥

अङ्गगुणविरोधे च तादर्थ्यात् ॥२६॥

१ परिधौ परिधियूपोभयधर्मानुष्ठानाधिकरणम्- १० ॥

परिधिर्द्व्यर्थत्वादुभयधर्मा स्यात् २७॥

१ तस्मिन्विरोधियूपधर्माननुष्ठानाधि०-११ ॥

योऽप्यस्तु विरोधे स्यान्मुख्यानन्त-

---

१ इदं सूत्रं वृत्तिकारमत एव नास्ति ।

यात् ॥ २८ ॥ इतरो वा तस्य तत्र विधानात् ॥ २९ ॥ उभयोश्चांगसंयोगः ॥ ३० ॥

२ सवनीयपशुपुरोडाशयोः पशोरेव तन्त्रिताधिकरणम्–१२ ॥

पशुसवनीयेषु विकल्पः स्याद्वैकृतश्चेदुभयोरश्रुतभूतत्वात् ॥ ३१ ॥ पाशुकं वा तस्य वैशेषिकाम्नानात्तदनर्थकं विकल्पे स्यात् ॥ ३२ ॥ पशोश्च विप्रकर्षस्तन्त्रमध्ये विधानात् ॥ ३३ ॥

१ समानतन्त्रप्रकृतिविकृत्योर्विकृतितन्त्रानुष्ठानाधिकरणम्– १३ ॥

अपूर्वं च प्रकृतौ समानतन्त्रा

१ तन्त्र चेदिति बृ० ।० ।

चेदानित्यत्वादनर्थकं हि स्यात् ॥ ३४ ॥

१ आग्रयणे प्रसूनबर्हिषामेव ग्रहणाधि०- १४

अधिकश्च गुणः साधारणेऽविरोधा-त्कांस्यभोजिवदमुख्येऽपि ॥ ३५ ॥

२ द्यावापृथिव्यादीनां सर्वेषामेव तन्त्रि-त्वाधिकरणम्- १५ ॥

तत्प्रवृत्त्या तु तन्त्रस्य नियमः स्याद्यथा पाशुकं सूक्तवाकेन ॥ ३६ ॥ न वाऽविरोधात् ॥ ३७ ॥ अशास्त्रल-क्षणाच्च ॥ ३८ ॥ (१५) ॥ २१ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने द्वादशस्याध्यायस्य (सवनीयपशोस्तन्त्रत्वं

न तत्पुरोडाशानां विकृतिस्तांत्रिणी न प्रकृतिरन्वारम्भणीया विकृतिष्वपि स्यान्न प्रकृतानेवेत्यादिविचारो नाम) द्वितीयः पादः ॥१२॥२॥

---

२ अष्टरात्रे वत्सत्वगहतवाससोः समुच्चयाधिकरणम्–१ ॥

विश्वजिति वत्सत्वङ्नामधेयादितरथा तन्त्रभूयस्त्वादहतं स्यात् ॥ १ ॥ अविरोधो वां उपरिवासो हि[2] वत्सत्वक् ॥ २ ॥

---

१ धो वोपरिवासो वेति बृ० पाठः ।
२ वृ० मते हिपदं नास्ति ।

१ अनुनिर्वाप्यपशुपुरोडाशानां पुरोडाश-
स्यैव तंत्रित्वाधिकरणम्- २ ॥

अनुनिर्वाप्येषु भूयस्त्वेन तन्त्रनियमः स्यात् ॥ ३ ॥ आगन्तुकत्वाद्वा स्वधर्मा स्याच्छ्रुतिविशेषादितरस्य च मुख्यत्वात् ॥ ४ ॥ स्वस्थानत्वाच्च ॥५॥ स्विष्टकृच्छ्रवणान्नेति चेत् ॥६॥ विकारः पवमानवत् ॥ ७ ॥ अविकारो वा प्रकृतिवच्चोदनां प्रति भावाच्च ॥ ८ ॥

१ भिन्नोपकारकाणां गुणानां समुच्चया-
धिकरणम्- ३ ॥

एककर्मणि शिष्टत्वाद्गुणानां सर्वकर्म स्यात् ॥ ९ ॥

१ प्रयोजनैक्ये गुणानां विकल्पाधि०-४॥

एकार्थास्तु विकल्पेरन्समुच्चये ह्यावृत्तिः स्यात्प्रधानस्य[1] ॥ १० ॥ अभ्यस्येतार्थवत्त्वादिति चेत् ॥ ११ ॥ नाश्रुतित्वात् ॥ १२ ॥ प्रति चाभ्यासशास्त्रत्वात् ॥ १३ ॥ विकल्पवच्च दर्शयति ॥ १४ ॥ कालान्तरेऽर्थवत्त्वं स्यात् ॥ १५ ॥

१ वैगुण्यसमाधानार्थानां प्रायश्चित्तानां विकल्पाधिकरणम्-५ ॥

प्रायश्चित्तेषु चैकार्थ्यान्निष्पन्नेनाभिसंयोगस्तस्मात्सर्वस्य निर्घातः १६ ॥

---

१ प्रधानस्येति वृत्तिकृन्मते नास्ति ।

१ नैमित्तिकप्रायश्चित्तानां समुच्चयाधि०-६ ॥

समुच्चयस्त्वदोषंनिर्घातार्थेषु ॥ १७ ॥

१ कर्मकालेऽनध्यायेपि मन्त्राणां प्रयोगाधिकरणम्- ७ ॥

मन्त्राणां कर्मसंयोगात्स्वधर्मेण प्रयोगः स्याद्धर्मस्य तन्निमित्तत्वात् ॥ १८ ॥ विद्यां प्रति विधानाद्वा सर्वकालं प्रयोगः स्यात्कर्मार्थत्वात् प्रयोगस्य ॥ १९ ॥

१ कर्मणि प्रवचनस्वरेणैव मन्त्रोच्चारणविध्यधिकरणम्- ८ ॥

भाषास्वरोपदेशेषु ऐरक्तप्रवचन-

---

१ दोषोर्थेष्विति वृत्तिकृन्मते पाठः ।

१ देशादेरेति जै० न्या० पा० ।

प्रति षेधः स्यात् ॥ २० ॥ मन्त्रोपदेशो
वा न भाषिकस्य प्रायापत्तेर्भाषिक-
श्रुतिः ॥ २१ ॥ विकारः कारणा-
ग्रहणे ॥ २२ ॥

१ ब्राह्मणोत्पन्नस्य (भाषिकेणोपदिष्टस्य)
मन्त्रस्य भाषिकस्वरेणैवोच्चारणाधि०-९॥

तन्न्यायत्वाददृष्टोऽप्येवम् ॥२३ ॥
तदुत्पत्तेर्वा प्रवचनलक्षणत्वात् ॥२४॥

१ मन्त्राणां पाठानन्तरमेव पदार्थानुष्ठाना-
धिकरणम्- १० ॥

मन्त्राणां करणार्थत्वान्मन्त्रान्तेन

१ ग्रहे इति वृ० पा० ।

कर्मादिसान्निपातः स्यात्सर्वस्य वच-
नार्थत्वात् ॥ २५ ॥

१ वसोर्धारायां मन्त्रान्ते कर्मसन्निपाताधि-
करणम्- ११ ॥

सन्ततवचनाद्धारायामादिसंयो-
गः ॥ २६ ॥ कर्मसन्तानो वा नाना-
कर्मत्वादितरस्याशक्यत्वात्॥ २७॥

१ आघारेपि मंत्रान्ते कर्मसन्निपाताधि-
करणम्- १२ ॥

आघारे च दीर्घधारत्वात् ॥२८॥

१ एककार्यार्थमंत्राणां विकल्पाधि०-१३ ॥

मन्त्राणां सान्निपातित्वादेकार्थानां
विकल्पः स्यात् ॥ २९ ॥

१ संख्याविहितमंत्राणां समुच्चयाधि०—१४॥

संख्याविहितेषु समुच्चयोऽसान्नि-
पातित्वात् ॥ ३० ॥

१ब्राह्मणविहितमंत्राणां विकल्पाधि०—१५॥

ब्राह्मणविहितेषु च संख्यावत्सर्वेषा-
मुपदिष्टत्वात् ॥ ३१ ॥ याज्यावषट्-
कारयोश्च समुच्चयदर्शनं तद्वत् ॥ ३२ ॥
विकल्पो वा समुच्चयस्याश्रुतित्वा-
त् ॥ ३३ ॥ गुणार्थत्वादुपदेशस्य ॥ ३४ ॥
वषट्कारे नानार्थत्वात्समुच्चयः ॥ ३५ ॥

---

१ अस्य दे'ति जै० न्या० मा० ।

१ हौत्राणां मंत्राणां समुच्चयाधि०-- १६ ॥

हौत्रास्तु विकल्पेरन्नेकार्थत्वात् ॥ ३६ ॥ समुच्चयो वा क्रियमाणानुवादित्वात् ॥ ३७ ॥ समुच्चयं च दर्शयाति ॥ ३८ ॥ (१६) ॥ १८ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने द्वादशस्याध्यायस्य (त्वग्वाससोराधारगतक्रत्वसन्ततत्वादीनां समुच्चयो यवव्रीह्योर्विकल्पश्चेत्यादिविचारो नाम) तृतीयः पादः ॥ १२ ॥ ३ ॥

---

२ पास्तिकपुस्तके क्रियमाणानुवादित्वात्समुच्चयो वा होत्राणामित्येवं सूत्रस्य पाठः ।

१ जपस्तुत्याशीरभिधानानां समुच्चयाधिकरणम्– १ ॥

जपाश्चाकर्मसंयुक्ताः स्तुत्याशीरभिधानाश्च याजमानेषु समुच्चयः स्यादाशीःपृथक्त्वात् ॥ १ ॥ समुच्चयं च दर्शयति ॥ २ ॥

१ ऐन्द्राबार्हस्पत्ये द्विविधयाज्यानुवाक्ययोर्विकल्पाधिकरणम्– २ ॥

याज्यानुवाक्यासु तु विकल्पः स्याद्देवतोपलक्षणार्थत्वात् ॥ ३ ॥ लिङ्गदर्शनाच्च ॥ ४ ॥

---

१ मांस्विति जै० न्या० पा० ।

२ नाच्च येति मु० पा० ।

३ इदं सूत्रं केषुचिद्धाष्यपुस्तकेषु न दृश्यते ।

१ सोमक्रयसाधनानामजादीनां समुच्चयाधिकरणम्- ३ ॥

क्रयणेषु तु विकल्पः स्यादेकार्थत्वात् ॥ ५ ॥ समुच्चयो वा प्रयोगे द्रव्यसमवायात् ॥ ६ ॥ समुच्चयंञ्च दर्शयति ॥ ७ ॥

१ उपयजनादिप्रतिपत्तिकर्मणां समुच्चयाधिकरणम्- ५ ॥

संस्कारे च तत्प्रधानत्वात् ॥८॥

१ आधाने विविधसंख्याकानां दक्षिणानां विकल्पाधिकरणम्- ५ ॥

---

१ इदं सूत्रं भाष्ये वृत्तिग्रन्थे च न दृश्यते ।

संख्यासु तु विकल्पः स्याच्छ्रुतिविप्रतिषेधात् ॥ ९ ॥

१ पशुगणेषु जाघनीनां विकल्पाधि०—६ ॥

द्रव्यविकारं तु पूर्ववदर्थकर्म स्यात्तथा विकल्पे नियमः प्रधानत्वात् ॥ १० ॥ द्रव्यत्वेऽपि समुच्चयो द्रव्यस्य कर्मनिष्पत्तेः प्रतिपशु कर्मभेदादेवं सति यथाप्रकृति ॥ ११ ॥ कपालेऽपि तथेति चेत् ॥ १२ ॥ न कर्मणः परार्थत्वात् ॥ १३ ॥ प्रतिपत्तिस्तु शेषत्वात् ॥ १४ ॥ शृतेऽपि

१ रं च पू इति वृ० पा० ।

पूर्ववत्त्वात्स्यात् ॥ १५ ॥ विकल्पे त्वर्थकर्म नियमप्रधानत्वात् ॥ १६ ॥ शेषे च कर्मकार्यसमवायात्तस्मात्तेनार्थकर्म स्यात् ॥ १७ ॥

१ उखायां काम्येन नित्याग्नेर्विकाराधिकरणम्-७ ॥

उखायां काम्यनित्यसमुच्चयो नियोगे कामदर्शनात् ॥ १८ ॥ असति चासंस्कृतेषु कर्म स्यात् ॥ १९ ॥ तस्य च देवतार्थत्वात् ॥ २० ॥ विकारो वा

१ वत्त्वात्स्येति जै० न्या० क्रमसम्मतः पाठः ।

२ विकल्पे इत्यादि कर्म स्यादित्यन्तमेकं सूत्रं नीत्यार्थकमन्यादीति जै० न्या० क्रमसम्मतः पाठः ।

तदुक्तहेतुः ॥२१॥ वचनादसंस्कृतेषु कर्म स्यात् ॥ २२ ॥ संसर्गे चापि दोषः स्यात् ॥ २३॥ वचनादिति चेत्॥२४ ॥तथेतरस्मिन्॥२५॥उत्सर्गे अपि परिग्रहःकर्मणःकृतत्वात्॥२६॥

१वैकारिकाग्नेराहवनीयत्वाभावाधिकरणम् ८॥

स आहवनीयःस्यादाहुतिसंयोगात् ॥२८॥अन्यो वोद्धृत्याहरणात् ।२८।

१ तस्याधानिकसंस्काराभावाधिकरणम्-९॥

तस्मिन्संस्कारकर्म शिष्टत्वात् २९॥ स्थानाद्वा परिलुप्येरन् ॥ ३० ॥

---

१ त्सर्गेपीति जै० न्या० पा० ।

२ द्वत्य हेति वृ० पा० ।

१ नित्यस्योख्यस्याग्नेरधारणाधिकरणम्-१०॥

नित्यधारणे विकल्पो न ह्यकस्मात्प्रतिषेधः स्यात् ॥ ३१ ॥ नित्यधारणाद्वा प्रतिषेधो गताश्रियः ॥ ३२ ॥

१ सत्रे शुक्रस्पर्शादीनामेककर्तृकत्वाधिकरणम्-११ ॥

परार्थान्येको यजमानगणे॥ ३३ ॥

१ अहीने शुक्रस्पर्शादौ यस्य कस्यचिद्यजमानस्य कर्तृत्वाधिकरणम्-१२ ॥

अनियमोऽविशेषात् ॥ ३४ ॥

१ सत्रे शुक्रस्पर्शादौ गृहपतेरेव कर्तृत्वाधिकरणम्-१३ ॥

मुख्यो वाऽविप्रतिषेधात् ॥ ३५ ॥

१ सत्रेञ्जनादिसंस्काराणां सर्वगामित्वाधिकरणम्—१४ ॥

सत्रे गृहपतिरसंयोगाद्धौत्रवत् ॥ ३६ ॥ आम्नायवचनाच्च ॥ ३७ ॥ सर्वे वा तदर्थत्वात् ॥ ३८ ॥ गृहपतिरिति च समाख्या सामान्यात् ॥ ३९ ॥

१ याजमानार्त्विज्ययोरार्त्विज्यस्यैव बलवत्त्वाधिकरणम्—१५ ॥

विप्रतिषेधे परम् ॥ ४० ॥ हौत्रे परार्थत्वात् ॥ ४१ ॥ वचनं परम् ॥ ४२ ॥

१ ब्राह्मणस्यैवार्त्विज्याधिकाराधि०—१६ ॥

प्रभुत्वादार्त्विज्यं सर्ववर्णानां स्या-

---

१ इदमेतदग्निममाधिकरणं च मिलित्वैकमधिकरणं वृत्तिकृन्मते ।

त् ॥ ४३॥ स्मृतेर्वा स्याद्ब्राह्मणानाम् ॥ ४४ ॥ फलचमसविधानाच्चेतरेषाम् ॥ ४५ ॥ सान्नाय्येऽप्येवं प्रतिषेधः सोमपीथहेतुत्वात् ॥ ४६॥ चतुर्धाकरणे च निर्देशात् ॥ ४७ ॥ अन्वाहार्यें च दर्शनात्॥४८॥१६ ॥ १७ ॥ ॐ ॥

इति श्रीमज्जैमिनिमहर्षिप्रणीते पूर्वमीमांसादर्शने द्वादशस्याध्यायस्य (विषयभेदेन याज्यापुरोनुवाक्याविकल्पसमुच्चयादिविचारो नाम) चतुर्थः पादः ॥ १२ ॥ ४ ॥ संपूर्णो द्वादशोऽध्यायः ॥ १२ ॥ पूर्वमीमांसादर्शनं सम्पूर्णम्॥

शुभमस्तु ॥

---

१ यथोऽसोमोऽसि जै॰ न्या॰ पा॰ ।